1. — उपनयनपद्धति

२. — स्नान पद्धति



१२२

सभापर्व २

न०टी०

श्रीगणेशाय नमः बीजांकुरद्रुमसमेषु वरस्त्रविश्वान्मोहाय चिंतयत रूपमभेदबुद्ध्या हास्याय बीजमशनं गमनं फलाभमेकं गोपालमेवकलयाम जगन्निदानं
१ जीवन्मुनिः स्वपरस्पृष्टवि[illegible]यत्र भजापरधियाविज्ञमायावाः संष्टे रूपैर्विविधैर्विरसंगविनावधीशान्तस्मिन्ममास्तु रतिरात्मनिलक्ष्मणाय्ये २ प्रणम्य नारायण
तीर्थवर्यान्धीरेशमिश्रान्महमीरयुर्यान् प्राचां गुरूणां हृदयानुरूपं कुर्मः सभापर्वणि भावदीपं ३ तत्र पूर्वस्मिन्पर्वणि श्रीशार्ङ्गकाः ज्ञानवलादेव वह्निमुखा
द्विमुक्ताइत्युक्तं तत्र ज्ञानं भगवद्भक्तिवलादेव लभ्यत इति प्रतिपादनायेदं सभापर्वारभ्यते तत्र भक्तावपिकृतघ्नत्वादर्थभक्तिवलेनैव पांडवानां दिव्यसभाला

नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ वैशंपा[illegible] उवाच ततोऽब्रवीन्मयः पा
र्थं वासुदेवस्य सन्निधौ प्रांजलिः श्लक्ष्णया वाचा पूजयित्वा पुनः पुनः २ मय उवाच अस्मात्कृष्णात्सुसंरब्धात्पावका
च्च दिधक्षतः त्वया त्रातोऽस्मि कौंतेय ब्रूहि किं करवाणि ते ३ ॥ २ ३

मोघेश्वर्येऽद्वेषेणापि भगवद्ध्यानं भगवत्सायुज्यप्रापकमिति शिशुपालनिर्याणेन ध्यानमाहात्म्यं निरूपणीयमपि पांडवेषु अभक्तानां दुर्योधनादीनां द्वेषोऽस्त्वा
३ भक्तेर्दोषाः द्यूते द्रौपदीक्लेशेन भगवतो भक्तपक्षपातित्वं समर्थानामपि पांडवानां सापराधेष्वपि दुर्योधनादिषु अप्रकोपेन भक्तानां तितिक्षा चेति भक्तगु
णाः दर्शिताः। तत्र उपकर्तर्यप्रत्युपकारोऽवश्यं कर्तव्य इत्येतद्दर्शयितुं पांडवार्थं मयेन वह्नितो मोचितेन अभूतपूर्वा सभा कृतेति तावद्दर्शयते। ततोऽब्रवीन्म स०भ० १
यः पार्थमित्यादिना २ खांडवदाहे कस्मात् चक्रेण जिघांसतः ३

४ ५ विश्वंकर्म्मेकृतिसाध्यंयस्यसविश्वकर्मा महाकविः शिल्पपंडितः। स्वंगतेनप्रत्युपकारार्थंप्रातुमिच्छसि ७ संदध्योविचारितवान् १० हेदैतेयेहेदानव। ११
१२ आसुरान्मानुषानिसुपलक्षणंदेवगंधर्वादीनामप्यभिप्रायान्नलेपचित्रेलेख्यचित्रेचचतुर्दशभुवनांतरस्थतत्रत्यानीयस्त्रीभाविकनानाविधलीलाप्रदर्शं।

अर्ज्जुनउवाच कृतमेवत्वयासर्वंस्वस्तिगच्छमहासुर प्रीतिमान्भवमेनित्यंप्रीतिमंतोवयंचते ४ मयउवाच युक्तमेतत्त्वयिविभोयथात्थपुरु
षर्षभ प्रीतिपूर्वमहंकिंचित्कर्तुमिच्छामिभारत ५ अहंहिविश्वकर्म्मावैदानवानांमहाकविः सोहंवैत्वत्कृतेकर्तुंकिंचिदिच्छामिपांडव ६
अर्ज्जुनउवाच प्राणात्कृच्छ्राद्विमुक्तंत्वमात्मानंमन्यसेमया एवंगतेनशक्ष्यामिकिंचित्कारयितुंत्वया ७ नचापितवसंकल्पंमोघमिच्छामि
दानव कृष्णस्यक्रियतांकिंचित्तथाप्रतिकृतंमयि ८ चोदितोवासुदेवस्तुमयेनभरतर्षभ मुहूर्त्तमिवसंदध्यौकिमयंचोद्यतामिति ९
ततोविचिंत्यमनसालोकनाथः प्रजापतिः चोदयामासतंकृष्णः सभावैक्रियतामिति १० यदित्वंकर्त्तुकामोसिप्रियंशिल्पवतांवर
धर्म्मराजस्यदैतेययादृशीमिहमन्यसे ११ यांकृतांनानुकुर्वंतिमानवाःप्रेक्ष्यविष्ठिताः मनुष्यलोकेसकलेतादृशींकुरुवैसभां १२
यत्रदिव्यानभिप्रायान्पश्येमहिकृतांस्त्वया आसुरान्मानुषांश्चैवसभांतांकुरुवैमय १३ वैशंपायनउवाच प्रतिगृह्यतुतद्वाक्यंसंप्र
हृष्टोमयस्तदा विमानप्रतिमांचक्रेपांडवस्यशुभांसभां १४ ततः कृष्णश्चपार्थश्चधर्म्मराजेयुधिष्ठिरे सर्वमेतत्समावेद्यदर्शयामास
तुर्मयं १५ तस्मैयुधिष्ठिरः पूजांयथार्हमकरोत्तदा सतुतांप्रतिजग्राहमयः सत्कृत्यभारत॥ १६ ॥ ॥

नेनमनोहरतीः पश्येमयद्दर्शे[illegible]ह्यांउंतरवन्निसर्वेवक्तनातदृष्टप्रायंभवतीत्यर्थः १३ विमानप्रतिमेतिनाम विमानसदृशीवा १४ १५ १६

स॰ टी॰ पूर्वदेवो वृषपर्वा दानवः तस्य चरितं विदुसरसि सयज्ञकरणादि १७ आश्वस्य स्वस्थचित्तो भूत्वा प्रचक्रमे आरब्धवान् १८ १९ २० किष्कुर्हस्तः सर्वतः चतुर्दिक्षु
२१ सभापर्वभावदीपेऽध्यायः प्रथमः २५ अर्थ्यमर्थादनपेतं तथ्यं सत्यं लघु स्वल्पाक्षरं युक्तं युक्तिमत् अनुत्तरमेवानुत्तरं पूर्वपक्षवदसमाधेयं तथ्यंप

सपूर्वदेवचरितं तदा तत्र विशांपते कथयामास दैतेयः पाण्डुपुत्रेषु भारत १७ सकालं कंचिदाश्वस्य विश्वकर्मा विचिंत्य तु सभां प्रचक्रमे कर्तुं पा
ण्डवानां महात्मनां १८ अभिप्रायेण पार्थानां कृष्णस्य च महात्मनः पुण्येहनि महातेजाः कृतकौतुकमंगलः १९ तर्पयित्वा द्विजश्रेष्ठान्
पायसेन सहस्रशः धनं बहुविधं दत्वा तेभ्य एव च वीर्यवान् २० सर्वर्तुगुणसंपन्नां दिव्यरूपां मनोरमां दशकिष्कुसहस्रां तां मापयामास
सर्वतः २१ इति महाभारते सभापर्वणि प्रथमोध्यायः वैशंपायन उवाच उषित्वा खाण्डवप्रस्थे सुखवासं जनार्दनः पार्थैः प्रीति
समायुक्तैः पूजनार्होभिपूजितः १ गमनाय मतिं चक्रे पितुर्दर्शनलालसः धर्मराजमथामंत्र्य पृथां च पृथुलोचनः २ ववंदे चर
णौ मूर्ध्ना जगद्वंद्यः पितृष्वसुः स तया मूर्ध्न्युपाघ्रातः परिष्वक्तश्च केशवः ३ ददर्शानंतरं कृष्णो भगिनीं स्वां महायशाः तामुपेत्य हृषीके।
शः प्रीत्या बाष्पसमन्वितः ४ अर्थ्यं तथ्यं हितं वाक्यं लघु युक्तमनुत्तरं उवाच भगवान् भद्रां सुभद्रां भद्रभाषिणीं ५ तया स्वजनगा॰
मीनि श्राविता वचनानि सः संपूजितश्चाप्यसकृत् शिरसा चाभिवादितः ६ तामनुज्ञाप्य वार्ष्णेयः प्रतिनंद्य च भामिनीं ददर्शानंतरं कृष्णो
व१ धौम्यं चापि जनार्दनः ७ ॥ ॥

थ्यं हितं वाक्यं गुरु स्वल्पाक्षरं मृदु इति पाठे पथ्यं सन्मार्गादनपेतं गुरुवद्ग्राह्यं ५ स्वजनगामीनि पाण्डवमात्रादिषु सुखवार्तावृत्तकुशलसंदेशरूपाणि ६ भामि एम॰
नीं दीप्तिमतीं भाविनीमिति पाठे सद्भावयुक्तां ७ २

वंवंदेचेतिपुरुषसत्तमः पुरुषेषु अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयेषु पंचसु आद्योव्यवहारः सत्तमः उत्तरोत्तरेषां तु पूर्वपूर्वाधिष्ठानत्वात्तत्तदपेक्षया
सत्तमत्वंपुरुषःब्रह्मतु सर्वेषामधिष्ठानभूतंमोक्षेप्यवाध्यत्वात्सत्तमः ननुकथंसत्तमेऽस्थूलमनणुनिष्कलंनिष्क्रियंशांतमित्यादिश्रुतेः सर्वविशेषरहितस्यनाम
रूपवंदनादिक्रियायोगोवंदेनेतिचेत् अत्रब्रूमः कौलिकप्रतिमाद्वाराचैत्रभोगइवेशता असंगेभूम्निजीवोधकल्पितोपाधियोगतः अनादौसंसारेजीवेश्वरविभाग
गस्याप्यनादित्वात् रज्ज्वांभुजंगइवजीवोधस्याविद्ययाअमुद्रेपिचिदात्मनिईशसत्तादिकंकल्पितं ऋत्वमेवब्रह्मणः शरीरमिति यथाकौलिकः प्रतिमांकृत्वाइदमेवचै
त्रस्यशरीरमितिभावयति तद्वत् यथाचप्रतिमाद्वाराचैत्रस्यभोगोभवति एवंसुद्वायामपिचितिजीवोधकल्पितोपाधिद्वाराईशनादिकंभवति एतावांस्तुविशेषः

वंदेत्वयथात्मानंधीमंपुरुषसत्तमः द्रौपदींसांत्वयित्वाचआमंत्र्यच
जनार्दनः ८ ॥

जीवस्यत्वविद्याकल्पितंशरीरंतत्रस्त्रीतिप्रतिमानिमित्तकोपिभोगः स्वदेहावच्छेदेनैवजायतेनप्रतिमावच्छेदेन चित्तस्तत्तद्भावाविद्यसुलाद्वयरकल्पितोपाध्य
वच्छेदेनैवनिर्यन्तृत्वादिकंभवति तच्चाकर्मजत्वाच्चितौनसंसृज्यते यथाजीवेभोगः यथावाकल्पितसर्पगतंभीषणत्वंरज्ज्वौ एवंचव्यवहारतः संसारस्या
स्याद्यंतशून्यत्वात्तत्कारणीभूतस्यईशस्यापितथात्वंवक्तव्यं किमुतईशादिकारणीभूतायाः सूक्ष्ममूर्तेः तथाहि वीजांकुरवत्सूपमेयुईशस्तु
विराट्सूत्रअनंतवीजगर्भफलोपमः श्रीकृष्णः अनंतकोटिब्रह्मांडनायकइतिप्रसिद्धं अयमेवश्रीमच्छंकरभगवत्पादैर्वेदांतसारेवनहेक्षरस्ये
तेनसमष्टिव्यष्टिरूपेणस्थूलसूक्ष्मकारणानिप्रतिपाद्यसमष्टिवनदृष्टांतेनप्रतिपादितः शास्त्रेपिअंतस्तद्धर्मोपदेशादित्यत्रयएषोंतरादित्येहिरण्मयः
पुरुषोदृश्यतेहिरण्यश्मश्रुर्हिरण्यकेशआप्रणखात्सर्वएवसुवर्णस्तस्ययथाकप्या

सु० टी०

संपुंडरीकमेवमक्षिणी तस्योदितिनाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति नाम रूपवंतं आदित्यमंडलांतर्वर्तिनं नारा-
यणमामुदाहृत्य तस्य ऋक्सामे च गेष्णाविति नारायणस्य कृत्स्नप्रपंचात्मकेऽक्कत्वामे अंगुलिपर्वणी इत्युक्तं ततो नंतकोटिब्रह्मांडप्रपत्संस्त्योमाकृतेर्ब्रह्मरो
सुच्यते अयमेव नंदनंदनो महामायावी सुप्तिप्रलये केवलस्यैव सुकर्मापरमेश्वरतिजगदिंद्रजालं स्वमूर्त्या सह तिरोधायापास्तसमस्तविशेषं ब्रह्मात्मानं प्रापय-
ति कर्मशेषसत्वे पुनरुद्भावयति च ततश्चास्य स्वाविद्याभावादसंगत्वं पराविद्याकल्पितोपाधिसंवेशात्मतिमायाभोजकत्ववतो नियंतृत्वमत्र विद्याया
श्चाधेतत्वं न्यस्वात् तन्निमत्वं चेतिसिद्धं ततश्चासंगत्वाद्युक्तमस्य पुरुषस्त्वमत्त्वं जनगमयितृत्वरूपजनार्दनत्वं नियंतृत्वं नियंतृत्वादेव च उत्सीदेयुरिमे लोका न
कुर्यां कर्म चेदहमिति वक्ष्यमाणरीत्या जनशिक्षार्थं धौम्यवंदनेन वैदिकमर्यादापरिपालकत्वं द्रौपदीमानेन च सुहृदनुग्राहकत्वं चेत्यादि सर्वं समंज-
सं। अयमेवार्थो मंगलश्लोकाभ्यामस्माभिः संगृहीतो नप्रसमंतेभ्यः ~ ॥ ॥ ॥ ॥ ॥

एम०

३

भ्रातृन्पितृष्वसुः पुत्रान् ९ ११ तस्थषांस्थितिमतांवरः सनातनश्समर्थः १२ १६ अभी क्षनरथाश्वरश्मीन् १७ १८ सुपीडितंगांचयथाभवतितथा

भ्रातृनभ्यगमद्विद्वान्पार्थेनसहितोवली भ्रातृभिः पंचभिः कृष्णोवृतः शक्रइवामरैः ९ यात्राकालस्ययोग्यानिकर्माणिगरुडध्वजः
कर्तुकामः शुचिर्भूत्वास्नातवान्समलंकृतः अर्चयामासदेवांश्चद्विजांश्चयदुपुंगवः माल्यजाप्यनमस्कारैर्गंधैरुच्चावचैरपि ११ सकृ
त्वासर्वकार्याणिप्रतस्थेतस्थुषांवरः उपेत्यसयदुश्रेष्ठोवाह्यकक्षाद्विनिर्गतः १२ स्वस्तिवाच्यार्हतोविप्रान्दधिपात्रफलाक्षतैः
वसुप्रदायचततः प्रदक्षिणमथाकरोत् १३ कांचनंरथमास्थायताक्ष्र्यकेतनमाशुगं गदाचक्रासिशार्ङ्गाद्यैरायुधैरावृतंशुभं १४
तिथावथचनक्षत्रेमुहूर्तेचगुणान्विते प्रययौपुंडरीकाक्षः शैव्यसुग्रीववाहनः १५ अन्वारुरोहचाप्येनंप्रेम्णाराजायुधिष्ठिरः अपा
स्यचास्यंतारंदारुकंयंतृसत्तमं १६ अभीषून्संप्रजग्राहस्वयंकुरुपतिस्तदा उपारुह्यार्जुनश्चापिचामरव्यजनंसितं १७ रुक्म
दंडंबृहद्मूर्ध्निदुधावप्रदक्षिणं तथैवभीमसेनोपियमाभ्यांसहितोवली १८ पृष्ठतोनुययौकृष्णमृत्विक्पौरजनैः सह सतथा
भ्रातृभिः सर्वैः केशवः परवीरहा १९ अन्वीयमानः शुशुभेशिष्यैरिवगुरुः प्रियैः पार्थमामंत्र्यगोविंदः परिष्वज्यसुपीडितं २०

२१

भवतितथापरिष्वज्य। २० २१ २१ २१ २१

स०टी०

२४ संविदंपुनरेष्यामीतिनिश्चयंकृत्वा २५ लोचनैरितिसर्वेंद्रियाणामुपलक्षणं परमात्मानंप्रथमंप्रतिमाहि स्मुसंचिंतयमनोभिरितिपश्चात्‌ इतिमांतस्त्कामनसैवचिंत
तेयत्तरत्‌तुक्रं २७ मनसोत्तपेशौरिर्मानसम्पत्तिरूपांतदेधे अतएवतेऽकामाः निर्विकल्पसमाधिस्थाः यदातदेयमनुभवंतेकामायेस्पहृरिक्षिताः अथमतेोऽमनो

युधिष्ठिरंसृजोयित्वाभीमसेनंयमौतथा परिष्वक्तोभरवतैत्तयमाभ्यामभिवादितः २१ योजनार्द्धमथोगत्वाकृष्णः परपुरंजयः युधिष्ठि
रंसमामंत्र्यनिवर्त्तस्वेतिभारत २२ ततोभिवाद्यगोविंदः पादौजग्राहधर्म्मवित्‌ उत्थाप्यधर्म्मराजस्तुमूर्द्धन्युपाघ्रायकेशवं २३
पांडवोयादवश्रेष्ठंकृष्णंकमललोचनं गम्यतामित्यनुज्ञाप्यधर्म्मराजोयुधिष्ठिरः २४ ततस्तैःसंविदंकृत्वायथावन्मधुसूदनः निव
र्त्यचतथाकृच्छ्रात्पांडवान्सपदानुगान्‌ २५ स्वांपुरींप्रययौहृष्टोयथाशक्रोमरावतीं लोचनैरनुजग्मुस्तंतमादृष्टिपथात्तदा २६
मनोभिरनुजग्मुस्तंकृष्णंप्रीतिसमन्वयात्‌ अतृप्तमनसामेवतेषांकेशवदर्शने २७ क्षिप्रमंतर्दधेशौरिश्चक्षुषांप्रियदर्शनः
अकामाएवपार्थास्तेगोविंदगतमानसाः २८ निवृत्योपययुस्तूर्णंस्वपुरंपुरुषर्षभाः स्यंदनेनाथकृष्णोपित्वरितद्वारकामगा
त्‌ २९ सात्वतेनचवीरेणपृष्ठतोयायिनातदा दारुकेणचसूतेनसहितोदेवकीसुतः सगतोद्वारकांविष्णुर्गरुत्मानिववेगवा

न्‌ ३०

मनुसत्वंब्रह्मसमक्षात्तरनिष्क्रांतः यतोगोविंदेनिर्विकल्पब्रह्मणिगतंलीनंमानसंयेषांतेतथाभूत्वाः २८ निवृत्येतिसमाधिसुखानुभवानंतरंव्युत्थानंध्वनितं २९ एम०
सगतेतिपक्षिगत्वाशीघ्रगमनशीलः गमेः अन्येभ्योपिदृश्यंतेइतिक्वनिप्‌ अनुदात्तोपदेशेतिअनुनासिकलोपेह्रस्वस्यपितितुगागमः ३० ३० ४

३६ अध्यायः २ १ २ भांडमिवभांडंमूल्यधनंविचित्रंगोपाहानद्वंद्वंकृतंहिंगुलादिवन्निर्मितंमणिमयंमणिप्रचुरंयेनकृत्रिममयूरादीनांचंद्रकलोचनादि

वैशंपायनउवाच निवृत्तधर्मराजस्तुसहभ्रातृभिरच्युतः सुहृत्परिवृतोराजाप्रविवेशपुरोत्तमं ३१ विसृज्यसुहृदःसर्वान्भ्रातृंश्च
पुत्रांश्चधर्मराट् मुमोदपुरुषव्याघ्रोद्रौपद्यासहितोनृपः ३२ वैशंपायनउवाच केशवोपिमुदायुक्तः प्रविवेशपुरोत्तमं पूज्य
मानोयदुश्रेष्ठैरुग्रसेनमुखैस्तथा ३३ आहुकंपितरंवृद्धंमातरंचयशस्विनीं अभिवाद्यबलंचैवस्थितःकमललोचनः ३४
प्रद्युम्नसांबनिशठांश्चारुदेष्णंगदंतथा अनिरुद्धंचभानुंचपरिष्वज्यजनार्दनः ३५ सवृद्धैरभ्यनुज्ञातोरुक्मिण्याभवनंययौ।
मयोपिसुमहाभागःसर्वरत्नविभूषितां विधिवत्कल्पयामाससभांधर्मसुतायवै ३६ इतिश्रीमहाभारतेसभापर्वणि। वै।
शंपायनउवाच अथाब्रवीन्मयःपार्थमर्जुनंजयतांवरं आपृच्छेत्वांगमिष्यामिपुनरेष्यामिचाप्यहं १ उत्तरेणतुकैलासं।
मैनाकंपर्वतंप्रति यियक्षमाणेषुपुरादानवेषुमयाकृतं २ चित्रंमणिमयंभांडंरम्यंबिंदुसरःप्रति सभायांसत्यसंधस्ययदासी
द्वृषपर्वणः ३ आगमिष्यामितद्गृह्ययदितिष्ठतिभारत ततःसभांकरिष्यामिपांडवस्ययशस्विनीं ४ मनःप्रह्लादि
नींचित्रांसर्वरत्नविभूषितां अस्तिबिंदुसरस्युग्रागदाचकुरुनंदन ५ ॥ ॥

निक्रियंते ३ ४ ५ ५ ५ ५

राज्ञावृषपर्वणानिहितासाइदानीमप्यस्तीतिभावयामीतियोज्यं ततोऽवोग्भीमसेनंविनातदुद्यमनेयोग्यस्यपुंसोऽज्ञातत्वादितिभावः भारसहागदांतत्रेणासन्नि
पातितस्यविचाल्या यतोदृढा ६ सावै शतसहस्रस्यलक्षस्यगदालक्षेणतुल्येत्यर्थः स्वर्णभारसहस्रस्येतिपाठेतुतुलापलशतंप्राहुर्भारस्याद्विंशतिस्तुलेति

निहितांभावयाम्येवंराज्ञाहत्वारणेरिपून् सुवर्णबिंदुभिश्चित्रागुर्वीभारसहादृढा ६ सावैशतसहस्रस्यसम्मिताशत्रुघातिनी अ
नुरूपाचभीमस्यगांडीवंभवतोयथा ७ वारुणश्चमहाशंखोदेवदत्तःसुघोषवान् सर्वमेतत्प्रदास्यामिभवतेनात्रसंशयः ८
इत्युक्त्वासोऽसुरःपार्थंप्रागुदीचींदिशंगतः अथोत्तरेणकैलासान्मैनाकंपर्वतंप्रति ९ हिरण्यशृंगःसुमहान्महामणिमयो
गिरिः रम्यंबिंदुसरोनामयत्रराजाभगीरथः १० दृष्टुंभागीरथींगंगामुवासबहुलाःसमाः यत्रेष्टंसर्वभूतानामीश्वरेणमहा
त्मना ११ आहृताःक्रतवोमुख्याः शतंभरतसत्तम यत्रयूपामणिमयाश्चैत्याश्चापिहिरण्मयाः १२ शोभार्थंविहितास्त
त्रनतुदृष्टान्ततःकृताः यत्रेष्ट्वासगतःसिद्धिंसहस्राक्षःशचीपतिः १३ यत्रभूतपतिःसृष्ट्वासर्वान्लोकान्सनातनः उपास्य
तेतिग्मतेजाः स्थितोभूतैःसहस्रशः १४ ॥

स्तोलेतिशास्त्रोक्तमानेनगुर्वीत्यर्थः ७ ८ प्रागुदीचीमैशानीं उत्तरेणउत्तरतः ९ हिरण्यशृंगोमैनाकावयवभूतोगिरिः १० ईश्वरेणप्रजापतिना ११
१२ दृष्टान्ततः शास्त्रसिद्धान्ततः १३ भूतपतिर्महादेवः सृष्ट्वासृष्टिकर्ता। अत्रापिगलेतिवत्क्वनिप् १४ ॥ ॥

१५ शिष्टसंप्रतिपत्तयेइतिपाठेपिशिष्टानांधर्मानुष्ठानेप्रवर्त्तयितुमित्यर्थः। १६ १७ स्फाटिकंस्फटिकरत्नसुपलक्षणंनानारत्नमयंसितसारंगपिशंगादिवर्णा
नांमहामणीनांचूर्णानियथापेक्षितंमिश्राणिशुकपारावतमयूरजपादाडिमजंबूफलवर्णाद्यवांतरमिश्ररंगरचनार्थंवृषपर्वयोगेसमार्थ्यसंपादितंतत्रोपयु
क्तावशिष्टंआनीतवानित्यर्थः १८ किंकरैः रक्षसांजातिविशेषैः १९ २४ दिव्यादिव्येनदिव्येनचसाध्व्यलौकिकेनलौकिकेनचतेजसानवमेघप्रती

नरनारायणौब्रह्मायमः स्थाणुश्चपंचमः उपासतेयत्रसत्रंसहस्रयुगपर्यये १५ यत्रेष्टंवासुदेवेनसत्रैर्वर्षगणान्बहून् श्र
द्दधानेनसततंधर्मसंप्रतिपत्तये १६ सुवर्णमालिनोयूपांश्चैत्यांश्चाप्यतिभास्वरान् ददौयत्रसहस्राणिप्रयुतानिचकेशवः
१७ तत्रगत्वासजग्राहगदांशंखंचभारत स्फाटिकंचसभाद्रव्यंयदासीद्वृषपर्वणः १८ किंकरैःसहरक्षोभिर्यदरक्षन्महद्धनं
तदगृह्णान्मयस्तत्रगत्वासर्वंमहासुरः १९ तदाहृत्यचतांचक्रेसोसुरोप्रतिमांसभां विश्रुतांत्रिषुलोकेषुदिव्यांमणिमयीं
शुभां २० गदांचभीमसेनायप्रवरांप्रददौतदा देवदत्तंचार्जुनायशंखप्रवरमुत्तमं २१ यस्यशंखस्यनादेनभूतानिप्रच
कंपिरे सभाचसामहाराजशातकुंभमयद्रुमा २२ दशकिष्कुसहस्राणिसमंतादायताभवत् यथावह्नेर्यथार्कस्य
सोमस्यचयथासभा २३ भ्राजमानातथात्यर्थंदधारपरमंवपुः अभिघ्नतीवप्रभयाप्रभामर्कस्यभास्वरां २४ प्रबभौ
ज्वलमानेवदिव्यादिव्येनतेजसा नवमेघप्रतीकाशादिवमावृत्यधिष्ठिता आयताविपुलारम्याविपाप्माविगतक्लमा २५

काशानवभिर्मेघैरिवमेघैश्चित्रक्षेत्रेचमत्कारान्नवर्षिभिः शृंगारादिभीरसैः। क्वचिच्चित्रैरभिनीयप्रदर्शितैः शोभमाना दिवंआवृत्यव्याप्यअभि
व्येतियावत् विष्ठिताविशेषेणास्थिता विपाप्मापापघ्नीदिव्यतेजः संपन्नत्वात् विगतक्लमा। श्रमच्छेदिनी। भूताःप्राणिनस्तत्रचित्रमणिवेदिकेति
पादंकल्पयंति २५

स० टी०
६

प्राकारः परिधिर्भित्तिः तोरणानि बहिर्द्वाराणि १६ इत्यत्राहिंसादीन्यमनियमान्नर्हतीति नेरयार्हाः भगवद्भक्ताः बलिवाणप्रभृतयः तेषामियं दाराणार्ही सा सत्त्वनीति
पाठे सात्त्वतपरमात्मा सोस्त्येषां ते सात्त्वतास्तेषामियं सात्त्वतीति स एवार्थः। २७ वहंतीति सभायाः जंगमत्वमुक्तं अत एव विमानप्रतिमेति नाम तस्याः युक्तं
२८ २९ नलिनीकमलवनी सरसी वैडूर्येंद्रनीलमणिमयपत्रैर्मणिमयनालमयाम्बुजा मणिमयनालोकनकाम्बुजा च मयः शिल्पिनि
दैत्यानां करभेश्वरतेरपि चेति विश्वः करभः कलभो वा द्वात्रिंशदिति विश्वः। मणिनालोज्वलांबुजामिति पाठे तु मणिमयानि नालेषु विकस्वराणि अंबुजानि य

उत्तमद्रव्यसंपन्ना रत्नप्राकारमालिनी बहुचित्रा बहुधना सुकृता विश्वकर्मणा २६ न सा त्वत्तीसुधर्मा वा ब्रह्मणो वाथ तादृशी
समा रूपेण संपन्ना याचक्रे प्रतिमां मयः २७ तां स्म तत्र मयेनोक्ताः रक्षंति च वहंति च समामष्टौ सहस्राणि किंकरा नाम राक्ष
साः २८ अंतरिक्षचरा घोरा महाकाया महाबलाः रक्ताक्षाः पिंगलाक्षाश्च शुक्तिकर्णाः प्रहारिणः २९ तस्यां सभायां न
लिनीं चकाराप्रतिमां मयः वैडूर्यपत्रविततां मणिनालोज्वलांबुजां ३० हैमसौगंधिकवनीं नानाद्विजगणायुतां पुष्पि
तैः पंकजैश्चित्रां कूर्ममत्स्यैश्च कांचनैः चित्रस्फटिकसोपानां निष्पंकसलिलां शुभां ३१ ३१

स्यां सा तथा मणिमयनालेषु स्वच्छांबुजां वा ३० पद्मसौगंधिकवनीं पद्माकारैः सौगंधिकैः पद्मरागैर्युक्तां पद्मरागमयपद्मामित्यर्थः सौगंधिकं तु
कह्लारे पद्मरागे चेति मेदिनी हैमसौगंधिकवनीमिति पाठे स्पष्टोर्थः पुष्पितैर्विकसितैः निः पंकेति विद्यमानमपि सलिलमपि स्वच्छत्वात्त्वाशय
रूपेणैव प्रकाशते न स्वरूपेण स्फटिकजपाकुसुमवत् अनेन तत्र स्थलभ्रमकारणमुक्तं ३१ ३१ ३१
ति२

स० ६

मंद्रानिलेनसमुद्धूतांसमुच्छलितबिंदुं। अतएवसर्वतः प्रसृतनलिनीपत्रेषुमुक्तातुल्यैः जलबिंदुभिः आचितांव्याप्तां महामणिशिलामयाःशिलापट्टाः दीर्घचतुरस्रपा
षाणाः तैर्बद्धाःपर्यंतेसमीपेचतुर्दिक्षुवेदिकायस्यास्ता ३२ मणिरत्नचितां तांतुअभ्येत्य अधिगम्य ज्ञात्वा अयंभावः अदृष्टपूर्वैरतिभास्वरैः पद्मनालपुष्पै
रछिन्नत्वात्सलिलस्यकाचमयपांवैदूर्यमणिमयांवाभुविकृत्रिमामेवकमलादीनामिमामानमणिरत्नचिताभूमिरेवेयमितितांनलिनींज्ञात्वास्थलभ्रमाज्जले

मंद्रानिलसमुद्धूतांमुक्ताबिंदुभिराचितां महामणिशिलापट्टबद्धपर्यंतवेदिकां ३२ अभ्येत्यमानवाः केचिद्दृष्ट्वापिनविजानते ते
ज्ञानात्पतंतिस्मनराविभ्रांतचेतसः ३३ तांसभामभितोनित्यंपुष्पवंतोमहाद्रुमाः आसन्नानाविधानीलाः शीतछायामनोरमाः
३४ काननानिसुगंधीनिपुष्करिण्यश्चसर्वशः हंसकारंडवोपेताश्चक्रवाकोपशोभिताः ३५ जलजानांचपद्मानांस्थलजानांच
सर्वशः मारुतोगंधमादायपांडवान्स्मनिषेवते ३६ ईदृशींतांसभांकृत्वामासैःपरिचतुर्दशैः निष्ठितांधर्मराजायमयोराजन्न्य
वेदयत् ३७ सभापर्वणि वैशंपायनउवाच ततः प्रवेशनंतस्यांचक्रेराजायुधिष्ठिरः अयुतंभोजयित्वातुब्राह्मणानांनराधि
पः १ साज्येनपायसेनैवमधुनामिश्रितेनच भक्ष्यैर्मूलैः फलैश्चैवमांसैर्वाराहहारिणैः कृसरेणाथजीवंसाहविष्येणच
सर्वशः २

पतंतीति ३३ तांसभांअभितइतिकर्मप्रवचनीययोगाद्द्वितीयातस्याःसभायाः समंततइत्यर्थः ३४ पुष्करिण्यस्तडाकाः ३५ ३६ परिचतुर्दशैःचतु
र्दशाधिकैः ३७ इतिनैलकंठीयेभारतभावदीपेसभापर्वणितृतीयोध्यायः १ कृसरेणतिलमिश्रौदनेन ओदनस्तिलमिश्रस्तुकृसरः परिकीर्तितः
तिलकल्कान्विनिक्षिप्यपक्तोवाकृसरोभवेदितिग्रस्थविरः जीवंसापाकविशेषेणओदनस्यैव पवनभाषयाबिरिंजिइत्युच्यते शाकविशेषेणत्यन्ये २

३ अर्हैतैः अनुपभुक्तैः ४ ५ दैवतानि द्वारादिषु स्थानेषु पितामहादीनि द्वारे पितामहं विघ्नादिस्तत्संस्थान ६ मल्लाः बाहुयोधिनः झल्लाः लकुटयोधिनः १८

रम्यायां ४

मांसप्रकारैर्विविधैः खाद्यैश्चापि तथा नृप चोष्यैश्च विविधै राजन्पेयैश्च बहुविस्तरैः ३ अर्हैतैश्च वासोभिर्माल्यैरुच्चावचैरपि तर्प
यामास विप्रेन्द्रान्नानादिग्भ्यः समागतान् ४ ददौ तेभ्यः सहस्राणि गवां प्रत्येकशः पुनः पुण्याहघोषस्तत्रासीद्दिवस्पृगिव भार
त ५ वादित्रैर्विविधैर्दिव्यैर्गन्धैरुच्चावचैरपि पूजयित्वा कुरुश्रेष्ठो दैवतानि निवेश्य च ६ तत्र मल्ला नटा झल्लाः सूता वैतालिकास्तथा
उपतस्थुर्महात्मानं धर्मपुत्रं युधिष्ठिरं ७ तथा स कृत्वा पूजां तां भ्रातृभिः सह पाण्डवः तस्यां सभायां रेमे शक्रो यथा दिवि ८ सभायाम
थ यस्तस्यां पाण्डवैः सह आसते आसांचक्रुर्नरेन्द्राश्च नानादेशसमागताः ९ असितो देवलः सत्यः सर्पमाली महाशिराः अर्वावसुः
सुमित्रश्च मैत्रेयः शुनको बलिः १० बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः सुमन्तुर्जैमिनिः पैलो व्यासशिष्यास्तथा वयं ११
तित्तिरिर्याज्ञवल्क्यश्च ससुतो लोमहर्षणः अप्सुहोम्यश्च धौम्यश्च अणीमाण्डव्यकौशिकौ १२ दामोष्णीषस्त्रैबलिश्च पर्णादो घटजानुक
: मौञ्जायनो वायुभक्षः पाराशर्यश्च सारिकः १३ बलीवाकः सिनीवाकः सत्यपालः कृतश्रमः जातूकर्णः शिखावांश्च आलवः पा
रिजातकः १४ पर्वतश्च महाभागो मार्कण्डेयो महामुनिः पवित्रपाणिः सावर्णो भालुकिर्गालवस्तथा १५ जंघाबंधुश्च रैभ्यश्च कोपवे
गश्रवा भृगुः हरिबभ्रुश्च कौण्डिन्यो बभ्रुमाली सनातनः १६ काक्षीवानौशिजश्चैव नाचिकेतोऽथ गौतमः पैंगो वराहः शुनकः शांडिल्य
श्च महातपाः १७ कुक्कुरो वेणुजंघोऽथ कालापः कठ एव च मुनयो धर्मविद्वांसो धृतात्मानो जितेंद्रियाः १८

२२ कालकेयाःकालकायाअपत्यानिअसुराः २३ ३३ गौरवाजिनवाससः मृगचर्मपरीधानाः ३४ ३६ सप्तविंशतिश्चित्रसेनाद्यागंधर्वगणाः ३७

अ६

एतेचान्येचबहवोवेदवेदांगपारगाः उपासतेमहात्मानंसभायामृषिसत्तमाः १९ कथयंतः कथाः पुण्याधर्मज्ञाः शुचयोऽमला
ः तथैवक्षत्रियश्रेष्ठाधर्मराजमुपासते २० श्रीमान्महात्माधर्मात्मामुंजकेतुर्विवर्द्धनः संग्रामजिद्दुर्मुखश्चउग्रसेनश्चवीर्यवान्
२१ कक्षसेनःक्षितिपतिःक्षेमकश्चापराजितः कंबोजराजःकमठः कंपनश्चमहाबलः २२ सततंकंपयामासयवनानेकएवयः
ः बलपौरुषसंपन्नान्कृतास्त्रानमितौजसः २३ यथासुरान्कालकेयान्देवोवज्रधरस्तथा जटासुरोमद्रकानांचराजाकुंतिःपुलिं।
दश्चकिरातराजः तथांगवंगौसहपुंड्रकेणपांड्योड्रराजौचसहांध्रकेण २४ अंगोवंगःसुमित्रश्चशैब्यश्चामित्रकर्षणः ः किरातराजरा।
जः सुमनायवनाधिपतिस्तथा २५ चाणूरोदेवरातश्चभोजोभीमरथश्चयः श्रुतायुधश्चकालिंगोजयसेनश्चमागधः २६ सुकर्माचे।
कितानश्चपुरुश्चामित्रकर्षणः केतुमान्वसुदानश्चवैदेहोथकृतक्षणः २७ सुधर्माचानिरुद्धश्चश्रुतायुश्चमहाबलः अनूपरा
जोदुर्द्धर्षः क्रमजिच्चसुदर्शनः २८ शिशुपालःसहसुतःकरूषाधिपतिस्तथा वृष्णीनांचैवदुर्द्धर्षाःकुमारादेवरूपिणः २९ आ
हुकोविपृथुश्चैवगदःसारणएवच अक्रूरःकृतवर्माचसत्यकश्चशिनेःसुतः ३० भीष्मकोथाहृतिश्चैवद्युमत्सेनश्चवीर्यवान्
कैकेयाश्चमहेष्वासाःयज्ञसेनश्चसोमकिः ३१ केतुमान्वसुमांश्चैवकृतास्त्रश्चमहाबलः एतेचान्येचबहवःक्षत्रियामुख्यसं।
मताः ३२ उपासतेसभायांस्मकुंतीपुत्रंयुधिष्ठिरं अर्जुनंयेचसंश्रित्यराजपुत्रामहाबलाः ३३ अशिक्षंतधनुर्वेदंरौरवाजिनवास
सः तत्रैवशिक्षिताराजनकुमाराः वृष्णिनंदनाः ३४ रौक्मिणेयश्चसांबश्चयुयुधानश्चसात्यकिः सुधर्माचानिरुद्धश्चशैब्यश्च।
नरपुंगवः ३५ एतेचान्येचबहवोराजानःपृथिवीपते धनंजयसखाचात्रनित्यमास्तेस्मतुंबुरुः उपासतेमहात्मानमासीनंसप्तविंश।
तिः चित्रसेनःसहामात्योगंधर्वाप्सरसस्तथा ३७

स० साम्यंतालविशेषः शंपेसपिपाद:संपादक्षिशाहस्तगरहीततालविशेषः शंपादक्षिणपाणस्कवामेतालइतिस्मृतइत्युक्तेः समारोगीतवाद्यतालानांध्वनिसाम्यं। लयःद्रुत
मध्यविलंबितेस्थानेउरः शिरः कंठादि ३९ ४० सभापर्वणएकादशोध्यायः अथेति तत्रोपविष्टेष्विति अत्रनारदोयुधिष्ठिरंप्रश्नमुखेनराजधर्माननुशास्ति १ तत्रशास्तुः स्वरू
८ पंतावद्व्याचष्टे स्यापिकराणकतुल्यतामाभूदिति वेदोपनिषदांवेत्तेति वेदाः ऋग्यजुः सामाथर्वाणः उपनिषदोरहस्यविद्याः चतुर्विधाः तत्रकर्मांगावबद्धोपासनं उद्गीथावयवश्च
स्यमेधस्यशिरइत्यादिप्रागल्भ्यविहितं कर्मागोद्गीथआदित्येविराड्दृष्टिकरणं प्रतीकोपासनंअन्नंब्रह्मेत्युपासीतआदित्योब्रह्मेत्यादेशइत्यादिआदित्यादिमूर्तिषुब्रह्मदृष्टिकरणं अहंग्र

गीतवादित्रकुशलाः सम्यक्तालविशारदाः प्रमाणेथलयस्थानेकिन्नराः कृतनिश्रमाः ३८ संचोदितास्तुंबुरुणागंधर्वसहिता
स्तदा गायंतिदिव्यतानैस्तेयथान्यायंमनस्विनः ३९ पांडुपुत्रानृषींश्चैवरमयंतउपासते तस्यांसभायामासीनाः सुव्रताः सत्यसं
गराः दिवीवदेवाब्रह्माणंयुधिष्ठिरमुपासते ४० सभापर्वणि वैशंपायनउवाच अथतत्रोपविष्टेषुपांडवेषुमहात्मसु मह
त्सुचोपविष्टेषुगंधर्वेषुचभारत १ वेदोपनिषदांवेत्ताऋषिः सुरगणार्चितः इतिहासपुराणज्ञः पुराकल्पविशेषवित् २

होपासनंत्वंवाअहमस्मिभगवोदेवतेअहंवैत्वमसीतिव्यतिहारेणात्मनोदेवतायाश्चभेददर्शितंततं ज्ञानंब्रह्मात्मानुभवः वेदानांकर्मप्रतिपादकानांतदंतर्गतानामुपनिष राम०
दांचवेत्ता पाठतोर्थतश्चज्ञाता अतएवऋषिः गंतापफलंप्रतिवेदोक्तकृतस्यफलभागीकृतानुष्ठानत्वात् अतएवसुरगणार्चितः इतिहासपुराणेप्रसिद्धःपुराकल्पः वृद्धे ८
कर्तृकमन्वाख्यानंदेवासुराः संयत्ताआसन्नित्यादिकंवेदोक्तं विशेषः एककर्तृकमन्वाख्यानंपरकृत्याख्यंमहर्षिश्चंद्रोहैवैधसरेक्ष्वाकोराज्ञा पुत्रआसेत्यादितस्यवेत्ता
गवत्मात्मसक्षदर्शी २ २ २

न्यायः पंचांगमधिकरणं यथाविषयो विषयश्चैव पूर्वपक्षस्तथोत्तरः पक्षद्वयफलं चैव शास्त्रेऽधिकरणं विदुः अत्रप्रथमस्वरूं करेणीति वाक्यं विषयः तत्र षष्ठी प्रथमसंबंधी
ति कर्तव्यतालक्षणार्था उत यूपावयवलक्षणार्थेति संदेहो विशयः एतावेव पूर्वोत्तरपक्षौ ज्ञेयौ कल्पनालाघवानुग्रहादुत्तरः सिद्धांतः फलं त्वनुष्ठानभेदः पूर्वपक्षे
तल्लक्षणा शास्त्रीकरणादिना काष्ठांतरे यूपसदृशं निर्माणं सिद्धांते। एकदेशस्य पृथक्करणमात्रमिति निरूढमेवं पंचकं मोक्षधर्मे प्रक्रांतस्य सांख्यक्रमो चोमो निर्णयः संप्रयो
जनः पंचैतान्यनुजानीहि वाक्यमित्युक्तेनवुधेरिति स्वस्मगहनार्थत्वात् विषयः सांख्यएवमेवं वेति विचारः क्रमः अतिक्रमः सिद्धांतस्य पूर्वः पक्षस्तन्मध्ये निर्णयः सिद्धांतः प्र
योजनकफलमिति वाक्यं वाक्यार्थनिर्णयोपायः एवं पूर्वोत्तरमीमांसाधिकरणानि न्यायाः तद्विद्न। धर्मतत्त्वज्ञः मन्वादिप्रणीतशास्त्रतत्त्वज्ञः षडंगवित् शिक्षाकल्पो व्याक

न्यायविद्धर्मतत्त्वज्ञः षडंगविदनुत्तमः एकसंयोगनानात्वसम
वायविशारदः २ २ २ २ २

रणं छंदो विचितिर्निरुक्तं ज्योतिषमिति षड्वेदांगानि अनुत्तमः असुलभः एकसंयोगनानात्वसमवायविशारदः एकत्वादित्रयं सर्वेष्वपि शास्त्रेषु समानं यथा मी
मांसायां समिधो यजतीत्यादिप्रयाजाद्यंगवाक्यानां दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति महावाक्येनैकवाक्यत्वमैक्यं संयोगनानात्वं संयोगपृथक्त्वं यथा दध्ना जुहोती
ति वाक्यान्नित्यमपि दधि दध्नेन्द्रियकामस्येति वाक्यांतरेणेंद्रियार्थार्थमपि पृथग्विधीयते तेन नैद्यमपि युगपद्धा साध्यत इति समवायः एकस्मिन्कर्मण्यनेकेषां ध
र्माणां सन्निपातः यथा दर्शपूर्णमासात्मके एजस्येऽद्धारीनां दर्शादित्रिकद्वयस्यैव साक्षात्परमापूर्वजनकत्वेउपनिपातः नत्वंगानामिव परंपरमापूर्वोपकार

सु०

९

कत्वं यद्वानेमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेनेतिआत्मविविदिषोत्पादकापूर्वंवेदानुवचनादीनामेककार्यकारित्वलक्षणोमे
कः नन्वेककर्मांगत्वाभावेकथमेषामेकं अतआहसंयोगनानात्वेति स्वस्ववाक्योत्पन्नानांपृथक्फलानामप्येषांसंयोगपृथक्त्वन्यायेनविविदिषार्थत्वमपियुक्तमेवेत्यर्थ
ः नन्वेषांसमुच्चितानामेककार्यकारित्वसमुच्चयासंभवः राजसूयादीनांब्राह्मणाद्यनुपयोगित्वात् प्रत्येकंचेदितरवैयर्थ्यमित्याशंक्याहसमवायविशारददृशेति समवा
यः यथाधिकारंकर्मसंबंधः। अयमर्थः ब्राह्मणादीनांराजसूयादिष्वधिकाराभावात्तत्प्राप्तिः विविदिषायाः पापनिवृत्तिफलत्वेकेनित्यैरेवोपपत्तेर्नेनतदर्थंफलतोनिषिद्ध
नाश्यनाशीनांप्राप्तिः अतएवहेतुद्वयात्पवित्रेष्ट्यादिकंकाम्यमपिननिवार्यते नित्यानामपिनसर्वेषांसमुच्चयः विविदिषायादृष्टफलकत्वात् तस्मान्नसर्वकर्मस
मुच्चयोनापीतरवैयर्थ्यमितिएवंरूपएवसमुच्चयोत्रसमवायशब्दार्थः अस्मिन्नत्रैयविशारदः विवेकसमर्थः यद्वा एकंसाधर्म्यात्पृथिव्यादीनांद्रव्यत्वेनरूपेणसंयो
गनानात्वंचअसाधारणधर्मसंबंधः तेनपृथिवीत्वजलत्वादिरूपेणभेदेपि समवायः शरीरेपंचानामपिभूतानांमेलकः एतेषांतत्त्वसाधर्म्यवैधर्म्यसमाकारं चेत्ताद्दृकु
शलइत्यर्थः ३

राम०

९

नकेवलंशास्त्रमेववक्तुंकुशलोपितुवक्तुमित्याह वक्तेति वक्तापिसमानाधिकरणएवेत्याह प्रगल्भइति असंबद्धप्रलापीनेत्यर्थः यतः मेधावी ऊहापोहकुशलः तादृशोपिस्मृति
मान् अधीतंननाशितवानित्यर्थः नयवित्न्यायविभागादिव्यवहारवित् कविः अनागतदर्शी परावरविभागज्ञः ज्ञानकांडकर्मकांडयोः यथायोग्यंशिष्येषुविभजनं
तज्ज्ञः यतः प्रमाणकृतनिश्चयः प्रमाणंप्रत्यक्षानुमानागमादि तच्चद्विविधंलौकिकमलौकिकंच आद्यंघटवह्निस्वर्गादिविषयेद्वितीयंनिर्विशेषात्मवस्तुतत्त्ववि
षयं तथाहि अहंकारादिकमात्मनिसुषुप्तावदृष्टत्वान्मिथ्येतितत्रप्रत्यक्षंसुषुप्तौनिर्विशेषत्वं तथाद्रष्टृदृश्ययोरेकोपादानकौभास्यभासकत्वात्श्रोत्रशब्दवत्

वक्ताप्रगल्भोमेधावीस्मृतिमान्नयवित्कविः परावरविभा
गज्ञः प्रमाणकृतनिश्चयः ४ ॥ ॥

भास्यभासकौचद्रष्टृदृश्यौ तस्मादेकोपादानकौ यौनतथातौनैकोपादानकौ यथाशब्दघ्राणविनिर्व्यतिरेकतोवासाध्यसिद्धौस्तस्तां उपादानोपादेय
योरभेदात्द्रष्ट्रात्रवस्तुतत्त्वमितिसिद्ध्यति अनुमानादप्यात्मनोनिर्विशेषत्वंघटज्ञानंपटज्ञानमितिदृशिविशेषदर्शनादनुभवस्यघटाकाशादिवदौपाधिकत्वात्
तथाऽऽगमेपिआत्मनोनिर्विशेषत्वंप्रसिद्धं अस्थूलमनण्वनिर्गुणंनिष्क्रियमित्यादि ४ ॥ ॥ ॥

स० नन्वनुमानबलात्चंद्रमोदेशिकत्वप्रसक्षयजमानः प्रस्तरइत्यादिशास्त्रमप्यशिथिलीक्रियते अनुमानमर्पितरशिरः कपालं शुचिप्राणिअंगत्वात्शंखवदित्यादिकं नार
१० स्पृष्ट्वास्थिसस्नेहं सवासाजलमाविशेदित्यागमेन तथाचसर्वमपिप्रमाणांसंशयमनस्तत्रकृतनिश्चयत्वंद्रूपेणमित्याशंक्याह पंचावयवयुक्तस्यवाक्यस्यगुणदोष
वित् तत्रपरंबोधयितुंप्रवृत्तस्यानुमानवाक्यप्रतिज्ञाद्यः पंचावयवाः तत्रपर्वतोवह्निमानितिप्रतिज्ञा धूमादितिहेतुः यथामहानसइतिदृष्टांतउदाहरणं। धूमवांश्चा
यंइत्युपनयः तस्माद्वह्निमानितिनिगमनं अस्मिन्वाक्येगुणोनुकूलतर्कः यदिवह्निमान्नस्यात्तर्हि धूमवानपिनस्यात् दोषः इदोवह्निमानित्यादाविवाश्रया
सिद्ध्यादिः तावुभौवेत्तीतितथा तथाचानुमानंप्रसक्षागमौविशिथिलीकरोतु। ब्रीहिमस्तपर्णोशुचित्वविभागस्यशास्त्रैकगम्यत्वात्तत्रानुकूलतर्काभावएवानुमान

पंचावयवयुक्तस्यवाक्यस्यगुणदोषवित् उत्तरोत्तरवक्ताचवदतोपिबृहस्पतेः ५ धर्मकामार्थमोक्षेषुय
थावत्कृतनिश्चयः तथाभुवनकोशस्यसर्वस्यास्यमहामतिः प्रत्यक्षदर्शीलोकस्यतिर्यगूर्ध्वमधस्तथा ६

वाधकोनत्वागमः इतिस्थितं तथाचलौकिकप्रमाणाधिकारिणो अपरंकर्मकांडमेवविभजतेइतरस्यइतरदितिविवेकः ५ यथावत्कृतनिश्चयः लौकिकानांप्रमाणानां
प्रामाण्यमादाय धर्मार्थकामानांपुरुषार्थत्वनिश्चयः इतरेषांप्रामाण्यमुपजीव्यमप्युपरधमोक्षस्यपुरुषार्थत्वनिश्चयः तदालौकिकप्रमाणावाधात् वेदाश्चवेदाउ राम०
तिष्ठते: लौकिकंतद्दृष्टेवंप्रमाणत्वात्मनिश्चयादिस्यभियुक्तोक्तेश्च आत्मनिश्चयाद्वेगवेतिशेषः आत्मनिश्चयादितिविच्छेदः महामतिः आत्मनोवाश्रेरदृष्टे १०
नेनमस्याविज्ञातेनेदंसर्वंविदितमितितस्येवसार्वज्ञ्यश्रुतेः ६ ॥ ५ ७ ७ आत्मतुः १ ७

सांख्ययोगविभागज्ञः सांख्यं वेदान्तविचारः योगश्चित्तवृत्तिनिरोधः अनयोर्विभागः उपयोगः तत्र श्रवणात्मको वाक्यार्थविचारः प्रमाणगतासंभावनानिवृत्त्युपयोगी मनननामा श्रुतस्यार्थ
स्य तर्केणानुसंधानरूपो विचारः प्रमेयगतासंभावनानिवृत्त्युपयोगी अद्वैतमेव वेदो वदति युक्तियुक्तं चैतदेवेति सांख्यविभागः निदिध्यासनापरपर्यायो योगः अनात्मसु देहादिष्वात्मभाव
रूपां विपरीतभावनां निवर्त्य ज्ञातृज्ञानज्ञेयाभाववत्तया आत्मन्येव चित्तवृत्तिं स्थापयतीति योगविभागः यत्तु द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्ष
णमिति वासिष्ठवचनमुदाहृत्य चित्तनाशाख्यात्मदर्शनस्य द्वावुपायाविति वदन्ति तेषां तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतिविरोधः संवादिभ्रमवद्योगोपि ज्ञा
नजननद्वारैव फलदः इति च तस्यापसर्जनत्वं कर्मणामिव स्यात्तथा च नोपायान्तरं योगः स्यादिति वासिष्ठवाक्यं तु क्रमभेदमाह न तूपायभेदं तथा च ऋतेऽपि योगं गौणः सर्जनं वाक्य
र्थज्ञानं प्रधानं श्रुतेनोपात्तिफलज्ञानमुपसर्जनं योगः प्रधानं यथा दृष्टे गोपिण्डस्यापि अग्रहीतशब्दार्थसंगतिकस्य अयं गौरितिवाक्यमेव वाज्ञानं तु न चक्षुः तेन विषयीकृतेपि गो

सांख्ययोगविभागज्ञैर्निर्विवित्सुः सुरासुरान् ६ ॥

पिण्डे गोत्वबुभुत्सानुवृत्तेः एवं साक्षात्कृतं त्वंपदार्थस्यापि तत्त्वमसीतिवाक्यमेव संसारानर्थमूलब्रह्माज्ञानस्य निवर्तकं न मनः तेन दृष्टेपि त्वमर्थे ब्रह्माज्ञानानुवृत्तिदर्शनात् एवं साक्षा
दिमतीगौरितिलक्षणतो ज्ञातगोपदार्थस्यापि गोपिण्डदर्शनमेव गोत्वबुभुत्सानिवर्तकं न तु वाक्यं तथा श्रवणादिनानुवृत्तिज्ञातब्रह्मपदार्थस्यापि योगादेव दर्शनं न तु वाक्यात् तेनं तं
त्वौपनिषदं पुरुषं पृच्छामीति मनसैवानुद्रष्टव्यमिति च शब्दमनसोः ज्ञानकरणत्वानुवादकश्रुत्योरव्यवस्था सिद्धेति। तदिदमुक्तं सांख्ययोगविभागज्ञ इति विभागो हि द्वयोः समु
च्चितैककार्यकारित्वे सति संभवति न तु व्रीहियववद्विकल्पैककार्यकारित्वे इत्यास्तां तावत् सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिता इत्यत्र प्रपञ्चयिष्यमाणत्वात् एवं ब्राह्म्या विद्यया
संपन्नत्वमुक्त्वा राजयोग्यविद्यान्तरसंपत्तिमप्याह निर्विवित्सुः सुरासुरानित्यादिना निर्विवित्सुः विवित्सुर्विचारं कर्तुमिच्छुः निर्विवित्सुस्तद्विरोधी उभयेषामधीप्रेमाचरणेन कलहप्र
वर्तकः यद्वा निर्वेदोपुद्रादुपरतिं कर्तुमिच्छुः लोकनाशभयादित्यर्थः एतेन भेदनीतिज्ञत्वमुक्तं ६ ६ ७ ७ ७

स० ११

संधिः साम विग्रहो निग्रहो दण्ड इत्यर्थः। अनुमानविभागवित्। स्वपरशक्तिबलाबलैः अनुमानेनानिश्चितस्य विभागं विभजनं परामात्यादिभ्यो धनप्रदानं तद्वित् तस्यानुमाय विभागविदिति गोविन्दराजः पठति। एवं च नीतिशास्त्रप्रसिद्धोपायचतुष्टयाभिज्ञत्वमुक्तं षाड्गुण्यविधियुक्तश्च षड्गुणाः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः। त एव षाड्गुण्यं। स्वार्थे ष्यञ्। तस्य विधिः अनुष्ठानं तत्प्रयोगे तेन युक्तः सर्वदा विजिगीषुः षाड्गुण्यादिकमुपदिशन्ति स्वस्मिन् शत्रुत्वस्याधिकारिकत्वात् तत्र संधिविग्रहो प्रत्येकं द्विविधौ प्रबलदुर्बलयोर्वि जिगीषावतोः समभूमौ युद्धप्रसंगे क्रोधो विग्रहमिच्छति तदेवैनं च परः संधिमिच्छति दानेनेति। तयोरेव दुर्बलोः भेदे दुर्गाश्रितश्चेद्बलवतापि सह देशाद्युत्पादनादिना विग्रहमिच्छति शत्रुस्तेन सहाल्पकरग्रहेणापि संधिमेवेच्छति तथा च दुर्बलहारकौ संधिविग्रहावन्यो प्रबलहारकावन्यौ। तदिदमुक्तं रामायणे द्वियोनी संधिविग्रहाविति तत्र प्रब

संधिविग्रहतत्त्वज्ञस्त्वनुमानविभागवित् षाड्गुण्यविधिषु
ज्ञश्च सर्वशास्त्रविशारदः ॥ ॥

लयोर्निर्विग्रहः यानासनयोः प्रयोजकः दुर्बलयोर्निः संधिद्वैधीभावसमाश्रययोः यथोक्तं कामन्दकीये संधेश्च विग्रहस्यापि द्वैगुण्यं संप्रचक्षते यानासनेन विग्रहस्वरूपं संधे
: पंचद्वयमिति द्वैगुण्यमेतौ यस्य स द्विगुणः सच सर्वनीतियोर्भावो द्वैगुण्यं तत्र यानं विजिगीषोरारिं प्रतियात्रा आसनं कदाचिच्छक्तिप्रतिबंधे च तत्रैव शत्रोर्दुर्गे आविश्य तत्र
धान्यादिप्रवेशनं प्रतिबध्नतः स्थानं बलवता विग्रहे बलवत्तरेण तच्छत्रुणा संधिं कृत्वा उभयत्र दासोस्मीति वाचैवात्मसमर्पणं कर्तव्यं न कर्मणेति स द्वैधीभावः यथोक्तं तत्रैव
बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् द्वैधीभावेन वर्तेत काकाक्षिवदलक्षित इति अरिणापीड्यमानस्य बलवद्दुर्गभूपालाद्याश्रयणं समाश्रयः एवं चोपायान्तर्गतौ संधिविग्रहावन्यौ षाड्गुण्यान्तर्गतौ चान्याविति न पुनरुक्तिः

रा० ११

गुह्यगांधर्वसेवी तदुभयप्रियइत्यर्थः सर्वत्रसर्वासुविद्यासुसेवेषुकर्मसुचअप्रतिघः अप्रतिहतः पूर्णशक्तित्वात् अन्यैः असंगत्वकारुण्यादिभिः मुनिः आत्मतत्वानुसंधान
वान् ८ आगमत् आगतवान् ९ १० आर्चयत् पूजितवान् ११ १५ कच्चिदर्थाश्चकल्पंतेइतिकच्चिदिति कामप्रवेदने स्वाभिप्रायाविष्करणे। त्वदीयाअर्थाः स्वका

गुह्यगांधर्वसेवीचसर्वत्राप्रतिघस्तथा एतैश्चान्यैश्चबहुभिर्युक्तोगुणगणैर्मुनिः ८ लोकाननुचरन्सर्वानागमत्तांसभांनृप ना
रदः सुमहातेजाऋषिभिः सहितस्तदा ९ पारिजातेनराजेंद्रपर्वतेनचधीमता सुमुखेनचसौम्येनदेवर्षिरमितद्युतिः १० सभा
स्थान्पांडवान्द्रष्टुंप्रीयमाणोमनोजवः जयाशीर्भिस्तुतंविप्रोधर्मराजानमार्चयत् ११ तमागतमृषिंदृष्ट्वानारदंसर्वधर्मवित् स
हसापांडवश्रेष्ठः प्रत्युत्थायानुजैः सह १२ अभ्यवादयतप्रीत्याविनयावनतस्तदा तदर्हमासनंतस्मैसंप्रदाययथाविधि १३
गांचैवमधुपर्कंचसंप्रदायार्घ्यमेवच अर्चयामासरत्नैश्चसर्वकामैश्चधर्मवित् १४ तुतोषचयथावच्चपूजांप्राप्ययुधिष्ठिरात्
सोर्चितः पांडवैः सर्वैर्महर्षिर्वेदपारगः धर्मकामार्थसंयुक्तंपप्रच्छेदंयुधिष्ठिरं १५ नारदउवाच कच्चिदर्थाश्चकल्पंतेधर्मेच
रमतेमनः सुखानिचानुभूयंतेमनश्चनविहन्यते १६ ॥ ॥ ॥ ॥

र्थयागदानकुटुंबभरणादौसमर्थाभवंतीतिममाभिप्रायइत्यर्थः एवंकरिष्यामीतिपृष्ठेनतदुक्तमित्यंतेराज्ञांगीकृतत्वादुपदेशपरोयंग्रंथइत्यवसीयते अर्थधर्मकाममोक्षान्
त्वदीयानत्रविहतानिच्छामीतिक्रमेणपादचतुष्टयार्थः कच्चिदितिसर्वत्रसंबंधनीयं। तत्रापिमनश्चअंतरात्मनिप्रणिधीयमानंनप्रतिहन्यतेवृत्त्यंतरैरितित्यपादार्थः १६

रा० त्रिषुउत्तमाधममध्यमेषु।कच्चित्सुरोहितानित्रिषुधर्मेणासहितांवृत्तिंनिर्वर्त्तसे दंड्यदंड्यादिषुअर्थेनसहितांप्रजासुपालनरूपाग्रहणाभ्यांधर्मार्थसहितामितिविवेकः धर्मार्थौचधर्मा
१२ र्थौचेतिद्वंद्वैकशेषः तैः सहितामितिसमासः १७ कच्चिदर्थेनेति अर्थलोभाद्धर्मबाधोनीचानांधर्मलोभादर्थबाधोविरक्तानां कामेनप्रीतिसारेणतात्कालिकसुखाभासप्रदर्श
नवलेनमोहयता धर्मार्थयोर्बाधः कामुकानांप्रसक्तः त्वपिराज्यप्रतिकूलानांनीचत्वविरक्तत्वकामुकत्वानामभावमिच्छामीत्यर्थः १८ परस्परविरोधिनामेषांकथमेकेनानुष्ठान

कच्चिदाचरितांपूर्वैर्नरेंद्रपितामहैः वर्त्तसेवृत्तिमक्षुद्रांधर्मार्थसहितांत्रिषु १७ कच्चिदर्थेनवाधर्ममधर्मेणार्थमथापिवा
उभौवाप्रीतिसारेणनकामेनप्रबाधसे १८ कच्चिदर्थंचधर्मंचकामंचजयतांवर विभज्यकालेकालज्ञः समंवरदसेवसे
१९

मित्याशंक्यकालभेदेनेत्याह कच्चिदर्थमिति पूर्वाह्णेवाचरेद्धर्ममध्याह्नेर्थमुपार्जयेत् सायाह्नेचाचरेत्कामनित्येषावैदिकीश्रुतिरितिदक्षोक्तकालव्यवस्थामास्थायत्रि
वर्गंसेवसेइत्यर्थः सदाचरेदितिसंबाधनेनपरानुग्रहरूपोधर्मः सर्वस्मिन्नपिकालेकार्यइतिसूचयितुंसममितिपाठेत्रैवर्ग्यमेनत्र्यात्मसाम्येनेत्यर्थः १९ रा०
१२

कच्चिद्राजेति। षड्गुणाः वक्ता प्रगल्भो मेधावी स्मृतिमान्नयवित्कविरिति नारदस्मृतौ स्मृतिनाः वक्तृत्वादयः अत्र राजगुरोः षुवक्तृत्वं वाग्मितामात्यादिषु यथा नागपंकार्योपदेशकौशलं। प्रागल्भ्यं शत्रुदमनादौ उत्कर्षप्रदर्शनं मेधावित्वं तर्ककौशलं स्मृतिमान् कविरिति च अतीतानागतयोः परामर्शित्वं नयविदिति नीतिशास्त्रवित्वं एतैः राजगुणैः रूपायान्बलाबलं अम्पोश्चतुर्दशीत्वं परीक्षसे इति योजना। हे अनघ चतुर्दशभीः राजदोषैर्वर्जितानां नेचवक्ष्यते नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रतां। अदर्शनं ज्ञानवतामालस्यं पञ्चवृत्तितां एकचिंतनमर्थानामनर्थज्ञैश्च चिंतनं निश्चितानामनारंभं मंत्रस्यापरिरक्षणं मंगलाद्यप्रयोगं च प्रत्युत्थानं च सर्वशः कच्चित्त्वं वर्जयस्येतान् राजदोषांश्चतुर्दशेति नास्तिकं परलोकापलापः प्रमादो ऽनवधानता दीर्घसूत्रता चिरक्रियत्वं पंचेंद्रियपरवशता अर्थानां प्रयोजनानां एकचिंतनं। एकेनैव चिंतनं अनर्थज्ञैः विपरीतार्थदर्शिभिः सह चिंतनं मंत्रः मंगलं उत्सवः आदिपदाद्देवपूजादि तस्याप्रयोजनमननुष्ठानं प्रत्युत्थानं च सर्वतः युगपत्सर्वदिग्व्यवस्थितशत्रूद्देशेन दंडयात्रेति तदर्थः यद्वा अघं पराजयस्तं विंशतिवर्गस्तद्रहितो सचकामंदकीये उक्तः। बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमा

कच्चिद्राजगुणैः षड्भिः सप्तोपायांस्तथानघ बलाबलेन सम्यक्त्वं चतुर्दश समीक्षसे २० ॥

न्। अनेकचित्तमंत्रश्च देवब्राह्मणनिंदकः दैवोपहतकश्चैव दैवचिंतक एव च दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः अदेशस्थो बहुरिपुर्युक्तो ऽकालेन यश्च सः। सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी एतैः संधिं न कुर्वीत विगृह्णीयात्तु केवलमिति उपायाः सप्त साम दान भेद दंड मंत्रौषध इंद्रजालाख्याः बलाबले स्वपरपक्षयोः साम्यं परस्य हीनता स्वस्य वा हीनतेति त्रिविधं यथायोगं बुद्ध्यादिभिः सामादयः परीक्षणीयाः किमनेन शत्रुणा साम कर्तव्यं न वा कं नु मारयेच्चेत् सिद्धिर्न वा सिद्धं चेदं तेन कुशलेन वेति। चारप्रचारणादिना च बलाबलं प्रमाणिकं परीक्षणीयं। तथा चतुर्दशदशाख्यापि परीक्षणीयाः तेच नीतिशास्त्रोक्ताः देशो दुर्गं रथा हस्तिवाजियोधाधिकारिणः अंतःपुरात्र गणना धान्यलेख्यधना सवाः परीक्षास्थि पास्तेषां चतुर्दश नरेश्वरैरिति योधाः शूराः अधिकारिणः देशपालदुर्गपालसेनापत्यादयः गणनान्यश्वारथधनसंख्या। लेख्यं आयव्ययनिर्णयाय सर्वस्य पत्रारोहकरणं। धनं पर्याप्तमपर्याप्तं चेति विचार्यं आसवाः मद्यवदपकारिणः प्रच्छन्नशत्रवः। असवरद्दति पाठे बलमित्यर्थः बलाबलेन सम्यक्त्वमिति पाठे स्वीयं परकीयं च देशादिकं उक्तविरोधेन बलाबलेन बुद्ध्या चौरैश्च परीक्षणीयमित्यर्थः २० ॥ ॥ ॥

टीका२

स० एतदेवाह कच्चिदात्मानमिति आत्मानं प्रबलं परान् दुर्बलांश्च परीक्ष्य सेवसे राज्यं तथा विपरीते जयमूलस्य कोशस्य वृद्ध्ये संधाय परैः सह साम कृत्वाऽष्टौ कर्म्माणि कृषिर्व
णिक्पथो दुर्गसेतुः कुंजरबंधनं खन्याकरादानं शून्यानां च निवेशनं। अष्टौ संधानकर्म्माणि प्रयुक्तानि मनीषिभिरिति नीतिशास्त्रोक्तानि सेवसे कुंजरबंधनं वकुभक्ष
१३ कत्वा तेषां यथाविभागं ग्रामीणधनैरेव ग्रामे ग्रामे पोषणार्थं बंधनं। खनिः रत्नाकरस्तन्निस्थानं आकरः सुवर्णादयस्तन्निस्थानमिति भेदः खननमात्रेण धमनादि
नाऽभिमुखीकरणेन च तयोस्तल्लाभहेतुत्वात् २१ कृष्यादिनापि कोशवृद्धिः स्वाम्यादिप्रकृतिसप्तकस्य परैः सेनादिना मोहने कृते सति न भवतीत्यत आह कच्चित्प्रकृ
तय इति सप्त स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च राज्यांगानि प्रकृतयः पौरजानपदा अपि चेति कोशोक्ताः।। तत्र स्वामि नृपः प्रकृतिः सप्तविधा दुर्गाध्यक्षो बला

कच्चिदात्मानमन्वीक्ष्य परांश्च जयतां वर तथा संधाय कर्म्माणि अष्टौ भारत सेवसे २१ कच्चित्प्रकृतयः
सर्वानलुब्धा भरतर्षभ आढ्यास्तथाव्यसनिनस्त्वनुरक्ताश्च सर्वशः २२ ।। ।। ।।

ध्यक्षो धर्म्माध्यक्षश्च भूपतिः पुरोधा वैद्यदैवज्ञः सप्त प्रकृतयः स्मृता इति प्रोक्ताः बलाध्यक्षः बलस्य चतुरंगस्याहारादिदानेन पालकः चमूपतिर्युद्धचर्यः प्रणेता ध
र्मः कार्य्यमात्रे अमात्यः मंत्री सुहृत्तमायामायविभागकर्ता पर्षद्भूपः एतेन तावका लुब्धाः परैर्मोहिता माभूवन् लुब्धत्वे मोहनार्थस्यैदंरूप्यं लुब्धाश्च दुर्गादीनामेव राम०
नाशापत्तिरित्यर्थः अथवा त एवाढ्याः संतो व्यसनिनः धूमपानादिरताः माभूवन् दुष्टो ह्यपतिर्दृष्टो धर्ममतिक्रामति धर्मातिक्रमात्पापकरणेनाति तस्मान्नेऽरक्तिश्चा
व्यसनव्यसनप्रसक्तिस्तदापि न कोशादीनां वृद्धिः स्यात् कथं तर्हि स्युः सर्वप्रकारैः स्वानुरक्ताः अस्मत्स्वामिकार्ये प्रीतिमंतः २२ २२ २२ २२ १३

दुर्गाध्यक्षादीनां लोभेन विपरीतकार्यकारित्वेन नाशहेतुत्वं प्रसिद्धं। अमात्यसुहृदां तु लोभेन कथं नाशहेतुत्वमित्याशंक्य मंत्रभेदेनेत्याह कच्चिन्नेत्यादिना अपरिशंकिता
:येषु दोषस्य शंका नास्ति तैः कृतकैः कृत्रिमैः सुहृद्भूतैर्दूतैः उभयवेतनैः त्वया मंत्रितं मंत्रः न भिद्यते न प्रकाश्यते कच्चित् तैर्कैर्दूतैर्वेति पाठे सम्यगपि मंत्रितं कुयुक्तिभिर्न विज्ञा
यत इत्यर्थः त्वत्तो वा कृतकमित्रप्रतिकथयतः अमात्यैर्वा कृतकैः मंत्रितं भिद्यत इति सर्वत्र संबध्यनीयं २३ मित्रेति मित्रं सम्यक् परीक्ष्य तेन सह संमंत्र्य बलवा
न् शत्रुणा संधिं दुर्बलेन सह विग्रहं मध्यमेन उभयवेतनेन उदासीनेन राज्ञा च सह वृत्तिसाम्येन स्थितिं च कुर्या इति सार्धश्लोकार्थः तत्र मित्रं केर्गुणैः परीक्षितेत्यत

कच्चिन्न कृतकैर्दूतैर्ये चाप्यपरिशंकिताः त्वत्तो वा तव वामात्यैर्भिद्यते मंत्रितं तथा २३ मित्रोदासीनशत्रूणां कच्चिद्वेत्सि चि
कीर्षितं कच्चित्संधिं यथाकालं विग्रहं चोपसेवसे २४ कच्चिद्वृत्तिमुदासीने मध्यमे चानुमन्यसे कच्चिदात्मसमा हृद्याः सुहृदः
संबोधनक्षमाः २५ कुलीनाश्चानुरक्ताश्च कृतास्ते वीर मंत्रिणः विजयो मंत्रमूलो हि राज्ञो भवति भारत २६ कच्चित्संवृ
तमंत्रैस्तैरमात्यैः शास्त्रकोविदैः राष्ट्रं सुरक्षितं तात शत्रुभिर्न विलुप्यते २७ कच्चिन्निद्रावशं नैषि कच्चित्काले विबुध्य
से कच्चिच्चापररात्रेषु चिंतयस्यर्थमर्थवित् २८ २८ ॥ ॥ ॥

आह कच्चिदात्मसमा इति शुद्धाचारत्वं कुलीनत्वं चैर्नैर्मल्यस्य साधारणं लिंगं शुद्धाः संबोधनक्षमा इत्यत्र शुचयो जीवितक्षमा इति पाठे आपन्नस्य राज्ञ उज्जीवने
क्षमा इत्यर्थः २५ किमेवंविधैर्मंत्रिभिरत आह हि यतो मंत्रमूलो विजय इति २६ मंत्रभेदो मा भूदित्युक्तं तत्फलमाह कच्चित्संवृतेति २७ कच्चिन्निद्रेति यथाका
लं स्वप्नप्रबोधवता ब्राह्मे मुहूर्ते मात्यादिभिः सह कृतस्य मंत्रस्य पर्यालोचनं कर्तव्यं ब्राह्मे मुहूर्ते वा त्वयायं चिंतनीयं आत्मनो हितमिति स्मृतेस्तदा निर्णीतोऽर्थो
न विप्लवत इत्यवसायात् २८

रा०
९४

कच्चिन्मंत्रैति षड्गुणाभिधेतेमंत्रइतिप्रसिद्धेर्द्वाभ्यामेवमंत्रयितव्यमित्यर्थः मंत्रभेदेनकर्त्तव्यइत्युक्तंतदुपसंहरतिकच्चित्त्वइति १९ स्वाम्यमात्यादिप्रकृतिसमकानु
ग्रहात्कृष्यादिकर्माष्टकसिद्धिः ततश्चकोशवृद्धिरित्युक्तं तदनुवदतिविशेषविधानार्थं कच्चिदर्थमिति अर्थान्अर्थप्राप्त्युपायान्लघुमूलानल्पव्य
यसाध्यान्महोदयान्प्रचुरफलात् तादृशान्कृष्याद्यारंभकर्त्तृन्त्वान् वैश्यादीनन्येभ्योपिकराद्दानेनकोशवृद्धिरेवभवतीतिभावः ३० कच्चित्सर्वेइति क
र्माणःअंत्येतेवध्यंतइतिकर्मान्ताः कृष्यादिकर्मवद्गाः कृषीवलाद्यः कच्चित्तेपरोक्षासाक्षात्अज्ञाताविसंति। अथवाविशंकितास्त्रविश्वास्याः नसंति
अथवापुनरुत्सृष्टाः पुनः पुनस्त्वाक्षेपान्नाः संसृष्टंस्नेहः संसृष्टेत्रिषुसंगतेदर्शनेमदिनी चिरपरिग्रहात्ज्ञाताः विश्वास्याः स्निग्धाः अकर्मकराश्च

कच्चिन्मंत्रयसेनैकः कच्चिन्नबहुभिः सह कच्चित्तेमंत्रितोमंत्रोनराष्ट्रंपरिधावति १९ कच्चिदर्थंविनिश्चित्यलघुमूला
न्महोदयान् क्षिप्रमारभसेकर्तुंनविघ्नयसितादृशान् ३० कच्चिन्नसर्वेकर्मान्ताः परोक्षास्तेविशंकिताः सर्वेवापुनरु
त्सृष्टाः संसृष्टंचात्रकारणं ३१ आसंस्तेबुद्ध्याःकर्मिकैस्तेचकच्चिदनुष्ठिताः कच्चिदज्ञानन्कृतान्येवकृतरूपाणिवापु
नः ३१ विदुस्तेवीरकर्माणिनानवाप्तानिकानिचित् कच्चित्कारुणिकाधर्मेसर्वशास्त्रेषुकोविदाः कारयंतिकुमारां
श्चयोधमुख्यांश्चसर्वशः ३३

त्वमहोदयेकर्मणिकारणाउदयनिमित्तं ज्ञात्वातादृशानेवसंगृहीतायादित्यर्थः ३१ एतदेवाहुर्नाप्रेरितिति कर्मिकैः दृढकर्मागतैः तेचकृष्यादयश्च
कच्चिदितिमित्रगुप्तिवत्कर्मगुप्तिरप्यकर्त्तव्येत्यर्थः ३१ अनवाप्तानिअनारब्धानिनविदुः कच्चिदितिआदृत्यायोज्यं कोशवृद्ध्युपायमुक्त्वाबलवृ
द्ध्युपायमाहकच्चित्कारणिकाइति कारणंज्ञापनंशिष्येभ्योविद्याप्रतिपादनंतदर्थंचरंतितिकारणिकाः कृपद्रोणसदृशाआचार्याः कारयंतिशिक्ष
यंति ३३ ३३ ३३ राम०
९४

सुहृद्दुर्गामात्यसंपदं क्रमेण त्रिभिराह कच्चित्सहस्रैरित्यादिभिः अर्थकृच्छ्रेषु प्रयोजनसंकटेषु निःश्रेयसं कल्याणं ३४ ३६ षष्ठीं राष्ट्रसंपदमाह कच्चिदष्टादशान्येष्विति
तीर्थानि मंत्रिप्रभृतीन्यष्टादश यान्यवगाह्य राजा कृतकृत्यो भवति तानि चोक्तानि नीतिशास्त्रे मंत्री पुरोहितश्चैव युवराजश्च भूपतिः पंचमो द्वारपालश्च षष्ठोंतर्वंशिकस्तथा
१ कारागाराधिकारी च द्रव्यसंचयकृत्तथा। कृत्याकृत्येषु चार्थानां नवमो विनियोजकः २ प्रदेष्टा नगराध्यक्षः कार्यनिर्माणकृत्तथा धर्माध्यक्षः सभाध्यक्षो दंडपालस्त्रि
पंचमः ३ षोडशो दुर्गपालश्च तथा राष्ट्रांतपालकः। अटवीपालकांतानि तीर्थान्यष्टादशैव तु ४ चारान्विचारयेत्तीर्थेष्वात्मनश्च परस्य च पाखंडादीनविज्ञातानन्य

कच्चित्सहस्रैर्मूर्खाणामेकमिच्छसि पंडितं पंडितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं परं ३४ कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधो
दकैः यंत्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ३५ एकोप्यमात्यो मेधावी शूरो दांतो विचक्षणः राजानं राजपुत्रं वा प्रापयेन्मह
तीं श्रियं ३६ कच्चिदष्टादशान्येषु स्वपक्षे दश पंच च त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ३७ ॥

न्योन्यमितरेष्वपि ५ मंत्रिणं युवराजं च हित्वा स्वेषु पुरोहितमिति एवं तीर्थशब्दवाच्येष्वहलायुधः योनौ जलावतारे च मंत्र्याद्यष्टादशस्वपि पुण्यक्षेत्रे तथा पात्रे तीर्थं स्या
द्दर्शनेष्वपीति परेषामष्टादशसु स्वस्य मंत्रिपुरोहितयुवराजैर्विना पंचदशसु च तीर्थेषु चारान् त्रिभिः परस्परं चाविज्ञातान् त्रीं त्रीन् प्रयुज्य तत्तन्मार्गाद्वार्त्तां सर्वचारसंवादेन तथ्यां जा
नीयात् ज्ञात्वा च स्वप्रजानामनुरंजनेन परप्रजानां दुःखितानामभयप्रदानादिना स्वाकर्षणेन च स्वराष्ट्रं वर्द्धयेदिति सुक्तं भवति ३७ ३० ॥

जयर

स० शूरैर्वाक्यानां गोप्तारस्तमिनं संपदं विवक्षुः मुख्यस्वामिसंपदं तावदाह कच्चिद्द्विषामिति अविदितः परैः किं करैः प्रतिपन्नः सावधानः प्रतिपन्नः इति पाठे प्रतीकारे यत्नवा
न्नित्ययुक्तः नित्योद्योगी ३८ विनयसंपन्नः शिक्षायुक्तः। कुलपुत्रः सत्कुलजः अनसूयुः परगुणेषु दोषारोपमकुर्वन् अनुप्रष्टा शास्त्रचर्चाकुशलः असंकीर्ण
१५

कच्चिद्द्विषामविदितः प्रतिपन्नश्च सर्वदा नित्ययुक्तो रिपून्सर्वान्वीक्षसे रिपुसूदन ३८ कच्चिद्विनयसंपन्नः कुलपुत्रो बहुश्रुतः
अनसूयुरसंकीर्णः सत्कृतस्ते पुरोहितः ३९ कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः हुतं च होष्यमाणं च काले वेदयते स
दा ४० कच्चिद्देगेषु निष्णातो ज्योतिषः प्रतिपादकः उत्पातेषु च सर्वेषु दैवज्ञः कुशलस्तव ४१ कच्चिन्मुख्या महत्स्वेव
मध्यमेषु च मध्यमाः जघन्याश्च जघन्येषु भृत्याः कर्मसु योजिताः ४२ अमात्यानुपधातीतान्पितृपैतामहान् शुचीन्
श्रेष्ठाञ्छ्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्म्मसु ४३ कच्चिन्नोग्रेण दण्डेन भृशमुद्वेजितप्रजाः राष्ट्रं तवानुशासन्ति मंत्रिणो भ
रतर्षभ ४४ ४४ ५

इति पाठे सदसद्विवेकवान् ३९ ऋजुरकुटिलः ४० अंगेषु शास्त्रसुद्दिक्शास्त्रोक्तरीत्यांगानां परीक्षायां उत्पातेषु दिव्यभौमशारीरेषु धूमकेतुभूकंपवामनेत्रस्फु राम०
रणादिषु आगामिशुभसूचकेषु ४१ सेनापत्याकरकोशाध्यक्षरूप्याधेश्वराणि निमुख्यमध्यमनीचानि ४२ उपधातीतान् छलरहितान् श्रेष्ठेषु मंत्रकार्येषु १५
४३ ४४ ॥

पतितमितिव्यतिरेकदृष्टान्तः नावजानन्तिनावमन्यन्तेतत्रहेतुः उग्रप्रतिग्रहीतारं उग्रमितिक्रियाविशेषणं यद्वा उग्रंहिंसकंकर्मतेनप्रतिग्रहीतारंधनस्य प्रजापीडकमित्यर्थः
यथोक्तंप्रजापीडनसंतापात्समुद्भूतोमहानिलः राज्ञःप्राणान्बलंकोशंनादग्ध्वाविनिवर्ततइति तथाचलोकशेहेतुमेकाशिताः अवज्ञैवउचिताः तस्त्वयातन्नकर्तव्यमि
त्यर्थः कामयानंकामतोयानेनपर्यटनंयस्यतंस्वैरिणमिवअशक्तादरतिप्रदत्वाद्यस्त्रियोवमन्यन्तेतद्वत् ४५ तुष्टोधनमानादिना ४६ धृष्टावदान्ताः प्रगल्भाःनिःकप
टाश्चअतएवविक्रान्ताजयेकृतयत्नाः एवंगुणास्वामिसंपद्युक्तानद्धिहेतुमाहत्वयासत्कृत्यमानिताइत्यादिना ४७ भक्तंअहरहर्देयंधान्यादिवतनंमासान्तेदेयंवित्तं

कच्चित्त्वांनावजानन्तियाजकाः पतितंयथा उग्रप्रतिग्रहीतारंकामयानमिवस्त्रियः ४५ कच्चिद्धृष्टश्चशूरश्चमतिमान्धृतिमाञ्छुचिः
कुलीनश्चानुरक्तश्चदक्षः सेनापतिस्तव ४६ कच्चिद्बलस्यतेमुख्याः सर्वयुद्धविशारदाः धृष्टावदानाविक्रान्तास्त्वयासत्कृत्यमानिता
ः ४७ कच्चिद्बलस्यभक्तंचवेतनंचयथोचितं संप्राप्तकालेदातव्यंददासिनविकर्षसि ४८ कालातिक्रमणाद्ध्येभक्तवेतनयोर्भृता
भर्तुः कुर्वंत्यप्रियभृत्याः सोनर्थःसुमहान्स्मृतः ४९ कच्चित्सर्वेनुरक्तास्त्वांकुलपुत्राःप्रधानतः कच्चित्प्राणांस्तवार्थेषुसंत्यजंतिसदा
युधि ५० कच्चिन्नैकोवहून्सर्वान्सर्वशः सांपरायिकान् अनुशास्तियथाकामंकामात्माशासनातिगः ५१ कच्चित्पुरुषकारेणपु
रुषः कर्मशोभयन् लभतेमानमधिकंभूयोवाभक्तवेतनं ५२ कच्चिद्विद्याविनीतांश्चनरान्ज्ञानविशारदान् यथार्हंगुणतश्चैव
दानेनाभ्युपपद्यसे ५३ कच्चिद्दारान्मनुष्याणांतवार्थेमृत्युमीयुषां व्यसनंचाभ्युपेतानांबिभर्षिभरतर्षभ ५४ कच्चिद्भयादुपगतं
क्षीणंवारिपुमागतं युद्धेवाविजितंपार्थपुत्रवत्परिरक्षसि ५५ ॥

विकर्षणंकालातिक्रमः ४८ दौर्गत्याद्दारिद्र्येण ४९ प्रधानतः मंत्रिणामारभ्य मंत्रिप्रमतयइत्यर्थः ५० सांपरायिकान्संग्रामहितान्शूरान्गजरथतुरग
रोहान्पदातींश्चअर्थान्प्रयोजनानितिनानुशास्तिसर्वेस्वैकाधिपत्येनभेदेनसर्वनाशोयुगपदेवस्यादितिभावः ५१ कच्चित्पुरुषेतिकृततत्सोभवेतिभावः ५२ कच्चि
द्विद्येतिवुद्धिदान्मानयसेतिभावः कच्चिद्दाराणितिजीवतांशूराणांविश्वासार्थं व्यसनंचेतिपरलोकार्थं ५४ नरेवाहयुद्धेवेति ५५ ॥ ॥ ॥

रा०
१६

सर्वस्याइतिप्रजानुकूल्यमपिजयेहेतुः ५६ एवंविजयेहेतुंप्रकृतिसंपदमुक्त्वाविजयकालमाह कच्चिद्व्यसनिनमिति व्यसनैः स्त्रीद्यूतमृगयामद्यंनृत्यंगीतंतथाटनं वाद्यं। निद्रादिवास्वापोव्यसनानिदशरागादेशस्तुक्तैर्युक्तं त्रिविधंबलंमंत्रकोशमन्त्रबलानि प्रभुमंत्रोत्साहसंज्ञकंवा ५७ पार्ष्णिमूलंपार्ष्णिग्राहकआदिर्यस्यतत्तद्वादशविधंमंडलं तच्चोक्तंकामंदकीये अमात्यराष्ट्रदुर्गाणिकोशोदंडश्चपंचमः एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः संपन्नस्तुप्रकृतिभिर्महोत्साहः कृतश्रमः जेतुमेषणशीलश्चविजिगीषुरितिस्मृतः अरिर्मित्रमरेर्मित्रंमित्रमित्रमतः परं अथारिमित्रमित्रंचविजिगीषोः पुरस्कृताः पार्ष्णिग्राहस्ततः पश्चादाक्रंदस्तदनंतरं आसारावनयोश्चैवविजिगीषोस्तुपृष्ठतः अरेश्चविजिगीषोश्चमध्यमोभूम्यनंतरः अनुग्रहेसंहतयोर्व्यस्तयोर्निग्रहेप्रभुः मंडलाद्बहिरेतेषामुदासीनोबलाधिकः अनुग्रहेसंहतानांव्यस्तानांचवधेप्रभुरिति विजिगीषुशत्रुर्योमित्रे तन्मित्रेचतित्रीणिद्वंद्वानिक्रमेणाग्रतः विजिगीषोः पृष्ठतः पार्ष्णिग्राहाक्रंदौ पार्ष्णिग्रहः पृष्ठरक्षकः आक्रंदः प्रोत्साहकः एतयोरनुग्राह

कच्चित्क्षेमवसर्वस्याः पृथिव्याः पृथिवीपते समश्चानभिशंक्यश्च यथामातायथापिता ५६ कच्चिद्व्यसनिनंशत्रुंनिशम्यभरतर्षभ
अभियासिजवेनैवसमीक्ष्यत्रिविधंबलं ५७ यात्रामारभसेदिष्ट्याप्राप्तकालमरिंदम पार्ष्णिमूलंचविज्ञायव्यवसायंपराजयं
५८ बलस्यचमहाराजदत्त्वावेतनमग्रतः कच्चिच्चबलमुख्येभ्यः परराष्ट्रेपरंतप उपच्छन्नानिरत्नानिप्रयच्छसियथार्हतः ५९

कौआसारौतत्रआसदृशौपार्ष्णिग्रहासारआक्रंदासारश्चेतिदशपुरुषाः विजिगीषुशत्र्वोः पार्श्वमध्यमः सर्वेषांपार्श्वेउदासीनः इतिमंडलंपार्ष्णिमूलमित्युच्यते व्यवसायं कृतनिश्चयं कृत्यंच अलब्धवेतनोलुब्धोमानीचाप्यवमानितः क्रुद्धश्चकोपितोकस्मात्तथाभीतश्चभीषितः यथाभिलषितैः कामैर्भिद्यादेतांश्चतुर्विधान् परकीयान्स्वकीयांस्तुरक्षेद्विजयकामुकइति। नीतिशास्त्रोक्तं पराजयंपराजयमूलानांव्यसनानांपरपक्षेसद्भावं स्वपक्षेचाभावंविज्ञायद्विष्याविशेषेणदैवज्ञादिद्वाराज्ञात्वातत्र दैवंव्यसनंपंचविधं मानुषंचपंचविधं यथोक्तंकामंदकीये हुताशनोजलंव्याधिर्दुर्भिक्षंमरकस्तथा इतिपंचविधंदैवंव्यसनंमानुषंपरं आयुक्तकेभ्यश्चौरेभ्यः परेभ्योराजवल्लभात् पृथिवीपतिलोभाच्चप्रजानांपंचधाभयमिति ५८ उपच्छन्नानिपरैरलक्ष्याणिरत्नानिउत्कृष्टवस्तूनिभेदायेत्यर्थः ५९ ॥ ॥ ॥

राम०
१६

स्वनुष्ठिताः शोभनेनप्रकारेणसम्यगनुष्ठिताः विधिवद्गुणाः येसामादयः विधिवत् अनुष्ठिताः संतोगुणाः हितायभवंति अन्यथाविपरीताय यथोक्तमभियुक्तैः चतुर्यो
पायसाध्येतुरिपौसाल्मपक्रियेति यद्वासामादयोऽवश्यमनुष्ठेयाः यद्वाएतेगुणाः संधिविग्रहयानासनद्वैधीभावसंश्रयाः विधिवदग्निहोत्रादिविधिवदवश्यानुष्ठेयाः
नरकारोस्वराष्ट्रभंगादिनाज्ञानेनप्रजापीडनेनराज्ञोदोषोत्पत्तिः ६१ मूलंस्वराज्यंदृढंमन्त्रिभिः शूरैरधिष्ठितंसत्दृढंपरानभिभाव्यंकृत्वा अष्टांगसंयुक्ता रथानागा
हयायोधाः पत्तयः कर्मकारकाः चारादैशिकमुख्याश्चध्वजिन्यष्टांगिकामता। चतुर्विधबला मौलमैत्रभृत्याटविकैर्बलैर्युक्ता। बलमुख्यैः सेनापतिभिः प्रतिबाधिनीमा

कच्चिदात्मानमेवाग्रेविजित्यविजितेंद्रियः परान्जिगीषसेपार्थप्रमत्तानजितेंद्रियान् ६० कच्चित्तेयास्यतः शत्रून्पूर्वंयांतिस्व
नुष्ठिताः सामदानंचभेदश्चदंडश्चविधिवद्गुणाः ६१ कच्चिन्मूलंदृढंकृत्वापरान्यासिविशांपते तांश्चविक्रमसेजेतुंजित्वाचपरिरक्ष
सि ६२ कच्चिदष्टांगसंयुक्ताचतुर्विधबलाचमूः बलमुख्यैः सुनीतातेद्विषतांप्रतिबाधिनी ६३ कच्चिल्लवंचमुष्टिंचपरराष्ट्रे
परंतप अविहायमहाराजनिहंसिसमरेरिपून् ६४ कच्चित्स्वपरराष्ट्रेषुबहवोधिकृतास्तव अर्थान्समधितिष्ठंतिरक्षंतिच
परस्परं ६५ ॥ ॥

प्रातिकूल्येनछेदिनी ६३ लवः सस्यच्छेदनकालः मुष्टिः सस्यानांगोपनकालः दुर्भिक्षमितियावत् लूनच्छेदनेमुष्टेस्तयोश्चाम्पात्रधिकरणोघातित्वेनोपरराष्ट्रेक्षेत्रस्थ
शुसस्यशुसुखलभ्योन्नेदुर्भिक्षेचराजकुलेलब्धमक्तोपजीविभिर्निरन्नताक्रांताः शत्रवः सुखंजेयाऽऽत्सर्थः ६४ स्वपरराष्ट्रेषुस्वेनिदृष्टान्तार्थस्वराष्ट्रेइवपरराष्ट्रेऽपिवि
श्वावहवः अधिकृताः स्थानेस्थानेस्थिताः स्थानपप्रमादयोऽर्थान्प्रयोजनानिप्रजावशीकरणकरग्रहणादीनिरक्षंतिचपरस्परंसंभूयपरकीयमागतंसेनापसा
रिकंअभिभूयराष्ट्रंस्वीयांश्चरक्षंतीत्यर्थः ६५

रा० ९७

अभ्यवहार्याणि भक्ष्याणि गात्रसंस्पर्शनानि वस्त्राणि संघर्षणानीति पाठे चंदनागरुकुंकुमकस्तूरिकादीनि घ्रेयाणि उत्तमधूपादीनि अनुमताः विश्वस्ताः तव तत
दृष्टैरक्ष्यंते न तु देशान्तरेणान्नानि तानि स्वयमेव स्वीकुर्वंतीत्यर्थः ६६ कोशो धनगृहं कोष्ठं धान्यस्थानं ६७ आभ्यंतरेभ्यः बाह्येभ्यः सेनापत्यादिभ्यः तानुभयानेभ्यः पु
त्रामात्यादिभ्यः तानपि मिथः पुत्रममात्यादिमांश्च पुत्रा इस्यसि ६८ कच्चिन्नेति पानादिव्यसनजं अयं तव पूर्वाह्णे धर्मोच्चारणकालेष्वस्माः न प्रतिजानंति ना वेदयंति आवेद

कच्चिदभ्यवहार्याणि गात्रसंघर्षणानि च घ्रेयाणि च महाराज रक्षंत्यनुमतास्तव ६६ कच्चित्कोशश्च कोष्ठं च वाहनं हारमायुधं आयश्च
कृतकल्याणैस्तव भक्तैरनुष्ठितः ६७ कच्चिदाभ्यंतरेभ्यश्च बाह्येभ्यश्च विशांपते रक्षस्यात्मानमेवाग्रे तांश्च स्वेभ्यो मिथश्च तान् ६८
कच्चिन्न पाने द्यूते वा क्रीडासु प्रमदासु च प्रतिजानंति पूर्वाह्णे व्ययं व्यसनजं तव ६९ कच्चिदायस्य चार्द्धेन चतुर्भागेन वा पुनः पादभ
भागैस्त्रिभिर्वापि व्ययः संशोध्यते तव ७० कच्चिज्ज्ञातीन् गुरून्वृद्धान्वणिजः शिल्पिनः श्रितान् अभीक्ष्णमनुगृह्णासि ध
नधान्येन दुर्गतान् ७१ कच्चिदायव्यये युक्ताः सर्वे गणकलेखकाः अनुतिष्ठंति पूर्वाह्णे नित्यमायं व्ययं तव ७२ कच्चिद
र्थेषु संप्रौढान् हितकामाननुप्रियान् नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषं ७३ ॥ ॥ ॥

नेदितदानीमागताः शिष्टाः पुरोहितादयः पानादिदुर्व्यसनासक्तं त्वां ज्ञात्वा सज्जेयुरिति भावः ६९ सुभिक्षसाम्यदुर्भिक्षेषु आयस्य पादेन पादाभ्यां त्रिभिः पादैर्वा व्य
यः संशुध्यते पूर्यते सर्वथापि कोशवृद्धिः कार्येति भावः ७० दुर्गतान्दरिद्रान् ७१ अनुतिष्ठंति निवेदयंति ७२ अनुप्रौरत्तहितकामसज्ञानानंतरं प्रियान्
कर्मभ्योपकर्षः अधिकारच्युतिः सा च पूर्वं किल्बिषं अप्राप्य दोषमदृष्ट्वा न कर्तव्येत्यर्थः ७३ ७३ ७३ राम० ९७

७४ अप्रामाण्यव्यवहाराः अभीराः ७५ ७६ देवमातृकाः वृष्टिनिष्पाद्यसस्याः ७७ प्रत्येकं चशतं प्रतिशतं एकं वृद्ध्योतिसंबंधः। एकैकः प्रतिमासं वर्द्धनीय इत्यर्थः पादिकं
चशतं तेष्वैनि पादं तु वर्षस्य शतचतुर्थांशो वृद्धिः तथा च किंचिदधिका द्व्यन्तरवृद्धिः। आधमर्ण बंधके वृद्धिरन्यत्र निर्बंधके इति विभागः यत्तु द्विकं त्रिकं चतुष्कं च पंचकं च सममंश
ते मासस्य वृद्धिं स्वरूपादिति त्रिकादि पक्षस्तु आधमर्णिक व्यवसायानुसारेणेति ज्ञेयं ७८ वार्त्ता कृषिर्वाणिज्यं पाशुपाल्यं कुसीदं चेति [illegible] चतुर्विधा ७९
कश्चिद्व्यवहार इति। प्रतिग्रामं पंच पंचेति सत्तुष्ठिताः शो भनमनुष्ठित मनुष्ठानं येषां ते तथा। इति च प्रश्नः सप्तमाहर्त्ता संविधाता लेखकः साक्षी चेति समाहर्त्ता प्रजाः स्तोद्व्यसुद्धे

कच्चिद्द्विलान् गुरून् वा तु उत्तमाधममध्यमान् त्वं कर्मस्वनुरूपेषु नियोजयसि भारत ७४ कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशांपते अप्रा
प्तव्यवहारा वा तव कर्मस्वनुष्ठिताः ७५ कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा त्वया वा पीड्यते राष्ट्रं कच्चित्तुष्टाः कृषीवलाः ७६
कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहन्ति च भागशो विनिविष्टानि न कृषिर्देवमातृका ७७ कच्चिन्न बीजं भक्तं च कर्षकस्यावसीदति पादि
कं च शतं वृद्ध्या ददास्यृणमनुग्रहं ७८ कच्चित्स्वनुष्ठितास्तात वार्त्ता ते साधुभिर्जनैः वार्त्तायां संश्रितस्तात लोकोऽयं सुखमेधते ७९ कच्चि
च्छूराः कृतप्रज्ञाः पंच पंच स्वनुष्ठिताः क्षेमं कुर्वन्ति संहत्य राजन् जनपदे तव ८० कच्चिन्नगरगुप्त्यर्थं ग्रामा नगरवत्कृताः ग्रामवच्च कृ
ता घोषाः ते च सर्वे त्वदर्पणाः ८१

कीकृत्य राज्ञेऽर्पयिता संविधाता प्रज्ञा समाहर्त्ता एकवाक्यता धारकः संहत्य एकीभूय ८० नगरवदित्यनेन बहुभिः शूरैरधिष्ठिता ग्रामाः बहुत्वैर्नगराणीव बहुकृत्तैर्भेदेन
पेश्वरस्थानं पुरसंज्ञं ग्रामाः शूद्रजन बहुलाः आपणादियुक्तं नगरं प्रांताः सीमास्थाः आर[illegible]विकानां ग्रामाः ते च सर्वे त्वदर्पणाः प्रांतग्रामनगरपुरेशानां त्वय्येव कृता
कृतस्य धनस्य चार्पणं निवेदनं येषां ते तथाभूताः प्रांताधिपो ग्रामाधिपतौ सोऽपि नगराधिपतौ सोऽपि देशाधिपतौ सोऽपि साक्षाद्राज्ञि सर्वं निवेदयन्तीत्यर्थः ८१

विषमाणिसदुर्गाणि निघ्नंतोयेचरंतितान्नबलेनसहितः पुराध्यक्षोनुरक्ष्वेदिसथः समेषुविषमेष्वपीतिपाठेविषमेषुइति कालेषु अतितृष्णयादर्यइतयः २२ आसांवच
ने आसांपुरस्त्रगुरुंसनभाषसे २३ आत्ययिकं अकल्याणं २४ पश्चिमेचतुर्थेतस्मादेवद्वौप्रथमोद्वितीयस्तृतीयाविसथः २५ २७ यमवत्सहिद्वंद्वेषुक्रूरः

कच्चिद्बलेनानुगताः समेषुविषमेषुच पुराणिचोरा निघ्नंतस्त्वंरंतिविषयेतव २२ कच्चित्स्त्रियः सांत्वयसिकच्चित्ताश्चसुरक्षिता
ः कच्चिन्नश्रद्धास्यासांकच्चिद्गुह्यंनभाषसे २३ कच्चिदात्ययिकंश्रुत्वातानर्थमनुचिंतयच प्रियाणामनुभवनंशोषेनत्वमंतःपुरेन्नृप
२४ कच्चिद्द्वौप्रथमौयामौरात्रेः सुप्त्वाविशांपते संचिंतयसिधर्मार्थौयामउत्थायपश्चिमे २५ कच्चिद्दर्शयसेनित्यंमनुष्याणांम
लंकृतः उत्थायकालेकालज्ञः सहपांडवमंत्रिभिः २६ कच्चिद्रक्तांबरधराः खड्गहस्ताः स्वलंकृताः उपासतेत्वामभितोर
क्षणार्थमरिंदम २७ कच्चिद्दंड्येषुयमवत्पूज्येषुचविशांपते परीक्ष्यवर्त्तसेसम्यगप्रियेषुप्रियेषुच २८ कच्चिच्छारीरमाबा
धमौषधैर्नियमेनवा मानसंवृद्धसेवाभिः सदापार्थापकर्षसि २९ कच्चिद्वैद्याश्चिकित्सायामष्टांगायांविशारदाः सुहृ
दश्चानुरक्ताश्चशरीरेतेहिताःसदा ३०

वृद्धेषुविनयवानन्नद्रुहत् २४ आबाधंडुःखंनियमेनपथ्याशनादिना मानसमाबाधंअष्टांगायांचिकित्सायां निदानंपूर्वलिंगानि रूपाण्युपशमस्तथा संप्राप्तिरे
वमरोगीपरिचारकएवचेति अष्टावंगानि अथवारोगोरोगहेतुः आरोग्यमारोग्यहेतुः तेषांलक्षणानिच ३० ॥ ॥ ॥

अर्थिनः याचकाः प्रत्यर्थिनः परंपरागतहत्तित्रिप्रतिवंधात् क्षुब्धविन्नाः प्रत्यर्थिनः शत्रवो वा न पश्यसि न पश्यसि वेति उच्यते ९१ ९२ कच्चिन्नेति येनि सर्वबलेन पूर्वं परिपी
डितः स्व न हतः स एव कालांतरे मंत्रेण उपायेन मंत्रबलाभ्यां कच्चिद्दूरवानेति योजना कच्चिन्नेति पादे तेन तव बले सैन्ये योदिः पूर्वं पीडितः तस्मादिदं पूर्ववत् ९४ प्रधानतः प्रा
धान्येन हृताः दानमानाभ्यां वशीकृताः आहृताः इति वा पाठः ९५ विद्यासु सांप्रतं ब्राह्मणानां गुणानां गुणं दृष्ट्वा च षट्कर्मप्रवर्तनं ॥ ९६ ९७ तथा कर्तुं दैवेन च

कच्चिन्न लोभान्मोहाद्वा मानाद्वापि विशांपते अर्थिप्रत्यर्थिनः प्राप्तान्न पश्यसि कथंचन ९१ कच्चिन्न लोभान्मोहाद्वा विश्रंभात्प्रणयेन
न वा आश्रितानां मनुष्याणां वृत्तिं त्वं संरुणत्सि वै ९२ कच्चित्पौराः नसहिता ये च ते राष्ट्रवासिनः त्वया सह विरुध्यंते परैः क्रीताः कथंचन
९३ कच्चिन्न ते दुर्बलः शत्रुर्बलेन परिपीडितः मंत्रेण बलवान्कश्चिदुभाभ्यां वा कथंचन ९४ कच्चित्सर्वे ऽनुरक्तास्त्वां भूमिपालाः प्रधानतः
कच्चित्प्राणांस्त्वदर्थेषु संत्यजंति त्वया हृताः ९५ कच्चित्ते सर्वविद्यासु गुणतो ऽर्च्यसे द्विज ब्राह्मणानां च साधूनां तव वै निःश्रेयसे प्रभुः दक्षि
णां त्वं दास्यसि नित्यं स्वर्गापवर्गयोः ९६ कच्चिद्धर्मे त्रयीमूले पूर्वैराचरिते जनैः यतमानस्तथा कर्तुं तस्मिन्कर्मणि वर्तसे ९७ क
च्चिन्न वर्गैः सहितः नित्यं नास्ति वेदद्विजाः गुणवंति गुणोपेतास्तवार्घ्यं सदक्षिणं ९८ कच्चित्क्रतुनेकचित्तो वाजपेयांश्च सर्वशः पुंड
रीकांश्च कात्स्न्येन यतसे कर्तुमात्मवान् ९९ कच्चिज्ज्ञातीन्गुरून्वृद्धान्देवतांस्तापसानपि चैत्यांश्च वृक्षान्कल्याणान्ब्राह्मणांश्च
नमस्यसि १०० कश्चिदैक्ष्वाकोन मन्युर्वा त्वया प्रोत्साहितेनघ अपि मंगलहस्तश्च जनः पार्श्वेऽनुतिष्ठति १०१
तं

रितवर्त्कार्तुं तस्मिंस्त्रयीमूले तवाध्यक्षं त्वमक्षं सदक्षिणां सदक्षिणालाभं यथास्योन्नथाः अंति ९८ ९९ चैत्यान्स्थंडिलवतो ग्रामस्य चकान्वृक्षान् १०० शोकः
नीचानां मन्युः अशाना मंगलहंसो मंगलप्रदो मंत्रादिवित्पुरोहितादिः अनुतिष्ठति स्वस्त्ययनं करोति १०१ १०१

स०
१९

याएषाद्दण्डनीतिस्त्रिरष्टिसैवसावदिकीकच्चिदत्तीत्यर्थः १०२ १०३ कच्चिदार्य्यइतिआर्य्योविशुद्धात्मावसन्नपिकस्मिंश्चिन्निंदकर्म्मणिनिमित्तेक्षारितोधनधान्यादिनारि
क्तः कृतोराजभिः कृतदंडःसन्नशुद्धमतिमलिनाज्ञनादन्यादिशास्त्रप्रमाणपात्सुचिरपिसन्नदृष्टशास्त्रकुशलैरनुपासितपंडितैर्मूर्खैरमात्यैः कच्चिन्नवध्यतेहन्यते धिकध
नलोभात् अदृष्टइतिसविसर्गपाठेतुशास्त्रकुशलैरमात्यैरज्ञातइत्यर्थः १०४ दुष्टः स्वभावतः तत्कारीदुष्टकर्म्मकारी तस्करैचौरान्वेषिभिः क्रोधुपालैः दृष्टः सकारणः

कच्चिदेषाचेतवृद्धिर्वृत्तिरेषाचतेनघ आयुष्याचयशस्याचधर्मकामार्थदर्शिनी १०२ एतयावर्त्तमानस्यबुध्याराष्ट्रंनसीदति विजित्यचमहींराजा
सोत्यंतसुखमेधते १०३ कच्चिदार्योविशुद्धात्माक्षारितश्चोरकर्म्मणि अदृष्टशास्त्रकुशलैर्नलोभाद्वध्यतेशुचिः १०४ दुष्टोगृहीतस्तत्कारी
तस्करैर्दृष्टः सकारणः कच्चिन्नमुच्यतेस्तेनोद्रव्यलोभान्नरर्षभ १०५ उत्पन्नान्कच्चिदाढ्यस्यदरिद्रस्यचभारत अर्थान्नमिथ्यापश्यंतितवा
मात्याहृताजनैः १०६ नास्तिकमनृतंक्रोधंप्रमादंदीर्घसूत्रतां अदर्शनंज्ञानवतामालस्यंक्षिप्तचित्ततां एकचिंतनमर्थानामनर्थज्ञैश्च
चिंतनं १०७ निश्चितानामनारंभंमंत्रस्यापरिरक्षणं अमंगल्यप्रयोगंचसंगमंविषयेषुच १०८ कच्चित्वंवर्जयस्येतान्राजन्
दोषांश्चतुर्दश प्रायशोयैर्विनश्यंतिकृतमूलाअपिपार्थिवाः १०९ कच्चित्तेसफलावेदाः कच्चित्तेसफलंधनं कच्चित्तेसफलादाराः क
च्चित्तेसफलंश्रुतं ११०

चोरितंद्रव्यसहितोविघ्नत्तश्चनियोजना १०५ उत्पन्नानि चोरार्थे आढ्यस्यदरिद्रस्यवाऽर्थान्उत्पन्नान्दीनकणिशन्यायेनस्वल्पकालेनैवबहुगुणांवृद्धिंप्राप्तानृतवन्त्र
मात्याः मिथ्याअन्रतानचौर्यादिनाः न्यायेनार्जितानितिकच्चिन्नपश्यंतिजनैः पिशुनैः हृताहृतविवेकाः पा गंनेरर्थनैर्हृताः वशीकृताः लुब्धाहिलिप्सुः परत्रासंतमपि
दोषमारोप्यन्तहिन्नेजिही ऽपतीतिप्रसिद्धं १०६ नास्तिकानित्यादिसार्द्धश्लोकत्रयंव्याख्यातं १०९ ११० ११० ११० राम०
१९

११३ कच्चिदभ्यागता इति अवहार्यन्ते दाप्यन्ते शुल्कं राजग्राह्यं करं १०४ पण्यानि विक्रेयद्रव्याणि उपधाभिः छलैः ११५ ११६ कृषितंत्रेषु कृष्युपायेषु पुष्पफलेषु आर्द्रशुष्कधान्ये
षु तथा गोषु जातेषु पुष्पफलेषु दुग्धघृततक्रपशुअन्नेषु तत्सु मधुसर्पिषी अन्नं वै मधु इति श्रुतेर्धान्यादिकमन्नं घृतं च यल्लोके ब्राह्मणेभ्यो ददासि इत्यन्वये १७ द्रव्यं शिल्पिनां

युधिष्ठिर उवाच कथं वै सफला वेदाः कथं वै सफलं धनं कथं वै सफला दाराः कथं वै सफलं श्रुतं ११ नारद उवाच अग्निहोत्र
फला वेदा दत्तभुक्तफलं धनं रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतं १२ वैशंपायन उवाच एतदाख्याय स मुनिर्नारदो वै महात
पाः पप्रच्छानंतरमिदं धर्मात्मानं युधिष्ठिरं १३ नारद उवाच कच्चिदभ्यागता दूराद्वणिजो लाभकारणात् यथोक्तमवहार्यंते शुल्कं शु
ल्कोपजीविभिः १४ कच्चित्ते पुरुषा राजन्पुरे राष्ट्रे च मानिताः उपानयंति पण्यानि उपधाभिरवंचिताः १५ कच्चिच्छृणोषि वृ
द्धानां धर्मार्थसहिता गिरः नित्यमर्थविदां तात यथा धर्मार्थदर्शिनां १६ कच्चित्ते कृषितंत्रेषु गोषु पुष्पफलेषु च धर्मार्थं च द्वि
जातिभ्यो दीयते मधुसर्प्पिषी १७ द्रव्योपकरणं किंचित्सर्वदा सर्वशिल्पिनां चातुर्मास्यावरं सम्यङ्नियतं संप्रयच्छसि १८
कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि सतां मध्ये महाराज सत्करोषि च पूजयन् १९ ॥ ॥ ॥

वेतनं उपकरणं स्वकार्यसाधनसामग्री। यथा चित्रोत्साहे नेरंजकद्रव्यादि चातुर्मास्यावरं मासचतुष्टयपर्याप्तमधिकं १८ १९ ॥

स०
२०

सूत्रं संक्षेपवाक्यं अवस्थावाहस्त्यादीनां लक्षणपरीक्षाचिकित्सौषधोद्दीपनमादनादिप्रकारप्रतिपादकं ग्रंथान्निःसिद्धांतमात्रसंक्षेपयुक्तान् सूत्रहस्तिसूत्रं तत्तदाचार्येभ्यः २० यंत्राणि आ
ग्नेयौषधबलेन सीसकास्यदृढगोलप्रक्षेपकाणि लोहमयानि भाषायां नाल इत्यभिधेयानि तेषां सूत्रं सूचकं शास्त्रं नागरं नगरहितं २१ अस्त्राणि मंत्रप्रयुक्तानि शस्त्राणि ब्र

कच्चित्सूत्राणि सर्वाणि गृह्णासि भरतर्षभ हस्तिसूत्राश्वसूत्राणि रथसूत्राणि वा विभो २० कच्चिदभ्यस्यते सम्यग्गृहे ते भरतर्षभ धनुर्वे
दस्य सूत्रं वै यंत्रसूत्रं च नागरं २१ कच्चिदस्त्राणि सर्वाणि ब्रह्मदंडश्च तेनघ विषयोगास्तथा सर्वे विदिताः शत्रुनाशनाः २२ कच्चिदग्निभ
याच्चैव सर्पव्यालभयात्तथा रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षसि २३ कच्चिदंधांश्च मूकांश्च पंगून्व्यंगानबांधवान् पितेव पासि धर्मज्ञ
तथा प्रव्रजितानपि २४ षडनर्था महाराज कच्चित्ते पृष्ठतः कृताः निद्रालस्यं भयं क्रोधो मार्दवं दीर्घसूत्रता २५ वैशंपायन उवा
च ततः कुरूणामृषभो महात्मा श्रुत्वा गिरो ब्राह्मणसत्तमस्य प्रणम्य पादावभिवाद्य तुष्टो राजाब्रवीन्नारदं देवरूपं २६ युधिष्ठि
र उवाच एवं करिष्यामि यथा त्वयोक्तं प्रज्ञा हि मे भूय एवाभिवृद्धा उक्त्वा तथा चैव चकार राजा लेभे महीं सागरमेखलां च २७
नारद उवाच एवं यो वर्त्तते राजा चातुर्वर्ण्यस्य रक्षणे स विहृत्येह सुसुखी शक्रस्यैति सलोकतां २८ इत्यध्यायः ॥ ॥

ब्रह्मदंडश्च आभिचारिकविद्या २२ व्यालः सर्पः व्याघ्रादेरप्येतदुपलक्षणं २३ प्रव्रजितान् जातिबहिष्कृतान् अन्नमात्रार्थिनो दीनान् २४ २७ उपसंहरति राम०
एवं यो वर्त्तत इति २८ इति नैलकंठीये भारतभावदीपे सभापर्वणि कच्चिदध्यायविवरणं समाप्तं ॥ ॥ ॥ ॥ ॥ २०

संपूज्याथाभ्यनुज्ञात इति १६ दिव्यसभालाभगर्वितो युधिष्ठिर उवाच भवानिति संचरते समागम्य इति सर्वत्रगमने सामर्थ्यमात्रोपलक्षणपरत्वात् सुरेश्वरोपि नरः कर्मकृतिहा
रेवा नरः स्वलोके पुंसंचरसि लोकाश्च हार्दीकाश्च निष्ठत्वापि संचरतीति वार्थः तेन सर्वं तत्त्वमुक्तं एवं मनुष्यस्तेषः प्राकृनिर्मितान्देवलोकानित्यर्थः कीदृशीति देवलो

इति महाभारते सभापर्वणि युधिष्ठिरनारदप्रश्नो नाम वैशंपायन उवाच संपूज्याथाभ्यनुज्ञातो महर्षेर्वचनात्परं प्रत्युवाचानुपूर्व्येण
धर्मराजो युधिष्ठिरः १ भगवन्न्याय्यमाहैतं यथावद्धर्मनिश्चयं यथाशक्ति यथान्यायं क्रियतेयं विधिर्मया २ राजभिर्यद्यथा कार्यं
पुरा वै तन्न संशयः यथान्यायोपनीतार्थं कृतं हेतुमदर्थवत् ३ वयं तु सत्पथं तेषां यातुमिच्छामहे प्रभो न तु शक्यं तथा गंतुं यथा तै
र्नियतात्मभिः ४ वैशंपायन उवाच एवमुक्त्वा स धर्मात्मा वाक्यं तदभिपूज्य च मुहूर्तात्प्राप्तकालं च दृष्ट्वा लोकचरं मुनिं ५ ना
रदं सुस्थमासीनमुपासीनो युधिष्ठिरः अपृच्छत्पांडवस्तत्र राजमध्ये महाद्युतिः ६ युधिष्ठिर उवाच भवान्संचरते लोकान्स
दा नानाविधान्बहून् ब्रह्मणा निर्मितान्पूर्वं प्रेक्षमाणो मनोजवः ७ ईदृशी भविता काचिद्दृष्टपूर्वा सभा क्वचित् इतो वा श्रेय
सी ब्रह्मंस्तन्ममाचक्ष्व पृच्छतः ८ वैशंपायन उवाच तच्छ्रुत्वा नारदस्तस्य धर्मराजस्य भाषितं पांडवं प्रत्युवाचेदं स्मयन्मधुरया
गिरा ९ नारद उवाच मानुषेषु न मे तात दृष्टपूर्वा न च श्रुता सभा मणिमयी राजन्यथेयं तव भारत १० ॥

कापि क्षयामनुष्यलोके क्वचित्कालेवा भविता भवित्री अनागतदर्शित्वात्तद्वत् दृष्टपूर्वा इति मेवेत्यर्थः ८ स्मयन्युधिष्ठिरेपि गर्वो मास्तु देवतामहाभाग्यज्ञानं
चेति विस्मयं प्राप्नुवन् ९ मानुषेषु न दृष्टा न श्रुतेति अग्रेपि न दृक्ष्यते न श्रोष्यते एवं कल्पसमानतृपत्वादुत्तरस्यापीत्यर्थः १० ॥ ॥ ॥

स०
२१

कैलासेतिकुबेरस्येत्यर्थः ११ गतक्लमां श्रविघादिक्लेशैर्वर्जितां तेनहृद्यासुतत्स्वलक्षणायेते दिव्यादिव्यैरिति दिव्यादिविभवाः रंभोर्वश्यादयः अदिव्यास्तदन्ये मानुषाः पि
त्रादयः सयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरः समुत्तिष्ठंतितेनसपितृलोकेनसंपन्नोमहीयतइतिश्रुत्यलोकेतत्तत्स्या पिश्रवणात् अभिप्रेयंतेसंकल्प

सभांत्वंपितृराजस्यवरुणस्यचधीमतः कथयिष्यसितत्त्वेनशक्रस्यकैलासनिलयस्यच ११ ब्रह्मणश्चसभांदिव्यांकथयिष्यसिसत्तम
दिव्यादिव्यैरभिप्रायैरुपेतांविश्वरूपिणीं १२ देवैः पितृगणैः साध्यैर्यज्वभिर्नियतात्मभिः जुष्टांमुनिगणैः शांतैर्वेदयज्ञैः स
दक्षिणैः यदितेश्रवणेबुद्धिर्वर्ततेभरतर्षभ १३ नारदेनैवमुक्तस्तुधर्मराजोयुधिष्ठिरः प्रांजलिर्भ्रातृभिः सार्द्धंतैश्चसर्वै
र्द्विजोत्तमैः १४ नारदंप्रत्युवाचेदंधर्मराजोमहामनाः सभाः कथयताः सर्वाः श्रोतुमिच्छामहेवयं १५ किंद्रव्यास्ताः स
भाब्रह्मन्किंविस्ताराः किमायताः पितामहंचकेतस्यांसभायांपर्युपासते १६ वासवंदेवराजंचयमंवैवस्वतंचके वरुणं
चकुबेरंचसभायांपर्युपासते १७ एतत्सर्वंयथान्यायंदेवर्षेवदतस्तव श्रोतुमिच्छामसहिताः परंकौतूहलंहिनः १८
एवमुक्तःपांडवेननारदः प्रत्यभाषत क्रमेणराजन्दिव्यास्ताः श्रूयंतामिहनः सभाः १९ सभापर्वणि नारदउवाच
शक्रस्यतुसभादिव्याभास्वराकर्मनिर्मिता स्वयंशक्रेणकौरव्यनिर्जितार्कसमप्रभा १ ॥ ॥

तइत्यभिप्रायाः विषयाः तैः विश्वरूपिणीभावकसंकल्पानुसारिणीनानारूपवतीं मानसीमित्यर्थः १३ जुष्टांसेवितां यदिश्रवणेबुद्धिर्वर्ततेतर्हिकथयिष्येइति टम०
पूर्वेणसंबंधः १९ अध्यायः शक्रस्येति कर्मभिर्विश्वकर्मणोयत्नैः निर्मिता शक्रेणजितार्केतिसंबंधः २ २ २ २ २१

अध्यर्धंसार्धंआयतादीर्घा वैहायसीखेचरी २ निरातंकानिर्भया शिवाशंकरा शुभाकल्याणावहा ३ शच्यानाम्ना श्रियाशोभया ४ ५ मरुतोगृहमेधिन इतिसा

विस्तीर्णायोजनशतंशतमध्यर्द्धमायता वैहायसीकामगमापंचयोजनमुच्छ्रिताः २ जराशोकक्लमापेतानिरातंकाशिवाशुभा वेश्मा
सनवतीरम्यादिव्यपादपशोभिता ३ तस्यांदेवेश्वरः पार्थसभायांपरमासने आस्तेशच्यामहेन्द्राण्याश्रियालक्ष्म्याचभारत ४ वि
भ्रद्वपुरनिर्देश्यंकिरीटीलोहितांगदः विरजांबरश्चित्रमाल्योह्रीकीर्तिद्युतिभिः सह ५ तस्यामुपासतेनित्यंमहात्मानंशतक्रतुंमरुतः
सर्वशोराजन्सर्वेचगृहमेधिनः ६ सिद्धादेवर्षयश्चैवसाध्यादेवगणास्तथा मरुत्वंतश्चसहिताभास्वंतोहेममालिनः ७ एतेसानुच
राः सर्वेदिव्यरूपाः स्वलंकृताः उपासतेमहात्मानंदेवराजमरिंदमं ८ तथादेवर्षयः सर्वेपार्थाः शक्रमुपासते अमलाधूतपाप्मा
नोदीप्यमानाइवाग्नयः ९ तेजस्विनः सोमसुतोविशोकाविगतज्वराः पराशरः पर्वतश्चतथासावर्णिगालवौ १० शंखश्चलि
खितश्चैवतथागौरशिरामुनिः दुर्वासाः क्रोधनः श्येनस्तथादीर्घतमामुनिः ११ पवित्रपाणिः सावर्णिर्याज्ञवल्क्योथभालुकिः उ
द्दालकः श्वेतकेतुस्तांड्योभांडायनिस्तथा १२ हविष्मांश्चगरिष्ठश्चहरिश्चंद्रश्चपार्थिवः हृद्यश्चोदरशांडिल्यः पाराशर्यः कृषीव
लः १३ वातस्कंधोविशाखश्चविधाताकालएवच करालदंतस्त्वष्टाचविश्वकर्माचतुंबुरुः १४ अयोनिजायोनिजाश्च
वायुभक्षाहुताशिनः ईशानंसर्वलोकस्यवज्रिणंसमुपासते १५ १५ १५

मानाधिकरण्यं सोमसुतः सोमाभिषवकर्तारः सोमयाजिनइतियावत् १० १५ १५ १५ १५

१९ अर्थः अर्थाद्यभिमानिन्योदेवताः २० अग्नयोगणास्तत्राग्निरंगिराइतिविश्रुतः दक्षिणाग्निर्गार्हपत्याहवनीयावितित्रयी निर्मथ्योवैद्युतः शूरः संवर्त्तोलौकिकस्तथा
जाठरोविषगः क्रव्यात्क्षेमवान्वैष्णवस्तथा दस्युमान्बलदश्चैवशांतः पुष्टोविभावसुः ज्योतिष्मान्भरतोभद्रः स्विष्टकृद्वसुमान्क्रतुः सोमश्चपितृमांश्चैवपावकाः सप्त

सहदेवः सुनीथश्चवाल्मीकिश्चमहातपाः समीकः सत्यवाक्चैवप्रचेताः सत्यसंगरः १६ मेधातिथिर्वामदेवः पुलस्त्यः पुलहः क्रतुः मरुत्त
श्चमरीचिश्चस्थाणुश्चात्रिर्महातपाः १७ कक्षीवान्गौतमस्तार्क्ष्यस्तथावैश्वानरोमुनिः मुनिः कालकवृक्षीयश्चाश्राव्योथहिरण्मयः १८
संवर्त्तोदेवहव्यश्चविष्वक्सेनश्चवीर्यवान् दिव्याआपस्तथौषध्यः श्रद्धामेधासरस्वती १९ अर्थोधर्मश्चकामश्चविद्युतश्चैवपाण्डव जलवाहा
स्तथामेघावायवस्तनयित्नवः २० प्राचीदिग्यज्ञवाहाश्चपावकाःसप्तविंशतिः अग्नीषोमौतथेंद्राग्नीमित्रश्चसवितार्यमा २१ भगोविश्वे
चसाध्याश्चगुरुः शुक्रस्तथैवच विश्वावसुश्चित्रसेनः सुमनास्तरुणस्तथा २२ यज्ञाश्चदक्षिणाश्चैवग्रहास्तोमाश्चभारत यज्ञवाहाश्चये
मंत्राः सर्वेतत्रसमासते २३ तथैवाप्सरसोराजन्गंधर्वाश्चमनोरमाः नृत्यवादित्रगीतैश्चहास्यैश्चविविधैरपि २४ रमयंतिस्मनृपतेदेव
राजंशतक्रतुं स्तुतिभिर्मंगलैश्चैवस्तुवंतः कर्मभिस्तथा २५ विक्रमैश्चमहात्मानंवलवृत्रनिषूदनं ब्रह्मराजर्षयश्चैवसर्वेदेवर्षयस्त
था २६ विमानैर्विविधैर्दिव्यैर्दीप्यमानाइवाग्नयः स्रग्विणोभूषिताः सर्वेयांति [illegible] चायांतिचापरे २७ बृहस्पतिश्चशुक्रश्चनित्य
मास्तांहितत्रैव एतेचान्येचबहवोमहात्मानोयतव्रताः २८ विमानैश्चंद्रसंकाशैःसोमवत्प्रियदर्शनाः ब्राह्मणाः सदृशाराजन्भृगुः सप्त
र्षयस्तथा २९ एषासभामयाराजन्दृष्टापुष्करमालिनी शतक्रतोर्महाबाहोयाम्यामपिसभांशृणु ३० इतिसभापर्वणिइंद्रसभावर्ण
नंनाम ॥ ॥ स१

विंशतिः २१ २२ एवंयज्ञदक्षिणाद्यः २३ २९ पुष्करमालिनीनामनः ३० अध्यायः ॥ ॥ ॥ ॥ ॥

१ तैजसीज्योतिर्मयी सौवर्णी वा भूयसी महती पूर्ववत् मम भ्रातः २ सर्वतः कामरूपिणी यस्यां सर्वं वस्तु संकल्पसमकालमेव सर्वात्मकं भवतीत्यर्थः ३ ४ कामाः काम्यमा
नाविषयाः भक्ष्यंतेवक्रं भक्ष्यं चकुपादि भोज्यं क्षीरनादि ५ लेह्यं खंडशर्करादि चोष्यं इक्षुखंडादि स्रजः परंपराः तस्या भक्ष्याद्यमस्य कामफलाः आम्रादिरूपि

नारदउवाच कथयिष्यसमायां पार्थयुधिष्ठिरनिबोधमां वैवस्वतस्ययांपार्थविश्वकर्माचकारह १ तैजसीसासभाराजन्बभूवशत
योजना विस्तारायामसंपन्नाभूयसीचापिपांडव २ अर्कप्रकाशाभ्राजिष्णुः सर्वतः कामरूपिणी नातिशीतानचात्युष्णामनस
श्चप्रहर्षिणी ३ नशोकोनजरातस्यांक्षुत्पिपासेनचाप्रियं नचदैन्यंक्लमोवापिप्रतिकूलंनचाप्युत ४ सर्वेकामाःस्थितास्तस्यां
येदिव्यायेचमानुषाः रसवच्चप्रभूतंचभक्ष्यंभोज्यमरिंदम ५ लेह्यंचोष्यंचपेयंचहृद्यंस्वादुमनोहरं पुण्यगंधाःस्रजस्तस्मिन्नित्य
कामफलाद्रुमाः ६ रसवंतिचतोयानिशीतान्युष्णानिचैवह तस्यांराजर्षयः पुण्यास्तथाब्रह्मर्षयोऽमलाः ७ यमंवैव
स्वतंतातप्रहृष्टाः पर्युपासते ययातिर्नहुषः पूरुर्मांधातासोमकोनृगः ८ त्रसदस्युश्चराजर्षिः कृतवीर्यः श्रुतश्रवाः अ
रिष्टनेमिःसिद्धश्चकृतवेगः कृतिर्निमिः ९ प्रतर्दनः शिविर्मत्स्यः पृथुलाक्षोबृहद्रथः वार्तोमरुत्तः कुशिकः सांकाश्यः
सांकृतिर्भवः १० चतुरश्वः सदश्वोर्मिः कार्तवीर्यश्चपार्थिवः भरतः सुरथश्चैवसुनीथोनिशठोनलः ११ दिवोदास।
श्चसुमनाश्चैवअंबरीषोभगीरथः व्यश्वः सदश्वोवध्र्यश्वः पृथुवेगः पृथुश्रवाः १२ पृषदश्वोवसुमनाः क्षुपश्चसुमहाबलः
रुषद्गुर्वृषसेनश्चपुरुकुत्सोध्वजीरथी १३

पनसादिकं फलमुद्भवति कामानुसारादित्यर्थः १३ १३ १३ १३

स० २३

१७ रामइति रामलक्ष्मणयोर्विष्णुरेवोमदेवः तस्यानावरणयोरपि प्रतिमारूपेणाउपासकानुग्रहार्थमत्रावस्थानं बोध्यं १८ धृतराष्ट्रश्चैक शतमिति पुराणोक्तप्रायेणाधिका
राणामेव कीर्तनं नत्वेषां च प्रतिकल्पं समाननामरूपकर्मत्वादनेक कल्पधर्मसभावासिनां तेषां च हुतं युक्तं सेनापत्यादिशब्दवदधिकारवाचित्वाद्धृतराष्ट्रादिशब्दानां १९

आर्ष्टिषेणो दिलीपश्च महात्मा चाप्युशीनरः औशीनरिः पुण्डरीकः शर्य्यातिः शरभः शुचिः १४ अङ्गो रिष्टश्च वेनश्च दुष्यन्तः संजयो
जयः भंगासुरिः सुनीथश्च निषधोऽथ वहीनरः १५ करंधमो वाह्लिकश्च सुद्युम्नो बलवान्मधुः ऐलो मरुत्तश्च तथा बलवान्पृथिवीप
तिः १६ कपोतरोमा तृणकः सहदेवार्जुनौ तथा अश्वः साश्वः कृशाश्वश्च शशबिन्दुश्च पार्थिवः १७ रामो दाशरथिश्चैव लक्ष्म
णोऽथ प्रतर्दनः अलर्कः कक्षसेनश्च गयो गौराश्व एव च १८ जामदग्न्यश्च रामश्च नाभागसगरौ तथा भूरिद्युम्नो महाश्वश्च पृथ्वा
श्वो जनकस्तथा १९ राजा वैण्यो वारिषेणः पुरुजिज्जनमेजयः ब्रह्मदत्तस्त्रिगर्तश्च राजोपरिचरस्तथा २० इन्द्रद्युम्नो भीमजा
नुर्गौरपृष्ठोऽनघो लयः पद्मोऽथ मुचुकुन्दश्च भूरिद्युम्नः प्रसेनजित् २१ अरिष्टनेमिः सुद्युम्नः पृथुलाश्वोऽष्टकस्तथा श
तं मत्स्या नृपतयः शतं नीपाः शतं हयाः २२ धृतराष्ट्राश्चैकशतमशीतिर्जनमेजयाः शतं च ब्रह्मदत्तानां वीरिणामीरिणां
शतं २३ भीष्माणां द्वे शते ये तु भीमानां तु तथा शतं शतं च प्रतिविंध्यानां शतं नागाः शतं हयाः २४ पलाशानां शतं ज्ञेयं
नं काशकुशादयः शान्तनुश्चैव राजेन्द्र पाण्डुश्चैव पिता तव २५ उशंगवः शतरथो देवराजो जयद्रथः वृषदर्भश्च राजर्षिर्बुद्धि
मान्सह मंत्रिभिः २६ ॥ ॥

२४ अयमेव न्यायः पलाशादिष्वपि यद्वाभिमानिदेवतासु जयरत्नाशयवानाहपलाशानामिति २५ २६ २९

राम० २३

३० कालचक्रं चेति संवत्सराद्यभिमानिन्यो देवताः दुष्कृतकर्म्माणः विद्याविहीनकर्ममात्रनिष्ठाः ३१ ३२ ३३ असंबाधा असंकीर्णा ३४ ३५ संन्यासिनः निष्का
मकर्मकर्त्तारः काम्यानां कर्म्मणां त्यागिनो वा पूर्वेषामपि स्यादापस्तंबवचनं तद्यथाम्रे फलार्थे निमित्ते छायागंध इत्यनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यंत इति आनुषं

अथापरे सहस्राणि ये गताः शशबिन्दवः इष्ट्वाश्वमेधैर्बहुभिर्महद्भिर्भूरिदक्षिणैः २७ एते राजर्षयः पुण्याः कीर्त्तिमन्तो बहुश्रुताः
तस्यां सभायां राजर्षे वैवस्वतमुपासते २८ अगस्त्योथ मतंगश्च कालो मृत्युस्तथैव च यज्वानश्चैव सिद्धाश्च ये च योगशरीरिणः २९
अग्निष्वात्ताश्च पितरः फेनपाश्चोष्मपाश्च ये सुधावन्तो बर्हिषदो मूर्त्तिमन्तस्तथापरे ३० कालचक्रं च साक्षाच्च भगवान्हव्यवाहनः ने
रा दुष्कृतकर्म्माणो दक्षिणायनमृत्यवः ३१ कालस्य नयने युक्ता यमस्य पुरुषाश्च ये तस्यां शिंशपपालाशास्तथा काशकुशादयः
३१ उपासते धर्मराजं मूर्त्तिमन्तो जनाधिप ३२ एते चान्ये च बहवः पितृराजसभासदः न शक्याः परिसंख्यातुं नामभिः कर्मभिस्त
था ३३ असंबाधा हि सा पार्थ रम्या कामगमा सभा दीर्घकालं तपस्तप्त्वा निर्मिता विश्वकर्म्मणा ३४ ज्वलन्ती भासमाना च ते
जसा स्वेन भारत तामुग्रतपसो यान्ति सुव्रताः सत्यवादिनः ३५ शान्ताः संन्यासिनः शुद्धाः पूताः पुण्येन कर्म्मणा सर्वे भास्वरदेहा
श्च सर्वे च विरजाम्बराः ३६ चित्रांगदाश्चित्रमाल्याः सर्वे ज्वलितकुंडलाः सुकृतैः कर्मभिः पुण्यैः परिबर्हैश्च भूषिताः ३७ गं
धर्वाश्च महात्मानः संघशश्चाप्सरोगणाः वादित्रं नृत्यगीतं च हास्यं लास्यं च सर्वशः ३८ पुण्याश्च गंधाः शब्दाश्च तस्यां पार्थ समं
ततः दिव्यानि चैव माल्यानि उपतिष्ठन्ति नित्यशः ३९

गिकफलभागित्वदर्शनात्तन्निर्मितेरोपितं अर्थाः दिव्यान्नपानादयः ३६ ३७ ३८ ३९ ३९ ३९

स०
२५

पुष्करैरन्त्रिनमन्दिस्तीर्थविशेषैः मालिनींशोभिनी ५१ अध्यायः १ दिव्यैरितिन्नस्यामिन्तुत्तरश्लोकाद्यस्थलुप्यते अवतानैर्वितानवद्धस्वरूपाख्यारैः लताप्रतानैर्सिताः

शतंशतसहस्राणिधर्मिराणांतमजेश्वरं उपासतेमहात्मानंतपयुक्तामनस्विनः ५० ईदृशीसासभाराजन्नमितराज्ञोमहात्मनः वरु
णस्यापिवक्ष्यामिसभांपुष्करमालिनीं ५१ सभापर्वणियमसभावर्णनं नारदउवाच युधिष्ठिरसभादिव्यावरुणस्यामितप्रभा प्रमाणे
नयथायाम्यांशुभ्रप्राकारतोरणा १ अंतःसलिलमास्थायविहिताविश्वकर्मणा दिव्यैरत्नमयैर्वृक्षैःफलपुष्पप्रदैर्युता २ नील
पीतासितश्यामैःसितैर्लोहितकैरपि अवतानैस्तथागुल्मैर्मंजरीजालधारिभिः ३ तथाशकुनयस्तस्यांविचित्रामधुरस्वराः अनिर्दे
श्यावपुष्मंतःशतशोथसहस्रशः ४ सासभासुखसंस्पर्शानशीतानचघर्मदा वेश्मासनवतीरम्यासितावरुणपालिता ५ यस्यामास्ते
सवरुणोवारुण्याचसमन्वितः दिव्यरत्नांवरधरोदिव्याभरणभूषितः ६ स्रग्विणोदिव्यगंधाश्चदिव्यगंधानुलेपनाः आदित्यास्तत्रवरु
णंजलेश्वरमुपासते ७ वासुकिस्तक्षकश्चैवनागश्चैरावतस्तथा कृष्णश्चलोहितश्चैवपद्मश्चित्रश्चवीर्यवान् ८ कंबलाश्वतरौना
गौधृतराष्ट्रबलाहकौ मणिमान्कुंडधारश्चकर्कोटकधनंजयौ ९ पाणिमान्कुंडधारश्चबलवान्पृथिवीपते प्रह्लादोमूषिकाद
श्चतथैवजनमेजयः १० पताकिनोमंडलिनःफणवंतश्चसर्वशः एतेचान्येचबहवःसर्पास्तस्यांयुधिष्ठिर उपासतेमहात्मानंवरुणं
विगतक्लमाः ११ बलिर्वैरोचनोराजा नरकःपृथिवीजयः संह्रादोविप्रचित्तिश्चकालखंजाश्चदानवाः १२ सुहनुर्दुर्मुखःशंख
ःसुनामासुमतिस्ततः घटोदरोमहापार्श्वःक्रथनःपिठरस्तथा १३ १३ १३

वद्यः ३ वपुष्मंतः प्रशस्तैर्हाः ४ ५ वा नुराणावरुणान्या माध्यावा ६ १३ १३ १३ १३

राम०
२५

२४ २८ संपतता समागच्छता २९ इति सभापर्वणि वरुणसभावर्णनं नामाध्यायः

विश्वरूपः स्वरूपश्च विरूपोथ महाशिराः दशग्रीवश्च वाली च मेघवासा दशावरः १४ टिट्टिभो विटभूतश्च संह्रादश्चेन्द्रतापनः दैत्यदानव
संघाश्च सर्वे रुचिरकुण्डलाः १५ स्रग्विणो मौलिनश्चैव तथा दिव्यपरिच्छदाः सर्वे लब्धवराः शूराः सर्वे विगतमृत्यवः १६ ते तस्यां वरुणं
देवं धर्मपाशधरं सदा उपासते महात्मानं सर्वे सुचरितव्रताः १७ तथा समुद्राश्चत्वारो नदी भागीरथी च सा कालिन्दी विदिशा वेण्वा नर्म
दा वेगवाहिनी १८ विपाशा च शतद्रुश्च चन्द्रभागा सरस्वती इरावती वितस्ता च सिन्धुर्देवनदी तथा १९ गोदावरी कृष्णवेणा कावेरी।
च सरिद्वरा किंपुना च विशल्या च तथा वैतरणी नदी २० तृतीया ज्येष्ठिला चैव शोणश्चापि महानदः चर्मण्वती तथा चैव पर्णाशा च म
हानदी २१ सरयूर्वारवत्याथ लाङ्गली च सरिद्वरा करतोया तथात्रेयी लौहित्यश्च महानदः २२ लंघती गोमती चैव संध्या त्रिःस्रोत
सी तथा एताश्चान्याश्च राजेन्द्र सुतीर्था लोकविश्रुताः २३ सरितः सर्वतश्चान्यास्तीर्थानि च सरांसि च कूपाश्च सप्रस्रवणा देहवन्तो युधि
ष्ठिर २४ पल्वलानि तडागानि देहवन्त्यथ भारत दिशस्तथा मही चैव तथा सर्वे महीधराः २५ उपासते महात्मानं सर्वे जलचरा
स्तथा गीतवादित्रवन्तश्च गंधर्वाप्सरसां गणाः २६ स्तुवन्तो वरुणं तस्यां सर्व एव समासते वारुणश्च तथा मंत्री सुनाभः पर्युपास
ते २७ पुत्रपौत्रैः परिवृतो गोनाम्ना पुष्करेण च सर्वे विग्रहवन्तस्ते तमीश्वरमुपासते २८ एषा मया संपतता वारुणी भरतर्षभ दृ
ष्टपूर्वा सभा रम्या कुबेरस्य सभां शृणु सभापर्वणि वरुणसभावर्णनं ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥

सभावै १ शशिप्रभाप्रावरणा शशिप्रभामपिधावल्यैनतिरस्करोतीत्यर्थः २ विषक्तालग्नारंगैरिति छेदः मनोरहृदयसंह्लादीति पाठे मनः चित्तं रहरयंकरग्वगोलकाह्लति मों सर्वंरः

नारदउवाच सभावैश्रवणीराजञ्शतयोजनमायता विस्तीर्णासप्ततिश्चैवयोजनानिसितप्रभा १ तपसानिर्जितांराजन्स्वयंवैश्रवणेनसा
शशिप्रभाप्रावरणाकैलासशिखरोपमा २ गुह्यकैरुह्यमानाखेविषक्तेवशोभते दिव्याहेममयैरुच्चैःप्रासादैरुपशोभिता ३ महारत्नवतीचि
त्रादिव्यगंधामनोरमा सिताभ्रशिखराकाराप्लवमानेवदृश्यते ४ दिव्याहेममयैरंगैर्विद्युद्भिरिवचित्रिता तस्यांवैश्रवणोराजाविचित्राभरणांब
रः ५ स्त्रीसहस्रैर्वृतःश्रीमानास्तेज्वलितकुंडलः दिवाकरनिभेपुण्येदिव्यास्तरणसंवृते ६ दिव्यपादोपधानेचनिषण्णःपरमासने म
दाराणामुदाराणांवनानिपरिलोडयन् सौगंधिकवनानांचगंधंगंधवहोवहन् नलिन्याश्चालकाख्यायानंदनस्यवनस्यच शीतोहृदयसं
ह्लादीवायुस्तमुपसेवते ८ तत्रदेवाःसगंधर्वागणैरप्सरसांवृताः दिव्यतानैर्महाराजगायंतिस्मसभागताः ९ मिश्रकेशीचरंभाचचित्रसेना
शुचिस्मिता चारुनेत्राघृताचीचमेनकापुंजिकस्थला १० विश्वाचीसहजन्याचप्रम्लोचाउर्वशीइरा वर्गाचसौरभेयीचसमीचीबुद्बुदालता
एताःसहस्रशश्चान्यानृत्यगीतविशारदाः १३ उपतिष्ठंतिधनदंगंधर्वाप्सरसांगणाः अनिशंदिव्यवादित्रैर्नृत्यगीतैश्चसासभा अशून्यारु
चिराभातिगंधर्वाप्सरसांगणैः किन्नरानामगंधर्वानरानामतथापरे १४ मणिभद्रोऽथधनदःश्वेतभद्रश्चगुह्यकः कशेरकोगंडकंडुःप्रद्यो
तश्चमहाबलः १५ कुस्तुंबुरुःपिशाचश्चगजकर्णोविशालकः वराहकर्णस्ताम्रोष्ठःफलकक्षःफलोदकः १६ हंसचूडःशिखावर्तो
हेमनेत्रोविभीषणः पुष्पाननःपिंगलकःशोणितोदःप्रवालकः १७ १७ १७

५ ८ दिव्यतानैःरम्यैस्तानैर्गीतशास्त्रप्रसिद्धैरेकोनपंचाशत्संख्यैः ९ १० ११ १२ १३ १४ १५ १६ १७

वृक्षवासनिकेतश्चवीरवासाश्चभारत एतेचान्येचबहवोयक्षाः शतसहस्रशः १८ सदाभगवतीलक्ष्मीस्तत्रैवनलकूबरः अहंचबहुशस्त
स्यांभवंत्यन्येचमद्विधाः १९ ब्रह्मर्षयोभवंत्यत्रतथादेवर्षयोपरे क्रव्यादाश्चतथैवान्येगंधर्वाश्चमहाबलाः २० उपासतेमहात्मानंतस्यांध
नदमीश्वरं भगवान्भूतसंघैश्चवृतः शतसहस्रशः २१ उमापतिः पशुपतिः शूलभृद्भगनेत्रहा त्र्यंबकोराजशार्दूलदेवीचविगतक्लमा
२२ वामनैर्विकटैः कुब्जैः क्षतजाक्षैर्महारवैः मेदोमांसाशनैरुग्रैरुग्रधन्वामहाबलः २३ नानाप्रहरणैरुग्रैर्वातैरिवमहाजवैः वृतःस
खायमन्वास्तेसदैवधनदंनृप २४ प्रहृष्टाःशतशश्चान्येबहुशःसपरिच्छदाः गंधर्वाणांचपतयोविश्वावसुर्हहाहुहूः २५ तुंबुरुः पर्व
तश्चैवशैलूषश्चतथापरः चित्रसेनश्चगीतज्ञस्तथाचित्ररथोपिच २६ एतेचान्येचगंधर्वाधनेश्वरमुपासते विद्याधराधिपश्चैवचक्रधर्मासह
हानुजैः २७ उपाचरंतितत्रस्मधनानामीश्वरंप्रभुं किन्नराःशतशस्तत्रधनानामीश्वरंप्रभुं आसतेचापिराजानोभगदत्तपुरोगमाः द्रुम
ःकिंपुरुषेशश्चउपास्तेधनदेश्वरं २९ राक्षसाधिपतिश्चैवमहेंद्रोगंधमादनः सहयक्षैःसगंधर्वैःसहसर्वैर्निशाचरैः ३० विभीष
णश्चधर्मिष्ठउपास्तेभ्रातरंप्रभुं हिमवान्पारिपात्रश्चविंध्यकैलासमंदराः ३१ मलयोदर्दुरश्चैवमहेंद्रोगंधमादनः इंद्रकीलःसु
नामश्चतथादिव्यौचपर्वतौ ३२ एतेचान्येचबहवःसर्वेमेरुपुरोगमाः उपासतेमहात्मानंधनानामीश्वरंप्रभुं ३३ नंदीश्वरश्च
भगवान्महाकालस्तथैवच शंकुकर्णमुखाःसर्वेदिव्याःपारिषदास्तथा ३४ ३४ ३४

स० ३७ आस्तेऽस्यास्ता सायोजनीयोयः प्रभवः कदाचित्तु कुबेरसभामध्यास्ते तदा कुबेरोपि भवादनुज्ञां प्राप्य तन्निकरे आसने उपविशति ३८ ४० अध्यायः पितामह १ देव
२६ युगे कृतयुगे २ ३ मानसीमिति स्वेनैव भौतिकत्वव्यावृत्तिः तथाहि आतिवाहिक एव वायं स्लाद यो ह्यस्मिन्देहे कः आधिभौतिकं यावदुद्याग्रहीतं स्थिरभावनादिति वासिष्ठे
क्तौरीसाप्रपंचस्यैवैविध्यं दर्शयते तत्रायं स्थूलभूतमय आधिभौतिकः सूक्ष्मभूतमय आतिवाहिकः स एव चेतिअनंतकार्याकारवांदुसमर्थोतिवाही सूक्ष्मभूतसंघस्ते

त २

काष्ठः क्रीडांसुखोदंतीविजयश्चतपोधिकः श्वेतश्चवृषभस्तत्रनर्दन्नास्तेमहाबलः ३५ धनदं राक्षसाश्चान्ये पिशाचाश्चउपासते पारिष
दैः परिवृतमुपायांतंमहेश्वरं ३६ सदाहि देवदेवेशं शिवं त्रैलोक्यभावनं प्रणम्यमूर्ध्नापौलस्त्योबहुरूपमुमापतिं ३७ ततोभ्यनुज्ञांसं
प्राप्यमहादेवाद्धनेश्वरः आस्ते कदाचिद्भगवान्भवोधनपतेः सखा ३८ निधिप्रवरमुख्यौ च शंखपद्मौ धनेश्वरौ सर्वान्निधीन्प्रगृ
ह्यथउपास्तां वै धनेश्वरं ३९ सा सभा तादृशी रम्या मया दृष्टांतरिक्षगा पितामहसभां राजन्कीर्तयिष्ये निबोधतां ४० सभापर्व
णि धनदसभावर्णनंनाम नारदउवाच पितामहसभां तात कथ्यमानां निबोध मे शक्यते या न निर्देष्टुमेवंरूपेति भारत १
पुरा देवयुगे राजन्नादित्यो भगवान्दिवः आगच्छन्मानुषं लोकं दिदृक्षुर्विगतक्लमः २ चरन्मानुषरूपेण सभां दृष्ट्वा स्वयंभुवः स
तामकथयन्मह्यं दृष्ट्वा तत्त्वेन पांडव ३ अप्रमेयां सभां दिव्यां मानसीं भरतर्षभ अनिर्देश्यां प्रभावेन सर्वभूतमनोरमां ४

ननिर्हृतः इतियोगात् अतएव तत्रदं इहरिलोकरूपे स्वर्गे यन्नदुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदमिति स्वर्गपद निर्वचनं संगच्छते। संभि राम०
न्नं मिश्रं ग्रस्तं भोगोत्तरं पायावहं। अभिलाषः संकल्पः तत्राप्याधिभौतिकस्य तत्त्वं आतिवाहिकः रज्जुरिव भुजंगस्य अस्यापि तत्त्वं चित्तमेव तत्र दिदृक्षुः तत्रचित्तं देह करति २६
तादृशी च प्रजापति सभातोः मानसत्वं तत्र युक्तं ४ ४

६ औषधैः ज्योतिष्मत्यादिभिः कल्पोक्तप्रकारेणासाधितैः ७ ८ ब्रह्मव्रतं हार्दब्रह्मोपासनं ९ ततः स इति सूर्यद्वारेण गतेर्विरजाः प्रयान्तीति ब्रह्मसभाप्रवेशोऽधिदैवं मसक्षस्य
यस्येव द्वारत्वं श्रुत्या ऊर्ध्वमनुरु ज्ञाप्यसूर्यनाडीद्वारा १० एवमिति मानमल्लौ ईश्वरे ज्ञेय रागवत्तनोऽप्रसत्त्वाविति निर्देष्टुं न शक्या क्षेत्रेनेति रज्जुर्यथा भावकत्वमध्यारोपानसक्तसर्पदं उ

श्रुत्वा पुराणमहं तस्याः सभायाः पाण्डवर्षभ दर्शनेप्सुस्तथा राजन्नादित्यमिदमब्रुवं ४ भगवन्द्रष्टुमिच्छामि पितामहसभां शुभां येन वा
तपसा शक्या कर्मणा वापि गोपते ६ औषधैर्वा तथा युक्तैरुत्तमा पापनाशनी तन्ममाचक्ष्व भगवन् पश्येयं तां सभां यथा ७ स त
न्मम वचः श्रुत्वा सहस्रांशुर्दिवाकरः प्रोवाच भरतश्रेष्ठ व्रतं वर्षसहस्रिकं ८ ब्रह्मव्रतमुपास्स्व त्वं प्रयतेनान्तरात्मना ततोऽहं हिमवत्पृ
ष्ठे समारब्धो महाव्रते ९ ततः स भगवान्सूर्यो मामुपादाय वीर्यवान् आगच्छत्तां सभां ब्राह्मीं विपाप्मा विगतक्लमः १० एवं
रूपेति सा शक्या न निर्देष्टुं नराधिप क्षणेन हि बिभर्त्यन्यदनिर्देश्यं वपुस्तथा ११ न वेद परिमाणं वा संस्थानं चापि भारत ना
च रूपं मया तादृक् दृष्टपूर्वं कदाचन १२ सुसुखा सा सदा राजन्न शीता न च घर्मदा न क्षुत्पिपासे न ग्लानिं प्राप्य तां प्राप्नुवन्त्यु
त १३ नानारूपैरिव कृता मणिभिः सा सुभास्वरैः स्तम्भैर्न च धृता सा तु शाश्वती न च सा क्षरा १४ दिव्यैर्नानाविधैर्भावैर्भास
द्भिरमितप्रभैः १५ ॥ ॥

धारादिरूपा न स्थेयमपि वैकुण्ठकैलासादिरूपेणाभातीत्यर्थः ११ १३ स्तम्भैरिति यत्तान क्षरा नापक्षयवती अत एव शाश्वती नित्या एतत्सर्वं ब्रह्मपुरमिति श्रुतेः १४
१५

स०
२७

अतिचंद्रमिति स्वयमित्यस्य अयंस्वयमहंकरोमि त्वयंत्वंकरोषि सस्वयंत्वंकरोषि सस्वयंकृतवानित्यादिप्रयोगादात्मनामत्सगात्मवाचकं सएवप्रभाप्रकाशकं ज्योतिर्यस्याः सा
स्वयंप्रभा जागरेहिसूर्यादीनांघटादिप्रकाशकत्वंदृष्टं नत्वात्मनएवेतिसाधयितुंसूर्याद्यभावकालेस्वप्नेप्रकृत्यात्रायंपुरुषः स्वयंज्योतिरितिश्रुत्यासाटोपमुक्तं १६ तस्या
मितिसः महत्तत्वाभिमानीसूक्ष्मप्रमनआख्यः यंप्रकृत्यस्मर्यतेमनोमहान्मतिर्ब्रह्मापूर्बुद्धिः ख्यातिरीश्वरःप्रज्ञासंविचितिश्चैवस्मृतिश्चपरिपठ्यतेइति अतएव
भगवान्सर्वैश्वर्यवान् देवमाययास्वाविद्ययाविदधल्लोकानितिशेषः विदधद्देवमानुषानितिपाठेपिस्वाविद्ययेत्यध्याहार्यं एकोनविंशत्यपिसर्वसरेषुपदार्थेषु

अतिचंद्रंचसूर्यंचशशिविंनचस्वयंप्रभा दीप्येनेनाकपृष्ठस्थाभासयंतीवभास्करं १६ तस्यांसभगवानास्तेविदधद्देवमानुषान् स्वयमेको
ऽनिशंराजन्सर्वलोकपितामहः १७ उपतिष्ठंतिवाप्येनंप्रजानांपतयः प्रभुं दक्षःप्रचेताःपुलहोमरीचिःकश्यपःप्रभुः १८ भृगुरत्रिर्व
सिष्ठश्चगौतमोथतथांगिराः पुलस्त्यश्चक्रतुश्चैवप्रह्लादःकर्दमस्तथा १९ अथर्वांगिरसश्चैववालखिल्यामरीचिपाः मनोंतरिक्षंवि
द्याश्चवायुस्तेजोजलंमही २० शब्दस्पर्शौतथारूपंरसोगंधश्चभारत प्रकृतिश्चविकारश्चयच्चान्यत्कारणंभुवः २१ अगस्त्यश्चमहाते
जामार्कंडेयश्चवीर्यवान् जमदग्निर्भरद्वाजः संवर्तश्च्यवनस्तथा २२ दुर्वासाश्चमहाभागऋष्यशृंगश्चधार्मिकः सनत्कुमारोभ
गवान्योगाचार्योमहातपाः २३ असितोदेवलश्चैवजैगीषव्यश्चतत्ववित् ऋषभोजितशत्रुश्चमहावीर्यस्तथामणिः २४ आ
युर्वेदस्तथाष्टांगोदेहवांस्तत्रभारत चंद्रमाःसहनक्षत्रैरादित्यश्चगभस्तिमान् २५ वायवःक्रतवश्चैवसंकल्पःप्राणएवच मूर्तिमं
तोमहात्मानोमहाव्रतपरायणाः २६ एतेचान्येचबहवोब्रह्माणंसमुपस्थिताः अर्थोधर्मश्चकामश्चहर्षोद्वेषस्तपोदमः २७ आ
यांतितस्यांसहितागंधर्वाप्सरसांगणाः विंशतिःसप्तचैवान्येलोकपालाश्चसर्वशः २८

ऐंद्रजालिकवदेकस्यैवसमर्थः १७ एकस्यैवचविविधकार्यप्रपंचसार्वात्म्यं अहंमनुरभवंसूर्यश्चेत्यादिश्रुतिप्रसिद्धंप्रपंचयति उपतिष्ठंतीत्यादिनाध्यायशेषेण १८ २० यच्चा
न्यत्कालादिद्रष्टादि २१ २७ सप्तचैवान्येइतिसप्तविंशतिर्नक्षत्राणीत्येके आन्येतुविंशतिर्गंधर्वाप्सरसांगणाः सप्तवान्येगंधर्वमुख्याः तेचहंसोहहाहूहूर्वि
श्वावसुर्वररुचिस्तथा तुंबरुस्तंबरुश्चैवगंधर्वाः सप्तकीर्तिताइति २८ २८ २८ २८

एम०
२७

२९ मंत्रः सामगानाश्रयभूतोऽग्न आयाहीत्यादिः रथंतरं सामविशेषः हरिमान्वसुमानितिकर्मविशेषयोरिन्द्रनामनी। साधिराजानः सेंद्राः। नामद्वंद्वैः अग्नीषोमेंद्राग्न्यादिभिः ३० हवींषि
व्रीहियवादिजीवाः ३१ ३२ उपवेदाः आयुर्वेदो धनुर्वेदो गांधर्ववेदोऽर्थशास्त्रकमिति अंगानि शिक्षादीनि ३३ दुर्गंतरणी वाणी प्रणवः सा च सप्तविधा अकार उकारो मकारः अ

शुक्रो बृहस्पतिश्चैव बुधोंगारक एव च शनैश्चरश्च राहुश्च ग्रहाः सर्वे तथैव च २९ मंत्रो रथंतरं चैव हरिमान्वसुमानपि आदित्याः साधिराजानो
नामद्वंद्वैरुदाहृताः ३० मनुर्वै विश्वकर्मा च वसवश्चैव भारत तथा पितृगणाः सर्वे सर्वाणि च हवींष्यथ ३१ ऋग्वेदः सामवेदश्च यजुर्वेदः
अथापरः अथर्ववेदश्च तथा सद्ग्रंथशास्त्राणि चैव हि ३२ इतिहासोपवेदाश्च वेदांगानि च सर्वशः ग्रहा यज्ञाश्च सोमश्च देवताश्चापि सर्वशः
सावित्री दुर्गतरणी वाणी सप्तविधा तथा मेधा धृतिः श्रुतिश्चैव प्रज्ञा बुद्धिर्यशः क्षमा ३४ सामानि स्तुतिशस्त्राणि गाथाश्च विविधास्त
था भाष्याणि तर्कयुक्तानि देहवंति विशांपते ३५ नाटका विविधाः काव्याः कथाख्यायिककारिकाः तत्र तिष्ठंति ते पुण्या ये चा
न्ये गुरुपूजकाः ३६ क्षणा लवा मुहूर्ताश्च दिवा रात्रिस्तथैव च अर्द्धमासाश्च मासाश्च ऋतवः षट् च भारत ३७ संवत्सराः पंचयुगा
महोरात्रश्चतुर्विधः कालचक्रं च तद्दिव्यं नित्यमक्षयमव्ययं ३८ धर्मचक्रं तथा चापि नित्यमास्ते युधिष्ठिर अदितिर्दितिर्दनुश्चै
व सुरसा विनता इरा ३९ कालिका सुरभी देवी सरमा चाथ गौतमी ४० ४० ४० ४०

ईमात्रा नादः बिंदुः शक्तिरिति सप्तप्रकाराः शांतरूपाधिष्ठानप्राप्तकारणस्थैः संस्कृतप्राकृतपैशाच्यपभ्रंशललितमागधगद्यरूपास्सप्त ३४ ३७ संवत्सराः षष्टिः प्रभ
वाद्यः ते च पंच पंच एकैकं युगं चतुर्विधः मानुषो होरात्रः षष्ट्या घटिकाभिः पित्र्यो मासेन दैवो वत्सरेण ब्राह्मः कल्पेनेति कालचक्रं द्वादशारध्यात्मकं ३८ ४०

स०
२८

वैराजाः विराट्प्रभवाः सप्तपितृगणास्त्वग्निष्वात्तादयः ४९ ५० महादेवोऽपीश्वरोऽपि सहोमो ब्रह्मविद्यासहितस्तत्रैवांतर्गतः ५१ नारायणश्चविद्याप्राप्यः सुहृत्त्वात्मापितत्रैवप्रा

प्राचाकद्रुश्चवैदेव्योदेवतानांचमातरः रुद्राणीश्रीश्चलक्ष्मीश्चभद्राषष्ठीतथापरा ४१ पृथिवीगांगतादेवीह्रीः स्वाहाकीर्त्तिरेवच
सुरादेवीशचीचैवतथापुष्टिररुंधती ४२ संहतिराशानियतिःसृष्टिर्देवीरतिस्तथा एताश्चान्याश्चवैदेव्यउपतस्थुः प्रजापतिं ४३
आदित्यावसवोरुद्रामरुतश्चाश्विनावपि विश्वेदेवाश्चसाध्याश्चपितरश्चमनोजवाः ४४ पितॄणांचगणान्विद्धिसप्तैवपुरुषर्ष
भ मूर्त्तिमंतोवैचत्वारस्त्रयश्चाप्यशरीरिणः ४५ वैराजाश्चमहाभागाअग्निष्वात्ताश्चभारत गार्हपत्यानाकचराः पितरोलोकवि
श्रुताः ४६ सोमपाएकशृंगाश्चचतुर्वेदाःकलास्तथा एतेचतुर्षुवर्णेषुपूज्यंतेपितरोनृप ४७ एतैराप्यायितैःपूर्वंसोम
श्चाप्याय्यतेपुनः तएतेपितरःसर्वेप्रजापतिमुपस्थिताः ४८ उपासंतेचसंहृष्टाब्रह्माणममितौजसं राक्षसाश्चपिशाचाश्च
दानवागुह्यकास्तथा ४९ नागाःसुपर्णाःपशवःपितामहमुपासते स्थावराजंगमाश्चैवमहाभूतास्तथापरे ५० पुरंदर
श्चदेवेंद्रोवरुणोधनदोयमः महादेवःसहोमोऽत्रसदागच्छतिसर्वशः ५१ महासेनश्चराजेंद्रसदोपास्तेपितामहं देवोना
रायणस्तस्मिंस्तथादेवर्षयश्चये ५२ ऋषयोवालखिल्याश्चयोनिजाःयोनिजास्तथा यच्चकिंचित्त्रिलोकेस्मिन्दृश्यतेस्थाणु
जंगमंसर्वंतस्यानयाद्दृष्टमितिविद्धिनराधिप ५३ ५३ ५३ ५३

प्यतइत्यर्थः ५२ एकस्यापिसारोऽल्पमुक्तंउपसंहरतियच्चेति ५३ ५३ ५३

राम०
२८

तन्मात्स्वधिकारिण आहाष्टाशीतीति तेस्मतत्रेत्यादिना यत्कौषीतकीयश्रुतं पर्यंकस्थब्रह्मणा सह संवादादिकं च तदुपबृंहयति ब्राह्म्या श्रिया श्रीमोदमानस्तपः शोभमित्यादिना प्रसिद्ध्या श्र

न१

अष्टाशीतिसहस्राणि ऋषीणामूर्ध्वरेतसां प्रजावतां च पंचाशदृषीणामपि पांडव ५४ ते स्म तत्र यथाकामं दृष्ट्वा सर्वे दिवौकसः प्र
णम्य शिरसा तस्मै सर्वे यांति यथागतं अतिथीनागतान् देवान् दैत्यान् नागांस्तथा द्विजान् यक्षान् सुपर्णान् कालेयान् गंधर्वाप्सरसस्तथा
५६ महाभागानमितधीर्ब्रह्मा लोकपितामहः दयावान् सर्वभूतेषु यथार्हं प्रतिपद्यते ५७ प्रतिगृह्य तु विश्वात्मा स्वयंभूरमितद्युतिः सांत्व
मानार्थसंभोगैर्युनक्ति मनुजाधिप ५८ तथा तैरुपयातैश्च प्रतियद्भिश्च भारत आकुला सा सभा तात भवति स्म सुखप्रदा ५९ सर्व
तेजोमयी दिव्या ब्रह्मर्षिगणसेविता ब्राह्म्या श्रिया दीप्यमाना शुशुभे विगतक्लमा ६० सा सभा तादृशी दृष्टा मया लोकेषु दुर्लभा
सभेयं राजशार्दूल मनुष्येषु यथा तव ६१ एता मया दृष्टपूर्वाः सभा देवेषु भारत सभेयं मानुषे लोके सर्वश्रेष्ठतमा तव ६२ सभापर्व
णि ब्रह्मसभावर्णनं नाम युधिष्ठिर उवाच प्रायशो राजलोकस्ते कथितो वदतां वर वैवस्वतसभायां तु यथा वदसि मे प्रभो १ वरु
णस्य सभायां तु नागास्ते कथिता विभो दैत्येंद्राश्चापि भूयिष्ठाः सरितः सागरास्तथा २ तथा धनपतेर्यक्षा गुह्यका राक्षसास्तथा गं
धर्वाप्सरसश्चैव भगवांश्च वृषध्वजः पितामहसभायां तु कथितास्ते महर्षयः सर्वे देवनिकायाश्च सर्वशास्त्राणि चैव हि ४ शक्रस्य तु
सभायां तु देवाः संकीर्तिता मुने उद्देशतश्च गंधर्वा विविधाश्च महर्षयः ५ ५ ५

महिसंपदस्ता ६० ६२ ब्रह्मसभाध्यायः एतस्य समुपोद्घातयति प्रायश इत्यादिना ५ ५ ५ ५ ५

स०
२९

सहस्रवर्षव्रतसाध्यंब्रह्मसभामनुपेक्ष्यहरिश्चन्द्रस्याप्तामिंद्रसभांशक्रप्रवेशंमत्वातत्साधनंपृच्छतिस्मकएवेति ६ ९ यस्मात्पृच्छसीत्यादिःदाशार्हेनगरीमतीत्यतत्सपरमतांसर्वेषांशक्रोलो
कप्रापकोराजसूयः अनियत्नसाध्यः सिद्धश्चतीव्रानर्थहेतुरतोब्रह्मसभाप्रापकमेवव्रतमनुष्ठेयमिति। अत्रैवान्तरंतत्सामर्थ्यंतुभ्यंभारहरणार्थंब्रह्मणाप्रेरितोनारदः। सर्वसंहारहेतुं

एकस्त्वतुराजर्षिर्हरिश्चंद्रोमहामुने कथितस्तेसभायांवैदेवेंद्रस्यमहात्मनः ६ किंकर्मतेनाचरितंतपोवानियतव्रत येनासौसहशक्रे
णस्पर्द्धतेसुमहायशाः ७ पितृलोकगतश्चैवत्वयाविप्रपितामम दृष्टः पांडुर्महाभागकथंवापिसमागतः ८ किमुक्तवांश्चभगवंस्त
न्ममाचक्ष्वसुव्रत त्वत्तःश्रोतुंसर्वमिदंपरंकौतूहलंहिमे नारदउवाच यन्मांपृच्छसिराजेंद्रहरिश्चंद्रंप्रतिप्रभो तत्तेहंसंप्रवक्ष्यामिमाहा
त्म्यंतस्यधीमतः १० सराजाबलवानासीत्सम्राट्सर्वमहीक्षितां तस्यसर्वेमहीपालाः शासनावनताः स्थिताः तेनैकंरथमास्थाय
जैत्रंहेमविभूषितं शस्त्रप्रतापेनजिताद्वीपाःसप्तजनेश्वर १२ सनिर्जित्यमहींकृत्स्नांसशैलवनकाननां आजहारमहाराजराजसूयंमहा- एज ५
क्रतुं १३ तस्यसर्वेमहीपालाधनान्याजह्रुराज्ञया द्विजानांपरिवेष्टारस्तस्मिन्यज्ञेचतेभवन् १४ प्रादाच्चद्रविणंप्रीत्यायाचकानांनरे
श्वरः यथोक्तंवैतदातेभ्यःपंचगुणाधिकं १५ अतर्पयच्चविविधैर्वसुभिर्ब्राह्मणांस्तदा प्रसर्पकालेसंप्राप्तेनानादिग्भ्यः स
मागतान् १६ भक्ष्यभोज्यैश्चविविधैर्यथाकामपुरस्कृतैः रत्नौघतर्पितैस्तुष्टैर्द्विजैश्चसमुदाहृतं १७ तेजस्वीचयशस्वीचनृपेभ्यो
भ्यधिकोभवत् एतस्मात्कारणाद्राजन्हरिश्चंद्रोविराजते तेभ्योराजसहस्रेभ्यस्तद्विद्धिभरतर्षभ १८ समाप्यचहरिश्चंद्रोमहायज्ञंप्र
तापवान् अभिषिक्तश्चशुशुभेसाम्राज्येननराधिप १९

राजसूयंयुधिष्ठिरद्वाराकारयितुंयुधिष्ठिरंहृष्टंचोद्योजयतीति १० येनेष्टंराजसूयेनमंडलस्येश्वरश्चयः यश्चास्तियश्चाज्ञयाराज्ञः संसम्राडितिशब्द्यते ११ जंबूद्वीपः कुशद्वी
पः शाकः क्रौंचश्चशाल्मलिः गोमेदः पुष्करश्चैवसप्तद्वीपाः प्रकीर्तिताः १२ १५ तेप्रसर्पोस्मिविसर्जनमितिनिघंटुः १६ १७ १८ १९

राम०
२९

२२ त्वाहत्वामाह २३ २७ संकल्पंकामं गंतासिगमिष्यसि २८ ३४ अध्यायः समावर्त्तनंसमाप्तं कृषेरिति २ २ २ २

येचान्येचमहीपालाराजसूयमहाक्रतुं यजंतेतेसहेंद्रेणमोदंतेभरतर्षभ २० येचापिनिधनंप्राप्ताःसंग्रामेष्वपलायिनः तेतत्सदन
मासाद्यमोदंतेभरतर्षभ २१ तपसायेचतीव्रेणत्यजंतीहकलेवरं तेतत्स्थानंसमासाद्यश्रीमंतोभांतिनित्यशः २२ पिताचत्वाहकौंतेय
पांडुःकौरवनंदनः हरिश्चंद्रेश्रियंदृष्ट्वानृपतौजातविस्मयः २३ विज्ञायमानुषंलोकमायांतंमांनराधिप प्रोवाचप्रणतोभूत्वावदेथा
स्त्वंयुधिष्ठिरं २४ समर्थोसिमहींजेतुंभ्रातरस्तेस्थितावशे राजसूयंक्रतुश्रेष्ठमाहरस्वेतिभारत २५ त्वयीष्टवतिपुत्रेहंहरिश्चंद्रवद्र
शुभे मोदिष्येवहुलाःशाश्वतीःसमाःशक्रस्यसंसदि २६ एवंभवतुवक्ष्येहंतवपुत्रनराधिपं भूर्लोकंयदिगच्छेः२यमितिपांडुमथाब्रु
वं २७ तस्यत्वंपुरुषव्याघ्रसंकल्पंकुरुपांडव गंतासित्वंमहेंद्रस्यपूर्वैःसहसलोकतां २८ वहुविघ्नश्चनृपतेक्रतुरेषस्मृतो
महान् छिद्राण्यस्यतुवांछंतियज्ञघ्नाब्रह्मराक्षसाः २९ युद्धंचक्षत्रशमनंपृथिवीक्षयकारणं किंचिदेवनिमित्तंचभवत्यत्रक्ष
यावहं ३० एतत्संचिंत्यराजेंद्रयत्क्षेमंतत्समाचर अप्रमत्तोत्थितोनित्यंचातुर्वर्ण्यस्यरक्षणे ३१ भवएधस्वमोदस्वधनैस्तर्पयच
चद्विजान् एतत्तेविस्तरेणोक्तंयन्मांत्वंपरिपृच्छसि ३२ आपृच्छेत्वांगमिष्यामिदाशार्हनगरींप्रति वैशं एवमाख्यायपार्थेभ्योनार
दोजनमेजय जगामतैर्वृतोराजन्नृषिभिर्यैःसमागतः ३३ गतेतुनारदेपार्थोभ्रातृभिःसहकौरव राजसूयंक्रतुश्रेष्ठंचिंतयामा
सपार्थिवः ३४ सभापर्वणिसमावर्त्तनंसमाप्तं वैशं ऋषेस्तद्वचनंश्रुत्वानिशश्वाससयुधिष्ठिरः चिंतयन्राजसूयेष्टिंनलेभेशर्मभा
रत १ राजर्षीणांचतंश्रुत्वामहिमानंमहात्मनाम् यज्वनांकर्मभिःपुण्यैर्लोकप्राप्तिंसमीक्ष्यच २ २

दीपनामित्युवाचेतिशेषः पाठांतरेतुस्पष्टं ८ १० अविग्रहाः कलहशून्याः ११ वार्द्धुषी वृद्ध्युपजीविका यज्ञसत्वानि कर्तृणां सामर्थ्यानिसद्यः पुष्कलफलप्रदत्वादिविषयाणि
१२ अनुकर्षदारिद्र्यात्‌राजकीयद्रव्यस्यातीतवर्षस्यऋणत्वेनधारणं निष्कर्षकरार्थप्रजापीडनं मूर्छनंवृद्धिः १३ १५ षड्वसुसंधिविग्रहादिषुयस्मप्रियादिकंकर्तुंनेगमे

हरिश्चंद्रवद्राजर्षीरोचमानंविशेषतः यद्वानंयज्ञमाहर्तुंराजसूयमियेषसः ३ युधिष्ठिरस्ततः सर्वानर्चयित्वासभासदः प्रत्यर्चितश्चतैः स
वैयज्ञायैवमनोरथे ४ सराजसूयंराजेंद्रकुरूणामृषभस्तदा आहर्तुंप्रवणंचक्रेमनः संचिन्त्यचासकृत् ५ भूयश्चाद्भुतवीर्यौजा
धर्ममेवानुचिंतयन् किंहितंसर्वलोकानांभवेदितिमनोदधे ६ अनुगृह्णन्प्रजाः सर्वाः सर्वधर्मभृतांवरः अविशेषेणसर्वेषांहितंच
क्रेयुधिष्ठिरः ७ सर्वेषांदीयतांदेयंमुष्णन्कोपमलावुभौ साधुधर्मेतिधर्मेतिनान्यच्छ्रूयतभाषितं एवंगतेततस्तस्मिन्पितरीवा
श्वसन्जनाः नतस्यविद्यतेद्वेष्टाततोस्याजातशत्रुता ९ परिग्रहान्नरेंद्रस्यभीमस्यपरिपालनात् शत्रूणांक्षपणाच्चैवबीभत्सोः सव्यसा
चिनः १० धीमतः सहदेवस्यधर्माणामनुशासनात् वैनत्यात्सर्वतश्चैवनकुलस्यस्वभावतः ११ अविग्रहावीतभयाः स्वकर्मनिर
ताः सदा निकामवर्षाः स्फीताश्चआसन्जनपदास्तथा वार्द्धुषीयज्ञसत्वानिगोरक्षंकर्षणंवणिक् १२ विशेषात्सर्वमेवैतत्संजज्ञे
राजकर्मणा अनुकर्षंचनिष्कर्षंव्याधिपावकमूर्छनं १३ सर्वमेवनतत्रासीद्धर्मनित्येयुधिष्ठिरे दस्युभ्योवंचकेभ्यश्चराज्ञः प्रतिपरस्परं
१४ राजवल्लभतश्चैवनाश्रूयतमृषाकृतं प्रियंकर्तुमुपस्थातुंबलिकर्मस्वकर्मजं १५ अभिहर्तुंनृपाः षट्सुपृथक्जातैश्चनैगमै
: ववृधेविषयस्तत्रधर्मनित्येयुधिष्ठिरे १६ ॥ ॥

वैरिणाभिः सहआसन्नितिशेषः इतरेनृपाः वणिग्वत्स्वेनकरदीकृताइत्यर्थः तत्रतस्मिन्विषयोदेशः १६ १६ ॥ ॥

कामतोयथेष्टंउपयुंजानेः दिव्यान्नवस्त्रादिभोगंकुर्वन्निः यतोलोभजेः विमोहस्थैः राजसैस्त्रिविधैःसत्त्वप्रसादिभिः नाहंकोरपिववृधेवृद्धिमानस्त्रभूत् १० यस्मिन्विषये राजन्राति
पितृतः पितृगुणेः नीतिशिक्षणादिभिःमातृतोमातृगुणैः वात्सल्यादिभिः १९ २० वारुणंगुणंजलधातुजयं सम्राड्गुणंभूलातुजयं २१ २२ अग्नयः अग्निस्थापना

कामतोप्युपयुंजानैराजसैर्लोभजैर्जनैः सर्वमापीड्यसर्वगुणीसर्वसाहःससर्वराट् १७ यस्मिन्नधिकृतः सम्राड्भ्राजमानोमहायशाः यत्र
जानन्नरशार्दूलः पितेवामन्यतस्तथा अनुरक्ताः प्रजाश्चासन्नागोपालाद्द्विजातयः १८ वैशाम् समंत्रिणः सभानाप्यभ्रातृंश्चवदतांवरः
राजसूयंप्रतितदापुनः पुनरपृच्छत १९ तेपृच्छ्यमानाः सहितावचोर्थ्यंमंत्रिणस्तदा युधिष्ठिरंमहाप्राज्ञंयियक्षुमिदमब्रुवन् २० येना
भिषिक्तोनृपतिर्वारुणंगुणमृच्छति तेनराजापितंकृत्स्नंसम्राड्गुणमभीप्सति २१ तस्यसम्राड्गुणार्हस्यभवतः कुरुनंदन राजसू
यस्यसमयंमन्यंतेसुहृदस्तव २२ तस्ययज्ञस्यसमयः स्वाधीनः क्षत्रसंपदा साम्नांषडग्नयोयस्मिंश्चीयंतेशंसितव्रतैः २३ दर्वीहोमानु
पादायसर्वान्यः प्राप्नुतेक्रतून् अभिषेकंचयस्यांतेसर्वजित्तेनचोच्यते २४ समर्थोसिमहावाहोसर्वेतेवशगावयं अचिरात्त्वंमहारा
राज३ जसूयमवाप्स्यसि २५ अविचार्यमहाराजराजसूयेमनः कुरु इत्येवंसुहृदः सर्वेपृथक्चसहचाब्रुवन् २६ सधर्म्यंपांडवस्तेषां
वचः श्रुत्वाविशांपते धृष्टमिष्टंवरिष्ठंचजग्राहमनसारिहा २७ श्रुत्वासुहृद्वचस्तच्चजानंश्चाप्यात्मनः क्षमं पुनः पुनर्मनोदध्रे
राजसूयायभारत २८ सभ्रातृभिः पुनर्धीमानृत्विग्भिश्चमहात्मभिः मंत्रिभिश्चापिसहितोधर्मराजोयुधिष्ठिरः धौम्यद्वैपाय
नाद्यैश्चमंत्रयामासमंत्रवित् २९

यो निस्थंडिलानिसाम्नांसामवेदविहितैः मंत्रैश्चीयंतेरच्यंते २३ दर्वीतिदर्वीहोमाः अग्निहोत्रादिस्तत्प्रभृतीनसर्वान्क्रतून् इष्टिपशुसोमयागान्प्राप्नुतेव्याप्नोतितत्समुदायात्मक
इत्यर्थः। अभिषेकफलंसर्वजित्त्वंश्रोत्रियोगमभिषेचनस्माहूतः समंतंसर्वं तः शब्दीजयन्सर्वोयायेतिश्रुतेः २४ २६ धृष्टंप्रगल्भं इष्टंश्लाघ्यतमं वरिष्ठंश्रेष्ठतमं २७ २९

स० कथंभवेत्फलवतीतिशेषः ३० ३१ आत्मवान्जितचित्तः ३२ विमृश्यैकंकथंयज्ञःसिद्ध्येत्कथंवालोकनाशोनस्यादितिविमर्शंकृतवान् सामर्थ्यंपृथ्वीजेतृयोगंधनसंपत्ति
३१ व्ययागमौधनस्यैव ३४ एतान्सम्यक्संस्मृत्यदिनाधियाचविमृश्य ३५ ३६ सर्वस्मात्तेलोकात्त्रिलोकोदृश्यमत्लाज्ञानातेनस्मात्परंतमसः परस्तादितिश्रुतेः अतएवअ

युधिष्ठिरउवाच इयंयाराजसूयस्यसम्राडर्हस्यसुक्रतोः श्रद्दधानस्यवदतःस्पृहामेसाकथंभवेत् ३० वैशं० एवमुक्तास्तुतेतेनरा
ज्ञाराजीवलोचने इदमूचुर्वचः कालेधर्मराजंयुधिष्ठिरं ३१ अर्हस्त्वमसिधर्मज्ञराजसूयंमहाक्रतु अथैवमुक्तेनृपतावृत्विग्भिरृ
षिभिस्तथा ३२ मंत्रिणोभ्रातरश्चास्यतद्वचः प्रत्यपूजयन् सतुराजामहाप्राज्ञः पुनरेवात्मनात्मवान् ३३ भूयोविमृशतेपार्थो
लोकानांहितकाम्यया सामर्थ्ययोगंसंप्रेक्ष्यदेशकालौव्ययागमौ ३४ विमृश्यसम्यक्चधियाकुर्वन्प्राज्ञोनसीदति नहिय
ज्ञसमारंभः केवलात्मविनिश्चयात् ३५ भवतीतिसमाज्ञाययत्नतःकार्यमुद्वहन् सनिश्चयार्थंकार्यस्यकृष्णमेवजनार्दनं सर्व
लोकात्परंमत्वाजगाममनसाहरिं अप्रमेयंमहाबाहुंकामाज्जातमजंनृषु ३७ पांडवस्तर्कयामासकर्मभिर्देवसम्मतैः नास्य
किंचिदविज्ञातंना किंचिदकर्म्मजं ३८ नसकिंचिन्नविषहेदितिकृष्णममन्यत सतुतांनैष्ठिकींबुद्धिंकृत्वापार्थोयुधिष्ठिरः
३९ गुरुवद्भूतगुरवेप्राहिणोद्दूतमंजसा शीघ्रगेनरथेनाशुसहृतः प्राप्ययादवान् ४२ ॥ ॥ ॥

स०२

प्रमेयंवाङ्मनसातीतत्वात्तद्वत्ः स्वांशजायेयेत्यादिश्रुतीरीश्वरात् नतुकर्म्मवशत्वात् ३७ देवानांसंमतैः बालेनापिपूतनावधादिभिः संमितैरितिपाठेदेवकर्मतुल्यै राम०
रित्यर्थः ३८ नास्येतिसर्वज्ञः सर्वकृत्सर्वसहइतिपादत्रयार्थः ३९ भूतगुरवेपिगुरुवत्आशीर्वादसंदेशादिनायुक्तः ४० ४१ ४२ ४२ ३१

४२ भ्रातापितृस्वसृजेन ४३ ४४ स्वगितां साचसरं कल्पसमर्थं ४५ ४१ अध्यायः सर्वैः सर्वराजयाद्राजसूयेविधिक्रियतेराजयज्ञप्रधानमहात्निर्वर्हणोपायेनजरासं

द्वारकावासिनं कृष्णं द्वारवत्यां समासदत् दर्शनाकांक्षिणं पार्थैर्दर्शनाकांक्षयाच्युतः ४१ इंद्रसेनेन सहित इंद्रप्रस्थमगात्तदा
व्यतीत्य विविधान्देशान्त्वरावान्क्षिप्रवाहनः ४२ इंद्रप्रस्थगतं पार्थमभ्यगच्छज्जनार्दनः संपूज्य पितृवद्भ्राता धर्मराजेन पू
जितः ४३ भीमेन च ततोपश्यत्स्वसारं प्रीतिमान्पितुः प्रीतः प्रीतेन सुहृदा रेमे स सहितस्तदा ४४ अर्जुनेन यमाभ्यां च गु
रुवत्पर्युपासितः तं विश्रांतं शुभे देशे क्षेमिणं कल्यमच्युतं ४५ धर्मराजः समागम्य ज्ञापयत्स्वप्रयोजनं युधिष्ठिर उवाच
प्रार्थितो राजसूयो मे न चासौ केवलेप्सया प्राप्यते येन तत्त्वं हि विदितं कृष्ण सर्वशः ४६ यस्मिन्सर्वं संभवति यश्च सर्वत्र पूज्यते
यश्च सर्वेश्वरो राजा राजसूयं स विंदति ४७ तं राजसूयं सुहृदः कार्यमाहुः समेत्य मे तत्र मे निश्चिततमं तव कृष्ण गिरा भवे
त् ४८ केचिद्धि सौहृदादेव न दोषं परिचक्षते स्वार्थहेतोस्तथैवान्ये प्रियमेव वदंत्युत ४९ प्रियमेव परीप्संते केचिदात्म
नि यद्धितं एवंप्रायाश्च दृश्यंते जनवादाः प्रयोजने ५० त्वं तु हेतूनतीत्यैतान्कामक्रोधौ व्युदस्य च परमं यत्क्षमं लोके यथा
वद्वक्तुमर्हसि ५१ सभापर्वणि वासुदेवागमं कृष्ण उवाच सर्वैर्गुणैर्महाराज राजसूयं त्वमर्हसि जानतस्त्वेव ते सर्वं किंचिद्वक्ष्या
मि भारत १ जामदग्न्येन रामेण क्षत्रं यदवशेषितं तस्मादवरजं लोके यदिदं क्षत्रसंज्ञितं २ ॥ ॥ ॥

रोज२

धववैनैव नायं नरस्याभिप्रेत्याह जानतस्त इत्यादिना १ अवरजं अर्वाग्जातं यद्वा यत्पलायनपरं अवशेषितं क्षत्रं तस्मात् अवरात् नीचात् नीचजं अतएव क्षत्र
संज्ञितं न तु क्षत्रकर्मयोग्यं २ २

तेष्वायंकुलसंकल्पः सर्वक्षत्रसमुदायेनसंकेतितः कृतः यः सर्वजित्सः अस्माकंमध्येसम्राड्राज्ञामधिराजाभविष्यतीतिवक्ष्यमाणः निदेशवाग्भिः पूर्वैःपूर्वैर्वा परे
शवाक्यैर्हप्रसिद्धंततेविदितं निदेशभाग्भिरितिपाठेस्वतंत्रैः क्षत्रियैरित्यर्थः ३ तत्रपूर्वमैलः सम्राड्जातइत्याहैलस्येति ऐलः पुरूरवाः इक्ष्वाकुर्वंशस्य
च मनोः इलाइक्ष्वाकुश्च तत्रइलायाः पुरूरवादयः इक्ष्वाकोर्नाभागादयश्चेतिसोमसूर्यवंश्यराजसुद्युम्नमुख्यौतयोः प्रकृतिंप्रजामिवप्रजाकरदत्वात् कौसीय
प्रकृतिरित्यन्येआहराजानइति श्रेणिवद्धाः तत्तदाम्नायावलीवद्धाइवव्यवस्थयावद्धाः ४ वंशद्वयेप्येवंक्रमतः शतंसम्राजांकुलानिजातानीत्याह ऐलवंश्या

कृतोयंकुलसंकल्पः क्षत्रियैर्वसुधाधिप निदेशवाग्भिस्तत्तेहविदितंभरतर्षभ ३ ऐलस्येक्ष्वाकुवंशस्यप्रकृतिंपरिचक्षते राजानः
श्रेणिवद्धाश्चतथान्येक्षत्रियाभुवि ४ ऐलवंश्यास्तुयेराजंस्तथैवेक्ष्वाकवोनृपाः तानिचैकशतंविद्धिकुलानिभरतर्षभ ५ ययातेस्त्वेव
भोजानांविस्तरोगुणतोमहान् भजतेचमहाराजविस्तारंसचतुर्दिशम् ६ तेषांतथैवतांलक्ष्मींसर्वक्षत्रमुपासते इदानीमेववैराजन्जरा-
संधोमहीपतिः ७ अभिभूयश्रियंतेषांकुलानामभिषेचितः स्थितोमूर्ध्निनरेंद्राणामोजसाक्रम्यसर्वशः ८ सोवनींमध्यमांभु-
क्त्वामिथोभेदममन्यत प्रभुर्यस्तुपरोराजायस्मिन्नेकवशेजगत् ९ ससाम्राज्यंमहाराजप्राप्तोभवतियोगतः तंसराजाजरासंधं।
संश्रित्यकिलसर्वशः १० राजन्सेनापतिर्यातःशिशुपालःप्रतापवान् तमेवचमहाराजशिष्यवत्समुपास्थितः ११ वक्रः
करूषाधिपतिर्मायायोधीमहाबलः अपरौचमहावीर्यौमहात्मानौसमाश्रितौ १२ जरासंधंमहावीर्यंतौहंसडिभकावु-
भौ वक्रदंतःकरूषश्चकरभोमेघवाहनः मूर्ध्नादिव्यमणिंविभ्रद्यमद्भुतमणिंविदुः १३ मुरुंचनरकंचैवशास्तियोयवना-
धिपः अपर्यंतबलोराजाप्रतीच्यांवरुणोयथा १५ १४

इति ५ ययातेः वंशेइतिशेषः अद्यसंप्रति ६ इदानीमेवअभिषिचितानरेंद्रैरितिशेषः ७।८ मध्यमांमध्यरूपांदेशरूपां अस्मदीयांअस्मासुद्वारवतीं
गतेषुभुक्त्वामिथः अस्माभिः सहभेदंवैरंअमन्यत तेनसः अस्मान्सर्वश्रेष्ठान्जित्वासएवसाम्राज्यंप्राप्तइत्याहप्रभुरित्यादिना चतुर्जेस्तुपरोराजेतिपाठे
चतुर्जोजरासंधः द्वेमातरौपिताजराराक्षसीचेतिचतुर्भ्योजातत्वात्
९ ९

भगदत्तो मध्यस्थ इत्याह भगेति १५ १६ त्वमसि त्वं कुंतिभोजएक एवेत्याह मातुल इति १७ पौंड्रकोपि परपक्ष एवास्तीत्याह जरेति १८ २० अस्मच्छ्वशुरो भीष्मकोपि परप

भगदत्तो महाराज वृद्धस्तव पितुः सखा सवाचा प्रणतस्तस्य कर्मणा च विशेषतः १५ स्नेहबद्धश्च मनसा पितृवद्भक्तिमांस्त्वपि प्रतीच्यां दक्षि
णं चांतं पृथिव्याः प्रतियो नृपः १६ मातुलो भवतः शूरः पुरुजित्कुंतिवर्द्धनः स ते सन्नतिमानेकः स्नेहतः शत्रुसूदनः १७ जरासंधं गत
स्त्वेवं पुरा यो न मया हतः पुरुषोत्तमविज्ञातो योसौ चेदिषु दुर्मतिः आत्मानं प्रतिजानाति लोकेस्मिन्पुरुषोत्तमं आदत्ते सततं मोहाद्यः
स चिह्नं च मामकं १९ वंगपुंड्रकिरातेषु राजा बलसमन्वितः पौंड्रको वासुदेवेति योसौ लोकेभिविश्रुतः २० चतुर्थभाङ्महाराज भो
ज इंद्रसखो बली विद्याबलाद्यो व्यजयत्स पांड्यक्रथकैशिकान् २१ भ्राता यस्याकृतिः शूरो जामदग्न्यसमोभवत् स भक्तो मागधं
राजा भीष्मकः परवीरहा २२ प्रियाण्याचरतः प्रह्वान्सदा संबंधिनस्ततः भजतो न भजत्यस्मान्नप्रियेषु व्यवस्थितः २३ न कुलं न ब
लं राजन्नभ्यजानात्तथात्मनः पश्यमानो यशो दीप्तं जरासंधमुपस्थितः २४ उदीच्याश्च तथा भोजाः कुलान्यष्टादश प्रभो जरासंधभ
यादेव प्रतीचीं दिशमाश्रिताः २५ शूरसेना भद्रकारा बोधाः शाल्वाः पटच्चराः सुस्थलाश्च सुकुट्टाश्च कुलिंदाः कुंतिभिः सह २६
शाल्वायनाश्च राजानः सोदर्यानुचरैः सह दक्षिणा ये च पांचालाः पूर्वाः कुंतिषु कोशलाः २७ तथोत्तरां दिशं चापि परित्यज्य भ
यार्दिताः मत्स्याः संन्यस्तपादाश्च दक्षिणां दिशमाश्रिताः २८ तथैव सर्वपांचाला जरासंधभयार्दिताः स्वराष्ट्रं संपरित्यज्य विद्रुताः
र्वतोदिशं २९ कस्यचित्त्वथ कालस्य कंसो निर्मथ्य बांधवान् बार्हद्रथसुते देव्यावुपागच्छद्वृथामतिः ३०

स एवास्तीत्याह चतुर्थेति पृथिव्याश्चतुर्थांशभाक् १९ २३ सः बलं कुलं च आत्मनो न ज्ञातवान् यतो मच्छत्रुपक्षे गत्वा मया जामात्रापि सह कलहमिच्छतीति भावः २४ ३०

स० ३३

३४ कुलेमंत्रीपुरोहितश्चैवेत्यादिनाप्राक्प्रदर्शिते: ३५ नहन्यामोनंतनवंतः वर्षशतेनवभ्रशनतुल्यैस्त्रिभिर्वर्षैरित्यर्थः ३६ ३९ संहंसः हतः मरणतुल्यामूर्छ

प्राप्तिः प्राभिस्थनाम्नोतसहदेवानुजेबले बलेनतेनसज्ञानीनभिभूयतथामतिः ३१ श्रहंसप्राप्तः सततस्मासीरतीवापनयोमहान् भो
जरएजनपइंद्रस्यपीड्यमानेडरात्मना ३२ ज्ञातिचाराणामभीप्मस्दिरस्मत्मभावनाकृता दत्ताक्रूरायसुतनुनामाऊकसुतातदा ३३ सेक
भेगाद्वितीयेनज्ञातिकार्यमयाकृतं हैताकंससुनामानौमयारामेणचाप्युत ३४ भेयतुसमतिक्रांतेजरासंधेसमुद्यते मंत्रोपमंत्रितो
राजन्कुलेरष्टादशावरैः ३५ अनारंभेत्तोनिश्चितामहास्त्रैः शत्रुघातिभिः नहन्यामोवयंतस्यत्रिभिर्वर्षशतेर्बलं ३६ तस्यत्थमरसेका
शावलेनवलिनांवरौ नामभ्यांहंसडिभकावशस्त्रविधनावुभौ ३७ तावुभौसहितौवीरैर्जरासंधश्चवीर्यवान् त्रयस्त्रयाणांलोकानांप ७
र्याप्ताइतिमेमतिः ३८ नहिकेवलमस्माकंयावंतोन्येचपार्थिवाः तथैवतेषामासीच्चबुद्धिर्बुद्धिमतांवर ३९ अथहंसइतिख्यातः क
श्चिदासीन्महान्नृपः रामेणसहतस्तत्रसंग्रामेष्टादशावरे ४० हतोहंसइतिप्रोक्तमथकेनापिभारत तच्छ्रुत्वाडिभकोराजन्यमुना
भस्यमज्जत ४१ विनाहंसेनलोकेस्मिन्नाहंजीवितुमुत्सहे इत्येतांमतिमास्थायडिभकोनिधनंगतः ४२ तथातुडिभकंश्रुत्वाहंसः
परपुरंजयः प्रपेदेयमुनामेवसोपितस्यांन्यमज्जत ४३ तौसराजाजरासंधः श्रुत्वाचनिधनंगतौ पुरंशून्येनमनसाप्रययौभरतर्षभ
४४ ततोवयममित्रघ्नतस्मिन्प्रतिगतेनृपे पुनरानंदिताः सर्वेमथुरायांवसामहे ४५ यदात्वभ्येत्यपितरंसावैराजीवलोचना कंस
भार्याजरासंधंदुहितामागधंनृपं चोदयत्येवरांजेंद्रपतिव्यसनदुःखिता ४६ पतिघ्नंमेजहीत्येवंपुनः पुनररिंदम ततोवयंमहारा

ए०म० ३३

नांप्रापितः ५० ५० ५० श्रीरामचरणम० ॥ ॥ ॥

संरंभंतेनविमनसोव्यपयातानराधिप पृथक्त्वेनमहाराजसंक्षिप्यमहतींश्रियं ४८ पलायामोभयात्तस्यससुतज्ञातिबांधवाः इतिसंचिं
त्यसर्वेस्मप्रतीचींदिशमाश्रिताः ४९ कुशस्थलींपुरींरम्यांरैवतेनोपशोभितां ततोनिवेशंतस्यांचकृतवंतोवयंनृप ५० तथैवदु
र्गसंस्कारंदेवैरपिदुरासदं स्त्रियोपियस्यांयुध्येयुः किमुवृष्णिमहारथाः ५१ तस्यांवयममित्रघ्ननिवसामोकुतोभयाः आलोच्यगिरिमुख्यं
तंमागधंतीर्थमेवच ५२ माधवाः कुरुशार्दूलपरांमुदमवाप्नुवन् एवंवयंजरासंधादभितः कृतकिल्बिषाः ५३ सामर्थ्यवंतः संबंधाद्भ
वंतंसमुपाश्रिताः त्रियोजनायतंसद्मत्रिस्कंधंयोजनावधि ५४ योजनांतेशतद्वारंवीरविक्रमतोरणं अष्टादशावरैर्नद्धंक्षत्रियैर्युद्धदुर्मदैः
५५ अष्टादशसहस्राणिभ्रातॄणांसंतिनः कुले आहुकस्यशतंपुत्राएकैकस्त्रिदशावरः चारुदेष्णः सहभ्रात्राचक्रदेवोथसात्यकिः
अहंचरौहिणेयश्चसांबः शौरिसमोयुधि ५६ एवमेतेरथाः सप्तराजन्नन्यान्निबोधमे कृतवर्माह्यनाधृष्टिः समीकः समितिंजयः
५७ कंकः शंकुश्चकुंतिश्चसप्तैतेवैमहारथाः पुत्रौचांधकभोजस्यवृद्धोराजाचतेदश ५८ वज्रसंहननावीरावीर्यवंतोमहारथाः
स्मरंतोमध्यमंदेशंवृष्णिमध्येव्यवस्थिताः ५९ सत्वंसम्राड्गुणैर्युक्तः सदाभरतसत्तम क्षत्रेसम्राजमात्मानंकर्तुमर्हसिभारत ६०
नतुशक्यंजरासंधेजीवमानेमहाबले राजसूयंत्वयावाप्तुमेषाराजन्मतिर्मम ६१ तेनरुद्धाहिराजानः सर्वेजित्वागिरिव्रजे कंदरेपर्व
तेंद्रस्यसिंहेनेवमहाद्विपाः ६२ सहिराजाजरासंधोयियक्षुर्वसुधाधिपैः महादेवंमहात्मानमुमापतिमरिंदम ६३ ॥ ॥

जं

स० ३४ ध्यायः उक्तं १ ३ राजसूयंदुःप्रापंमत्वाशममेवपरंमन्वानस्त्वाह विशालेति भूमिमिवस्थिराणिश्चयात्मिकाचित्तवृत्तिः साबहुलाविषयभेदाद्बहुप्रकारा दूरंसा
धयित्वेदंरूपान्तरएवविशालाशालेवशालास्त्वावरणंनिरावरणाउद्यलोकायापिसंस्पृश्यति बहुरत्नसमाचिता बहुभिरनंतैरत्नैर्ज्ञानसुलभैर्विषयैर्व्याप्ता

श्चाराध्यतपसोग्राणीनिर्जितास्तेनपार्थिवाः प्रतिज्ञायाश्चपारंसगतः पार्थिवसत्तम सहिनिर्जित्यनिर्जित्यपार्थिवान्स्वनगरंतान्
पुरमानीयवध्यांश्चचकारपुरुषर्षभ ६५ वयंचैवमहाराजजरासंधभयात्तदा मथुरांसंपरित्यज्यगताद्वारवतींपुरीं ६६ यदि
त्वेतन्महाराजयज्ञंप्राप्तुमभीप्ससि यतस्वतेषांमोक्षायजरासंधवधायच ६७ समारंभोनशक्योयमन्यथाकुरुनंदन राज
सूयस्यकार्त्स्न्येनकर्तुंमतिमतांवर ६८ इत्येषामेमतोराजन्यथावामन्यसेनघ एवंगतेममाचक्ष्वस्वयंनिश्चित्यहेतुभिः
६९ महाभारतेसभापर्वणि युधिष्ठिरउवाच उक्तंत्वयाबुद्धिमतायन्नान्योवक्तुमर्हति संशयानांहिनिर्मोक्तात्वन्नान्यो
विद्यतेभुवि १ गृहेगृहेहिराजानः स्वस्यस्वस्यप्रियंकराः नचसाम्राज्यमाप्तास्तेसम्राट्शब्दोहिकृत्स्नभाक् २ कथंपरा
नुभावज्ञः स्वंप्रशंसितुमर्हति परेणसमवेतस्तुयः प्रशस्यः सपूज्यते ३ विशालाबहुलाभूमिर्बहुरत्नसमाचिता दूरंग
म१ त्वाविजानातिश्रेयोवृष्णिकुलोद्वह ४

तः पुरुषः कोयंपुरुषस्यबलायबलंनजानाति सदूरंगत्वाबुद्धेः परांनिष्ठांप्रत्यगात्मरूपांप्राप्यश्रेयोमोक्षाख्यंविजानातिनान्यथाबहुषुदुःसाधेष्वर्थेषुव्यासक्तचित्तत्वात् एम० ३४
यथोक्तंभगवता व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनामिति व्यवसायस्तत्त्वनिश्चयइति ४ ॥ ॥

यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः नालमेकस्यतत्सर्वमितिमत्वाशमंव्रजेदित्युक्तेः शमएवश्रेयानित्याहशममिति प्रांचस्त्वभूमिर्मंत्रभूमिः मंत्रस्यविषयःविशा
लाविस्तीर्णाबहुशाखापुरुषभेदेनबुद्धिभेदात् बहुलाबहुरूपायविस्फुरणात्। अतएवबहुभिर्मंत्रैर्ज्ञैः सहमंत्रोनेति बहुभिर्बहिरापहस्त्यश्वरथमित्रत्वोपमतिभिरनेके
रनेकैरर्थैः समन्विता एतस्यांचमंत्रभूमौविगाह्यमानायांदूरंगत्वाअंगपंचकषड्गुणशक्तित्रयसिद्धित्रयसंधापायादिसमस्तनीतिभूमिमवगाह्य। अतस्त्वमेवसर्वज्ञोऽस

शममेवपरंमन्येप्रशमात्क्षेमंभवेन्मम आरंभेपारमेष्ठ्यंतुनप्राप्यमितिमेमतिः ५ एवमेतेहिजानंतिकुलेजाताममनस्विनः कश्चिन्न
शचिरेतेषांभवेत्प्रेष्ठोजनार्दन ६ वयंचैवमहाभागजरासंधभयात्तदा शंकिताः स्ममहाभागदौरात्म्यात्तस्यचानघ ७ अहंहितव
दुर्द्धर्षभुजवीर्याश्रयःप्रभो नात्मानंबलिनंमन्येत्वयिपितस्माद्धिशंकिते ८ त्वत्सकाशांचरामाच्चभीमसेनाच्चमाधव अर्जुनाद्वा
महाबाहोहंतुंशक्योनवेत्तिवै ९ एवंजानन्हिवार्ष्णेयविमृशामिपुनःपुनः त्वंमेप्रमाणभूतोसिसर्वकार्येषुकेशव तच्छ्रुत्वाच
ब्रवीद्भीमोवाक्यंवाक्यविशारदः १०

द्वितीयोकार्याकार्यनिश्चयेवेत्तीतिभावः इति शमस्वीकारेहेतुमाह आरंभेराजसूयारंभेक्रतुफलंपारमेष्ठ्यंपरमेष्ठिताराज्यं दुःप्रापंअप्राकृतत्वादस्माकमित्यर्थः ५ कुलमु[illegible]दि
ष्याह एवमिति। एतेस्मदस्मदीयाः सभासदः मनस्विनोभीमादयः श्रेष्ठः स्पर्शवान्जेतुंसमर्थोभविष्यतीतिजानंति ६ नत्वस्माकंमध्येतादृशः कश्चिदस्तीत्याह व
यंचेति ७ शंकायांहेतुमाह अहंहीति ८ तथापित्वत्प्रभृतीनांचतुर्णांमध्येकश्चिदन्नंहंतुंसमर्थोस्तिनवेतिविमृशामियुष्माकमप्यनेनशक्तिंत्वंजानन्नित्याह
त्वत्सकाशादिति १०

स०
३५

११ नीत्वार्थान्नीतिप्राप्यानर्थान् नीत्वेतित्रृतीयांतं वा १२ मागधंजरासंधं भीमं प्रकोपयन्कृष्ण उवाच अर्थानिति बालः अव्युत्पन्नः अनुबंधे विपाके अर्थपरायणः स्वकार्यैकत
त्परः १४ न मृष्यंति न विचारयंति यौवनाश्विर्मांधाता जयाञ्जेतव्यान्वाह्यांतरशत्रूञ्जित्वा जयाद्रथः पंचसाम्राज्यहेतवइतिभावः हित्वाकरानिति पाठे करस्मादयः १५
सर्वाकारं जयादिपंचकप्रकारं यौवनाश्विप्रभृतयः एकैकेन गुणेन साम्राज्यं प्राप्ताः त्वं तु तत्सर्वैरपि गुणैरिच्छसीति भावः १६ तानिव गुणा [illegible] नाह निग्रहस्थानि [illegible] ग्रहमर्हंतीति
निग्राह्याः विजिताः शत्रव एव लक्षणं ध्वजो यस्य साम्राज्यस्य एतेन जयश्चैकं तत्र मुख्यमित्युक्तं न च यौवनाश्वदृष्टप्राप्तिः पालनं भगीरथे प्राप्तिरपि साम्राज्यलक्षणं [illegible] सेक

भीम उवाच अनारंभपरो राजा वल्मीक इव सीदति दुर्बलश्चानुपायेन बलिनं योऽधितिष्ठति ११ अतंद्रितस्तु प्रायेण दुर्बलो बलिनं रिपुं
जयेत्सम्यक्प्रयोगेण नीत्यार्थानात्मनो हितान् १२ कृष्णे नयो मयि बलं जयः पार्थे धनंजये मागधं साधयिष्याम इष्टिं त्रय इवाग्नयः १३ कृ
ष्ण उवाच अर्थानारभते बालो नानुबंधमवेक्षते तस्मादरिं न मृष्यंति बालादर्थपरायणात् १४ हित्वा करान्यौवनाश्विः पालनाच्च भगीरथः
कार्तवीर्यस्तपोवीर्याद्बलात्तु भरतो विभुः १५ ऋद्ध्या मरुत्तस्तान्पंच सम्राजस्त्वनुशुश्रुम साम्राज्यमिच्छतस्ते तु सर्वाकारं युधिष्ठिर
१६ निग्राह्यलक्षणं प्राप्तो धर्मार्थनयलक्षणैः १७ बार्हद्रथो जरासंधस्तद्विद्धि भरतर्षभ नैनमन्वरुध्यंत कुलान्येकशतं नृपाः
१८ तस्मादिह बलादेव साम्राज्यं कुरुते हि सः १९ १९ ॥ऽपा३ ॥ ॥

रेणानुबंधेन योऽयं साच धर्मादिलक्षणैः सहितेति योऽयं धर्मः योगः कार्तवीर्ये अर्थाद्वृद्धिर्मरुत्ते नयो नीतिर्बलं भरते १७ बार्हद्रथो जरासंधस्त्वतः प्राकृतेत्वान्वश्या
ननुमन्यन्त एवमेवसतां युगे निग्राह्यलक्षणं प्राप्तो धर्मार्थिनयलक्षणैरिति पठंति जरासंधस्तत्साम्राज्यं निरुणद्धि साध्यानस्मान् अनुतिष्ठन् सर्वाकारं साम्रा राम०
ज्यमिच्छतस्त्वं जरासंधः प्रतिकूलोऽस्तीति विद्धि नार्हः स एव सम्राडस्तीति चेत् तस्य राजपीडाकरत्वान्नेत्याह नैवेयत्ति १९ ॥ ॥ ३५

ग्राह्यलक्षणं प्राप्तइत्यर्थेन संबंधः किंभूतः सः धर्मार्थिनयलक्षणैः धर्मो लाभो नीतिश्च एतैर्लक्षणैः
सतां युगे संघे एवमेव वयमिव मंत्रान्विचारान्वश्यान्स्व २

२० नः अस्माभिर्नचदृष्टः जरासंधेनस्वभागः अंगीकृतः पुरुषतः मूर्द्धाभिषिक्तेषु पुरुषेषु तेननसर्वेवशीकृताइत्यर्थः २१ २२ शतावरान्शतमूनान् २३ अमरश
नारुद्रैरेवसोयमितिप्रसेकमभिमतानां २३ तदासत्कृतोभवतीत्य थ्यात्तस्येयोज्यं। ततः एतांनिग्रहीतुंहेतोः प्रतिबाधमहेतुमाशास्महे। यतमागधंप्रतिबाधमनन्तरंतो
हेतोरितियोज्यं २४ क्रूरंराजवधाख्यंकर्म्मपशुपतयेबलिदानंप्रवर्त्स्यतेकारयिष्यति २५ तंदुर्बलेन राजाकथंपार्थउपैष्यतीतितत्संदुर्जेयत्वमुक्तापि तत्र

राज्ञभोजोहिराजानोजरासंधमुपासते नचतुष्यतितेनाल्पवाल्पारनयमास्थितः २० मूर्द्धाभिषिक्तंनृपतिंप्रधानपुरुषंबला
त् आरुह्नेनच नोदृष्टोभागः पुरुषतः क्वचित् २१ एवंसर्वान्वशेचक्रेजरासंधः प्रतापवान् तंदुर्बलतरोराजाकथंपार्थउपै
ष्यति २२ प्रोक्षितानांप्रमृष्टानांराज्ञांपशुपतेर्गृहे पशूनामिवकाप्रीतिर्जीवितेभरतर्षभ २३ क्षत्रियः शस्त्रमरणोयदाभव
तिसत्कृतः ततः स्ममागधंसंख्येप्रतिबाधेमयद्वयं २४ षडशीतिः समानीताः शेषाराजंश्चतुर्दश जरासंधेनराजानस्ततः क्रूरं
प्रवर्त्स्यते २५ प्राप्नुयात्सयशोदीप्तंतत्रयोविघ्नमाचरेत् जयेद्यश्चजरासंधंससम्राण्नियतंभवेत् २६ सभापर्वणि युधिष्ठि
रउवाच सम्राड्गुणमभीप्सन्वैयुष्मान्स्वार्थपरायणाः कथंप्रहिणुयांकृष्णसोऽहं केवलसाहसात् १ भीमार्जुनावुभौनेत्रेम
नोमन्येजनार्दन मनश्चक्षुर्विहीनस्यकीदृशंजीवितंभवेत् २ जरासंधबलंप्राप्यदुष्पारंभीमविक्रमं यमोपिविजयेन्नाजौतत्र
वः किंविचेष्टितं ३

यस्त्वसाम्राज्येहेतुरित्याहप्राप्नुयादिति सस्त्वोदेजेतत्यन्यस्त्वभिप्रायः २६ अध्यायः संकाद् एवंजरासंधात्भीषितोराजाकृष्णेनपरस्मादिना श्लोकेनभीमेनोक्तउपायोदु
ष्करइत्याह युष्मान्कृष्णभीमार्जुनान् प्रहिणुयांजरासंधवधार्थमितिशेषः विजेतांजेष्यति यमोपिविजयेन्नाजावितिगौडपाठस्तुयमः यमरोगादुर्बलोपिजरासंधे
संधसहायेसतिविजेष्यतशत्रूनितिशेषः ३ ३

अर्थोतरेदृष्टफलाद्विपरीतफले कार्ये युक्तं पुरुषं प्रतिअनर्थः प्रतिपद्येतप्राप्नोति तस्मात्कार्याकर्तुमिष्टाप्रतिपत्तिः राजसूयबुद्धिः नयुक्ता ४ कार्य्यस्यसंम्यासंक
मेमाअस्मस्मांगंननुक्तहुमात्रस्य कषायंसुलभमि संतेदर्शनात् पारिव्राज्यमेवरोचयेदत्यर्थः ५ ६ वीर्यंउत्साहः पक्षोवासुदेवः भूमिः मंत्रपूर्वकः कार्यनिश्चयः

अस्मिंस्त्वर्थांतरेयुक्तमनर्थः प्रतिपद्यते तस्मान्नप्रतिपत्तिस्तुकार्यायुक्तामतामम ४ यथाहंविमृ शाम्यैकस्तन्नावबुध्यता न्मम सं
न्यासंरोचयेसाधुकार्य्यस्यास्यजनार्दन प्रतिहंतिमनोमेघराजसूयोदुराहरः ५ वैशंपायनउवाच पार्थः प्राप्यधनुःश्रेष्ठमक्षय्येच
महेषुधी रथंध्वजंसभांचैवयुधिष्ठिरमभाषत ६ धनुः शस्त्रंशरावीर्य्यंपक्षोभूमिर्यशोवलं प्राप्तमेतन्मयाराजन्दुष्प्रापंयदभी॥
प्सितं ७ कुलेजन्मप्रशंसंतिवैद्यास्साधुसुनिष्ठिताः वलेनसदृशंनास्तिवीर्य्यंतुममरोचते ८ कृतवीर्य्यकुलेजातोनिर्वीर्य्यः
किंकरिष्यति निर्वीर्य्यंतुकुलेजातोवीर्य्यवांस्तुविशिष्यते ९ क्षत्रियः सर्वशोराजन्यस्यवृत्तिर्द्विषज्जये सर्वैर्गुणैर्विहीनोपि
वीर्य्यवान्हितरेद्रिपून् १० सर्वैरपिगुणैर्युक्तोनिर्वीर्यः किंकरिष्यति गुणाभूतागुणास्सर्वेतिष्ठंतिहिपराक्रमे ११ जयस्येहेतु
ःसिद्धिर्हिकर्म्मदैवंचसंश्रितं संयुक्तोहिवलैः कश्चित्प्रमादान्नोपयुज्यते १२ तेनद्वारेणशत्रुभ्यः क्षीयतेसवलोरिपुः १३

वलंशारीरंतेनास्त्विद्रूपंसामर्थ्यंवैद्याः विद्याः विद्यावंतः चवलेनेतिउत्साहस्यवैश्रेयानित्यर्थः ११ सिद्धिर्योगः अस्यंताभिनिवेशइतियावत्सिद्धिर्निष्पत्तिर्योगक्षेमौरितिवि
ग्रहः तच्चसिद्धिरूपंवीर्यंकर्मदैवपरिस्यंदरैवंभाग्यंतदुभयोपेक्षं नोपयुज्यतेनकार्यक्षमोभवति १२ तेनप्रमादेन शत्रुभ्यः शत्रुतः १३ १३

१४ तस्मादुत्साहवताकर्मैवकर्तव्यंजयायेत्याहजेरेति १५ अकरणेदोषमाह अनारंभइति कर्म्मणइतिशेषः आरब्धमपिप्रतिकूलंचेत्तत्राहगुणान्तैर्वोक्ताद्गुणादिसंपत्ति
रूपात् नैर्गुण्यंपत्यशक्तत्वं १६ पश्चात्अशक्तत्वनिश्चयादूर्द्ध्वं काषायंगैरिकरक्तंवस्त्रं १७ अध्यायः जातस्य १ ३ सुनयस्यशोभनस्यमंत्रस्यअनपायस्यदैवा
दिप्रातिकूल्यहीनस्यसंयोगेप्राप्तीसत्यांपरमउत्कृष्टः क्रमः उपक्रमः सिद्ध्यति तेनचसंगस्याद्वयोर्मेलनेनअसाम्यंअन्यतरोत्कर्षः जायते चकारोहेतौ यतः ह्

ज २

दैन्यंयथाबलवतितथामोहोबलान्विते तावुभौनाशकौहेतूराज्ञाश्रेयोजयार्थिना १४ जरासंधविनाशंचराज्ञांचपरिरक्षणं यदि
कुर्य्यामयज्ञार्थंकिंततः परमंभवेत् १५ अनारंभेहिनियतोभवेद्गुणनिश्चयः गुणान्तिः संश्रयाद्गा न्नैर्गुण्यमन्यसेकथं १६
काषायंसुलभंपश्चान्मुनीनांशममिच्छतां साम्राज्यंतुभवेच्छ्रेयः कांवयंयोत्स्यामहेपरान् १७ सभापर्वणिजरासंधवधे वासुदेवउ
वाच जातस्यभारतेवंशेतथाकुन्त्याः सुतस्यच यावैयुक्तामतिः सेयमर्जुनेनप्रदर्शिता १ नस्ममृत्युंवयंविद्मरात्रौवायदिवा दिवा
दिवा नचापिकंचिदमरमयुद्धेनानुशुश्रुम २ एतावदेवपुरुषैः कार्य्यंहृदयतोषणं नयेनविधिदृष्टेनयदुपक्रमतेपरान् ३
अनयस्यानुपायस्यसंयुगेपरमःक्षयः संशयोजायतेसाम्याज्जयश्चनभवेद्द्वयोः ४ तेवयंनयमास्थायशत्रुदेहसमीपगाः क
थमंतंनगच्छेमवृक्षस्येवनदीरयाः ५ पररंध्रेपराक्रांताः स्वरंध्रावरणेस्थिताः ६ ॥ ॥

योर्युध्यतोः साम्यंनभवतितस्माद्दिनायुद्धंअशक्तत्वनिश्चयायोगादशक्तिशंकयात्सीमवस्थानंपराभवहेतुरिति भावः विपक्षेदोषमाह अनयस्यानुपायस्यसं
युगेपरमक्षयः इति ननुपरस्यापिनयादिमत्त्वेकथंस्वस्यजयः स्यादित्याशंक्याह संशयोजायतेसाम्याज्जयश्चनभवेद्द्वयोरिति द्वयोरुपायादिसाम्येतुद्वयोरपि
परस्परभयाज्जयेसंशयएवभवतिनतुजयः चात्पराजयोवाकिंतुना?रस्येनद्वावपिनिवर्तेरन्नित्यर्थः ४ साम्येप्यारंभेफलमित्याशंक्यस्वस्योत्कर्षमाहसोई
नेतव्यमिति ५ ६

स०
३७

नन्वेवंमहतोराजकस्योत्थापनेनक्रतुविघ्नएवभवेदित्याशंक्याहसम्राडिति ७ ८ उत्कर्षेकामप्राप्तिःसिद्धासाम्प्रतंतुनेवभवेदित्याहएकइतिश्रियंसाम्राज्यलक्ष्मी
तन्नस्मादन्यतरोजपतिस्त्वयाहेतोः अहंत्वयंत्वसौवायंनैवोपलक्षयेकिंतुपरस्परस्यवशयोभविष्यतीत्यर्थः तत्सर्यंचैवेतिपाठेतत्सृजरासंधस्यक्षयं लक्षये संभावये ९

गूढानीकैरनिवल्लैर्नयुद्धेर्दरिभिःसह इतिबुद्धिमतांनीतिःतन्ममापीहरोचते ७ अनवद्यायसंबुद्धाःप्रविष्टाःशत्रुसद्मतत्
शत्रुदेहमुपाक्रम्यतंकामंप्राप्नुयामहे ८ एकोह्येवश्रियंनित्यंबिभर्तिपुरुषर्षभः अन्तरात्मेवभूतानांतत्क्षयेवैबलक्षये
९ अथवैनंनिहत्याजौशेषेणापिसमाहताः प्राप्नुयामततःस्वर्गंज्ञातित्राणपरायणाः १० युधिष्ठिरउवाच कृष्णको
ऽयंजरासंधः किंवीर्यः किंपराक्रमः यस्त्वांस्पृष्ट्वाग्निसदृशंनदग्धःशलभोयथा ११ कृष्णउवाच शृणुराजन्जरासं
धोयद्वीर्योयत्पराक्रमः यथाचोपेक्षितोस्माभिर्बहुशःकृतविप्रियः १२ अक्षौहिणीनांतिसृणामासीत्समरदर्पितः
राजाबृहद्रथोनाममगधाधिपतिर्बली १३ रूपवान्वीर्यसंपन्नःश्रीमानतुलविक्रमः नित्यंदीक्षांकिततनुःशतक्र
तुरिवापरः १४ तेजसासूर्यसंकाशः क्षमयापृथिवीसमः यमान्तकसमःक्रोधेश्रियावैश्रवणोपमः १५ तस्याभिज
नसंयुक्तैर्गुणैर्भरतसत्तम व्याप्तेयंपृथिवीसर्वासूर्यस्येवगभस्तिभिः १६ सकाशिराजस्यसुते यमजेभरतर्षभ उपयेमेम
हावीर्योरूपद्रविणसंयुते तयोश्चकारसमयंमिथःसपुरुषर्षभः १७

निहत्यसंप्राप्य शेषेणावधेनवधहेतुनाशत्रुणा शेषःसंकर्षणोनन्तउपयुक्तेऽनरे वधेइतिविश्वः ज्ञातयःजरासंधवद्धाराजानः १० पतिःपालकः १३
१४ यमोवैवस्वतःअन्तकःकालः १५ १६ १७

राम०
३८

नातिवर्त्तिष्येवेअस्मंनकरिष्ये १८ २२ रत्नैःमुनियोग्यैःउत्कृष्टद्रव्यैः २३ २७ अवानंअम्रवृक्षंसरसमितिपावन् आम्रफलेशलाटुःस्याच्छुकेनानमुमेत्रिशुक्रइत्यमरः अ

नातिवर्त्तिष्यइत्येवंपत्नीभ्यांसन्निधौनृप। सताभ्यांशुशुभेराजापत्नीभ्यांवसुधाधिपः १८ प्रियाभ्यामनुरूपाभ्यांकरेणुभ्यामिवद्विपः ।
तयोर्मध्यगतस्त्वापिराजवसुधाधिप १९ गंगायमुनयोर्मध्येमूर्त्तिमानिवसागरः विषयेषुनिमग्नस्यतस्ययौवनमभ्यगात् २० न
चवंशकरःपुत्रःतस्याजायतकश्चन मंगलैर्बहुभिर्होमैःपुत्रकामाभिरिष्टिभिः नाससादरूपश्रेष्ठःपुत्रंकुलविवर्द्धनं २१ अथका
क्षीवतःपुत्रंगौतमस्यमहात्मनः शुश्रावतपसिश्रान्तमुदारंचंडकौशिकं २२ यदृच्छयागतंतंतुवृक्षमूलमुपाश्रितं पत्नीभ्यांसहितो
राजासर्वैरत्नैरतोषयत् २३ तमब्रवीत्सस्पृष्टिः सत्यवागृषिसत्तमः परितुष्टोस्मिराजेन्द्रवरंवरयसुव्रत २४ ततःसभार्य्यः।
प्रणतस्तमुवाचवृहद्रथः पुत्रदर्शननैराश्याद्बाष्पसंदिग्धयागिरा २५ राजोवाच भगवन्राज्यमुत्सृज्यप्रस्थितोहंतपोवनं किंवरे
णाल्पभाग्यस्यकिंराज्येनाप्रजस्यमे २६ कृष्णउवाच एतच्छ्रुत्वामुनिर्ध्यानमगमत्क्षुभितेंद्रियः तस्यैवचाम्रवृक्षस्यछायायांसमु
पाविशत् २७ तस्योपविष्टस्यमुनेरुत्संगेनिपपातह शुकदष्टंमहारम्यमेकमाम्रफलंकिल २८ तत्प्रगृह्यमुनिश्रेष्ठोहृदयेना
भिमंत्र्यच राज्ञेददावप्रतिमंपुत्रसंप्राप्तिकारणं २९ उवाचचमहाप्राज्ञस्तंराजानंमहामुनिः गच्छराजन्कृतार्थोसिनिवर्त्तस्वनरा
धिप ३० ॥ ॥ ति१

वातमितिपाठेनास्तिपातिपितावातोयस्यतत् २८ २९ ॥ ॥ ॥

स०
३८

यथासमयंयथाप्रतिज्ञंनातिवर्तिष्यतीतिदर्शितत्वात्तरीत्या ३२ ३४ प्रजायेतां सुषुवतुः ३५ स्फिक्कटिपश्चाद्भागः ३६ तेशकले ३७ गर्भसंप्लवेगर्भपातेसति

एतच्छ्रुत्वामुनेर्वाक्यंशिरसाप्रणिपत्यच मुनेः पादौमहाप्राज्ञः सनृपः स्वगृहंगतः ३१ यथासमयमाज्ञायतदासनृपसत्तमः द्वाभ्यामेकंफ
लंप्रादात्पत्नीभ्यांभरतर्षभ ३२ ततस्तामंद्विधाकृत्वाभक्षयामासतुःशुभे भावित्वाद्दपिचार्थस्यसत्यवाक्यतयामुनेः ३३ तयोःसमभव
द्गर्भः फलप्राशनसंभवः तेचदृष्ट्वासनृपतिः परांमुदमवापह ३४ अथकालेमहाप्राज्ञयथासमयमागते प्रजायेतामुभेराजन्शरीरश
कलेनरा ३५ एकाक्षिबाहुचरणाअर्द्धोदरमुखस्फिजे दृष्ट्वाशरीरशकलेप्रवेपतुरुभेभृशं ३६ उद्विग्नेसहसंमंत्र्यतेभगिन्यौतदाबले
सजीवेप्राणिशकलेतत्यजातेसुदुःखिते ३७ तयोर्धात्र्यौसुसंवीतेकृत्वागर्भसंप्लवे निर्गम्यांतः पुरद्वारात्समुत्सृज्याभिजग्मतुः ३८
तेचतुष्पथनिक्षिप्तेजरानामाथराक्षसी जग्राहमनुजव्याघ्रमांसशोणितभोजना ३९ कर्तुकामासुखवहेशकलेसातुराक्षसी
संयोजयामासतदाविधानबलचोदिता ४० तेसमानीतमात्रेतुसकलेपुरुषर्षभएकमूर्तिधरोवीरः कुमारः समपद्यत ४१
ततः सारक्षसीराजन्विस्मयोत्फुल्ललोचना नशशाकसमुद्वोढुंवज्रसारमयंशिशुं ४२ बालस्ताम्रतलंमुष्टिंकृत्वाचास्येनिधा
यसः प्राक्रोशदतिसंरब्धः सतोयइवतोयदः ४३ तेनशब्देनसंभ्रांतः सहसांतः पुरेजनः निर्जगाममनरव्याघ्रराज्ञासहपरंतप
४४ तेचावलेपरिम्लानपयः पूर्णपयोधरे निराशेपुत्रलाभायसहसैवाभ्यगच्छतां ४५ ॥ ॥ ॥

३९ सुखवहे एकीकृतयोर्वहनंहिसुखेनभवतीतिप्रसिद्धं ४० समानीतमात्रेसंयोजितमात्रे ४१ ४२ ४३ ४४ ४५ ५ ॥

राम०
३८

५० अराक्षसीवेभ्रतः ५१ कामयाकामेनयातीतिरच्छाविहारिणी ५२ स्वध्यायः जरा तिष्टमानासुस्थिरा ४ ५ ६ ६

तेथदृष्ट्वातथाभूतेराजानंचेष्टसंततिं तंचवालंसुवलिनंचिंतयामासराक्षसी ४६ नाहंमिविषयेराज्ञोवसंतीपुत्रगृद्धिनः वालंपु
त्रमिमंहंतुंधार्म्मिकस्यमहात्मनः ४७ सातंवालमुपादायमेघलेखेवभास्करं कृत्वाचमानुषंरूपमुवाचवसुधाधिपं ४८ राक्षा
स्युवाच वृहद्रथसुतस्तेयंमयादत्तः प्रगृह्यतां तवपत्नीद्वयेजातोद्विजातिवरशासनात् धात्रीजनपरित्यक्तोमयायंपरिरक्षितः ४९
कृष्णउवाच ततस्तेभरतश्रेष्टकाशिराजसुतेशुभे तंवालमभिपद्याशुपुत्रस्नेहैरभ्यषिंचतां ५० ततः सराजासंहृष्टः सर्वंतदुपल
लभ्यच अपृच्छद्धेमगर्भाभांराक्षसींतामराक्षसीं ५१ राजोवाच कात्वंकमलगर्भाभेममपुत्रप्रदायिनी कामंमेब्रूहिकल्या
णित्वंताप्रतिभासिमे ५२ सभापर्वणि राक्षस्युवाच जरानामास्मिभद्रंतेराक्षसीकामरूपिणी तववेश्मनिराजेंद्रपूजिता
न्यवसंसुखं १ गेहेगेहेमनुष्याणांनित्यंतिष्ठामिराक्षसी गृहदेवीतिनाम्नावैपुरासृष्टास्वयंभुवा २ दानवानांविनाशाय
स्थापितादिव्यरूपिणी योमांभक्त्यालिखेत्कुड्येसपुत्रांयौवनान्वितां ३ गृहेतस्यभवेद्वृद्धिरन्यथाक्षयमाप्नुयात् त्वद्गृ
हेतिष्ठमानाहंपूजिताहंसदाविभो ४ लिखिताचैवकुड्येषुपुत्रैर्वहुभिरावृता गंधपुष्पैस्तथाधूपैर्भक्ष्यभोज्यैः सुपूजिता ५
साहंप्रत्युपकारार्थंचिंतयाम्यनिशंतव तवेमेपुत्रशकलेदृष्टवत्यस्मिधार्मिक ६ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥

११ नंदिकरःसमृद्धिस्तत् १२ अध्यायः कस्य ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स० ३६

संश्लेषितेमयोदेवाकुमारः समपद्यत तवभाग्यान्महाराजहेतुमात्रमहंत्विह ७ मेरुंचाप्यहरिंतुंशक्ताकिंपुनस्तवबालकं गृहसंपूज
नातुष्टामयाप्रत्यर्पितस्तव ८ कृष्णउवाच एवमुक्त्वातुसाराजंस्तत्रैवांतरधीयत संगृह्यकुमारंतंप्रविवेशगृहंनृपः ९ तस्यबा
लस्ययत्कृत्यंतच्चकारनृपस्तदा आज्ञापयच्चराक्षस्यामागधेषुमहोत्सवं १० तस्यनामाकरोच्चैवपितामहसमः पिता जरयासंधितो
यस्माज्जरासंधोभवत्त्वयं ११ सोवर्द्धतमहातेजामगधाधिपतेः सुतः प्रमाणबलसंपन्नोहुताहुतिरिवानलः मातापित्रोर्नंदिकरः
शुक्लपक्षेयथाशशी १२ इतिसभापर्वणिजरासंधवधे कृष्णउवाच कस्यचित्त्वथकालस्यपुनरेवमहातपाः मगधेषूपचक्रामभग
वांश्चंडकौशिकः १ तस्यागमनसंहृष्टः सामात्यः सपुरःसरः सभार्यः सहपुत्रेणनिर्जगामबृहद्रथः २ पाद्यार्घ्याचमनीयैस्तमर्चया
मासभारत सनृपोराज्यसहितंपुत्रंतस्मैन्यवेदयत् ३ प्रतिगृह्यचतांपूजांपार्थिवाद्भगवानृषिः उवाचमागधंराजन्प्रहृष्टेनांतरात्मा
ना ४ सर्वमेतन्मयाज्ञातंराजन्दिव्येनचक्षुषा पुत्रस्तुशृणुराजेंद्रयादृशोयंभविष्यति ५ अस्यरूपंचसत्वंचबलमूर्जितमेवच ए
षश्रियासमुदितः पुत्रस्तवनसंशयः ६ प्रापयिष्यतितत्सर्वंविक्रमेणसमन्वितः अस्यवीर्यवतोवीर्यंनानुयास्यंतिपार्थिवाः ७
पततोवैनतेयस्यगतिमन्येयथाखगाः विनाशमुपयास्यंतियेचास्यपरिपंथिनः ८ देवैरपिविसृष्टानिशस्त्राण्यस्यमहीपते नरु राम०
जंजनयिष्यंतिगिरेरिवनदीरयाः ९ ॥ ॥ ३६

२३ सर्वभूतात्मभूतस्य सर्वेषांभूतानामात्मवत्प्रियतमस्यसर्थः १४ २५ अशस्त्रनिधनौ नविघेतेशस्त्रेणनिधनंययोस्तौ २६ ३६ ३६ ३६

सर्वमूर्द्धाभिषिक्तानामेषमूर्द्धिन्हलिप्यति प्रभाहरोयंसर्वेषांज्योतिषामिवभास्करः १० एनमासाद्यराजानः समृद्धबलवाहनः विनाशमु
पयास्यंतिशलभाइवपावकं ११ एषश्रियः समुदिताः सर्वराज्ञांग्रहीष्यति वर्षास्विवोदीर्णजलानदीर्नदनदीपतिः १२ एषधारयि
तासम्यक्चातुर्वर्ण्यंमहाबलः शुभाशुभमिवस्फीतासर्वसस्यधराधरा १३ अस्याज्ञावशगाः सर्वेभविष्यंतिनराधिपाः सर्वभूतात्मभूत
स्यवायोरिवशरीरिणः १४ एषरुद्रंमहादेवंत्रिपुरांतकरंहरं सर्वलोकेष्वतिबलः साक्षाद्द्रक्ष्यतिमागधः १५ एवंब्रुवन्नेवमुनिः
स्वकार्यमिवचिंतयन् विसर्जयामासनृपंबृहद्रथमथारिहन् १६ प्रविश्यनगरींचापिज्ञातिसंबंधिभिर्वृतः अभिषिच्यजरासंधंमग
धाधिपतिस्तदा १७ बृहद्रथोनरपतिः परांनिर्वृतिमाययौ अभिषिक्तेजरासंधेतदाराजाबृहद्रथः पत्नीद्वयेनानुगतस्तपोवनचा
रोभवत् १८ ततोवनस्थेपितरिमात्रोश्चैवविशांपते जरासंधः स्ववीर्येणपार्थिवानकरोद्वशे १९ वैशंपायनउवाच अथदीर्घ
स्यकालस्य तपोवनचरोनृपः सभार्यः स्वर्गमगमत्तपस्तप्त्वाबृहद्रथः २० जरासंधोपिनृपतिर्यथोक्तंकौशिकेनतत् वरप्रदान
मखिलंप्राप्यराज्यमपालयत् २१ निहतेवासुदेवेनतदाकंसेमहीपतौ जातोवैवैरनिर्बंधः कृष्णेनसहतस्यवै २२ भ्रामयित्वाशतगु
णमेकोनंयेनभारत गदाक्षिप्ताबलवतामागधेनगिरिव्रजात् २३ तिष्ठतोमथुरायांवैकृष्णस्याद्भुतकर्म्मणः एकोनयोजनशतेसा
पपातगदाशुभा २४ दृष्ट्वापौरैस्तदासम्यक्गदाचैवनिवेदिता गदावसानंतत्स्थानंमथुरायाः समीपतः २५ तस्यास्तांहंस
डिभकावशस्त्रनिधनावुभौ मंत्रेमतिमतांश्रेष्ठौ नीतिशास्त्रविशारदौ २६ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥

स०
५०

१७ नीतिहेतोःबलीयसास्वहीनकर्त्तव्येतिनीतिसंदर्थे २८ अध्यायः पतितौ १ २ जयो र्ज्जुनः ३ १० १०

येनोनमयानेकथितौपूर्वमेवमहाबलौ त्रयस्त्रयाणांलोकानांपर्य्याप्ताइतिममतिः २१ एवमेषनरावीरैर्बलिभिः कुकुरांधकैः ब
लिभिश्चमहाराजनीतिहेतोरुपेक्षितः १८ सभापर्वणिराजसंधोत्पत्तिः वासुदेवउवाच पतितौहंसडिभकौकंसश्चसगणोहतः
जरासंधस्यनिधनेकालोयंसमुपागतः १ नशक्योसौरणेजेतुंसर्वैरपिसुरासुरैः प्राणयुद्धेनजेतव्यः सइत्युपलभामहे २
मयिनीतिर्बलंभीमेरक्षिताचावयोर्जयः मागधंसाधयिष्यामइष्टिंत्रयइवाग्नयः ३ त्रिभिरासादितोस्माभिर्विजनेसनराधिपः
नसंदेहोयथायुद्धमेकेनाप्युपयास्यति ४ अवमानाच्चलोभाच्चबाहुवीर्याच्चदर्पितः भीमसेनेनयुद्धायध्रुवमप्युपयास्यति
५ अलंतस्यमहाबाहुर्भीमसेनोमहाबलः लोकस्यसमुदीर्णस्यनिधनायांतकोयथा ६ यदितेहृदयंवेत्सियदितेप्रत्ययोम
यि भीमसेनार्ज्जुनौशीघ्रंन्यासभूतौप्रयच्छमे ७ वैशंपायनउवाच एवमुक्तोभगवताप्रत्युवाचयुधिष्ठिरः भीमार्ज्जुनौसमालो
क्यसंप्रहृष्टमुखौस्थितौ ८ युधिष्ठिरउवाच अच्युताच्युतमामैवंव्याहरामित्रकर्शन पांडवानांभवान्नाथोभवंतंचाश्रितावयं
९ यथावदसिगोविंदसर्वंतदुपपद्यते नहित्वमग्रतस्तेषांयेषांलक्ष्मीःपराङ्मुखी १० १० १०

राम०
५०

॥ ॥ ॥ ॥

वलौघः सेनाप्रवाहः विचक्षणौ प्रोतानयः अन्यथा अंधजडवर्ह्निविक्रमं वलमिसर्थः १६ एतेदेवसदृष्टांतमाहयतइति धीवराः वरधियः पन्नोयस्मिन्देशेनिर्गच्छ
यत्ततस्माकमरणीयस्थानंभवति तेहितेतः द्वितीयार्थेतसिः दृष्टंनिरुपरवंदेशंप्रतिगंडसैन्यंनयंति ननुमत्सुमुखेमहावीरस्याग्रेपातयंतित्र्यत्रदृष्टांतोयथाधीवराः न

निस्तेजस्तुजरासंधोमोस्मिताश्वमद्दीक्षितः एजस्यपक्कमेलब्धोनिरेशेनत्वनिषतः ११ क्षिप्रमेवयथात्वेतत्कार्यंसमुपपद्यते त्वमनेतो
जगन्नाथतथाकुरुनरोत्तम १२ त्रिभिर्भवद्भिर्हिविनानाहंजीवितुमुत्सहे धर्मकामार्थरहितोरोगार्त्तइवदुःखितः १३ नशौरिणाविं
नापार्थोनशौरिः पांडवंविना नाजेयोस्त्यनयोर्लोकेकृष्णयोरितिमेमतिः १४ अयंचवलिनांश्रेष्ठः श्रीमानपिवृकोदरः युवाभ्यां
सहितोवीरः किन्नकुर्यान्महायशाः १५ सुप्रणीतोवलौघोहिकुरुतेकार्यमुत्तमं अंधंवलंजडंप्राहुः प्रणेतव्यंविचक्षणैः १६
यतोहिनिम्नंभवतिनयंतिहितितोजलं यतच्छिद्रंततश्चापिनयंतेधीवराजलं १७ तस्मान्नयविधानज्ञंपुरुषंलोकविश्रुतं
वयमाश्रित्यगोविंदंयतामःकार्यसिद्धये १८ एवंप्रज्ञानयवलंक्रियोपायसमन्वितं पुरस्कुर्वीतकार्येषुकृष्णंकार्यार्थसिद्धये
१९ एवमेवयदुश्रेष्ठंपार्थःकार्यार्थसिद्धये अर्जुनः कृष्णमन्वेतुभीमोन्वेतुधनंजयं नयोजयोवलंचैवविक्रमेसिद्धिमेष्य
ति २० वैशंपायनउवाच एवमुक्तास्ततः सर्वेभ्रातरोविपुलौजसः वार्ष्णेयः पांडवेयौचप्रतस्थुर्मागधंप्रति २१ ॥

दीनजलजीविनः यतच्छिद्रंकुल्यारूपंततः तेनैवमार्गेणजलंचारिरूपंकेदारादिप्रदेशंनयंतिनहृत् १७ वलोपक्षयानीतिरेवश्रेष्ठेत्युपसंहरतितस्मादिति १८
१९ २० २१

परिछदं स्वतिनरं ऊकमं ऊलुकायायादिरूपांसामग्री आछादयतीकृत्य तयासर्वेवर्धंतिरोधायया २२ २४ ईशौनरनारायणौ सर्वाणिनिमेषोन्मेषादिमहाप्रलयं

वर्चस्विनांब्राह्मणानांस्नातकानांपरिछदान् आछादयसुहृद्दर्शनौकेमेनौचैरमितंदितौ: २२ अमर्षावभिततसानांज्ञात्संर्थ्यमुख्य
तेजसा रविसोमाग्निवपुषादीप्तमासीत्तदावपुः २३ इतम्मेतेजराःसंधर्हस्वाभीमयुगोगमौ एककार्य्यसमुद्यतौकृतौयुद्धेपराजितौ
२४ ईशौहितौमहात्मानौसर्वेकार्य्यप्रवर्त्तिनौ धर्म्मकामार्थलोकानांकार्याणांचप्रवर्त्तकौ २५ कुरुभ्यः प्रस्थितास्तेतुमध्येनकु
रुजांगलं रम्यंपद्मसरोगत्वाकालकूटमतीत्यच २६ गंडकीचमहाशोणांसदानीरांतथैवच एकपर्वतकेनद्यः क्रमेणैत्याव्रजंततेते
२७ उत्तीर्यसरयूंरम्यांदृष्ट्वापूर्वांश्चकोशलान् अतीत्यजग्मुर्मिथिलांमालांचर्मण्वतींनदीं २८ अतीत्यगंगांशोणांचत्रयस्तेप्रा
ङ्मुखास्तदा कुशचीरछदाजग्मुर्मागधंक्षेत्रमच्युताः २९ तेशश्वद्गोधनाकीर्णमंबुमंतंशुभद्रुमं गोरथंगिरिमासाद्यददृशुर्माग
धंपुरं ३० सभापर्वणि वासुदेवउवाच एषपार्थमहान्भातिपशुमान्नित्यमंबुमान् निरामयः सुवेश्माढ्योनिवेशोमागधः शुभः
१ वैहारोविपुलः शैलोवराहोवृषभस्तथा तथाऋषिगिरिस्तातशुभाश्चैत्यकपंचमाः २ एतेपंचमहाशृंगाः पर्वताः शीतल
द्रुमाः रक्षंतीवाभिसंहत्यसंहतांगागिरिव्रजं ३ ३

तानिवर्त्तयितुंशीलंययोस्तौनियंतारावित्यर्थः २५ अध्यायः एषमागधः मगधदेशसंबंधीनिवेशः विन्यासः १ २ ३ ३

गौतमसस्क्षयादितिस्थानऐश्वर्यात्तच्चसोषृद्दायांजातोसिकक्षीवदादीनांवंशः मानवंवंशंभजते सगौतमस्तनृपाणामुपर्यनुग्रहः ६ गौतमस्यगृहं गौतमो

पुष्पवेष्टितशाखाग्रैर्गंधवद्भिर्मनोहरैः निगूढाइवलोध्राणांवनैः कामिजनप्रियैः ४ शूद्रायांगौतमोयत्रमहात्मासंशितव्रतः औशीनर्यामजन
यत्काक्षीवाद्यान्सुतान्मुनिः ५ गौतमस्यगृहात्तस्मादथासौतत्रसद्मनि भजतेमागधंवंशंसनृपाणामनुग्रहः ६ अंगवंगादयश्चैवराजा
नः सुमहाबलाः गौतमक्षयमभ्येत्यरमंतेस्मपुरार्जुन ७ वनराजीस्तुपश्येमाः पिप्पलानांमनोरमाः लोध्राणांचशुभाः पार्थगौतमौकः स
मीपजाः ८ अर्बुदः शक्रवापीचपन्नगौशत्रुतापनौ स्वस्तिकस्यालयश्चात्रमणिनागस्यचोत्तमः ९ अपरिहार्यामेघानांमागधामनुनाकृताः कौशि
कोमणिमांश्चैवचक्रातेचाप्यनुग्रहं १० एवंप्राप्यपुरंरम्यंदुराधर्षंसमंततः अर्थसिद्धिंत्वनुपमांजरासंधोभिमन्यते वयमासादनेतस्यदर्पमद्य
हरेमहि ११ वैशंप० एवमुक्त्वाततः सर्वेभ्रातरोविपुलौजसः वार्ष्णेयः पांडवौचैवप्रतस्थुर्मागधंपुरं १२ हृष्टपुष्टजनोपेतंचातुर्वर्ण्यस
माकुलं स्फीतोत्सवमनाधृष्यमासेदुश्चगिरिव्रजं १३ तेतोद्वारमनासाद्यपुरस्यगिरिमुच्छ्रितं बार्हद्रथैः पूज्यमानंतथानगरवासिभिः मा
गधानांसुरुचिरंचैत्यकंसमाद्रवन् १५

कः गौतमसम्बोकोगृहं ८ १३ पुरस्यगिरिंपुरप्राकारसंलग्नंगिरितुल्यंमहान्तंभंतुरुतजश्ऽतिभाषायांप्रसिद्धं १४ चैत्यकंनगरस्तबकं १५ ॥

स॰ टी॰ ४२

स२

चैत्येति मांसादं मांसाहारं ऋषभं वृषभाकारं दैत्यं बृहद्रथ आससाद हतवान् भेरीः दुंदुभीन् मांसनालाभिः मांसेन नद्धा लोध्वनिपरीक्षे तेषां तासां नालाभिराकृतिभिः उपलक्षिता इति योज्यं महतो हि कां-
स्यादिभाजनस्य सकृदाहतस्य चिरकालानुवर्त्ती ध्वनिरिति प्रसिद्धं दर्शे तु मांसशब्देन ह्रादः शां त्वां तालशब्देन मध्यमांगुष्ठ त्रमाणं चोक्तं द्वादशभिर्दशभिर्मात्राभिरिति व्याचक्षते ध्वाकृति-
भिः संमिता इति मध्यमात्वं यो न नालमयत्र समाना तालः करतलेंगुष्ठमध्यमाभ्यां च संमिते गीतकालक्रियामाने तालः खड्गादिमुष्टिष्विति विश्वः मांसनालाभिरिति गौड-

यत्र मांसादमृषभमाससाद बृहद्रथः तं हत्वा मासनालाभितिस्रो भेरीरकारयत् १६ स्वपुरे स्थापयामास तेन चानह्य चर्मणा यत्र ताः प्राणदन्भे-
र्यो दिव्यपुष्पावचूर्णिताः १७ भंक्त्वा भेरीत्रयं तेपि चैत्यप्राकारमाद्रवन् शिरसीव समाघ्नंतो जरासंधजिघांसवः १८ स्थिरं सुविपुलं शृंगं सुम-
हत्तत्पुरातनं अर्चितं गंधमाल्यैश्च सततं सुप्रतिष्ठितं १९ विपुलैर्बाहुभिर्वीरास्तेभिहत्याभ्यपातयन् ततस्ते मागधं हृष्टाः पुरं प्रविविशुस्तदा
२० एतस्मिन्नेव काले तु ब्राह्मणा वेदपारगाः दृष्ट्वा तु दुर्निमित्तानि जरासंधमदर्शयन् २१ पर्यग्निं कुर्वंश्च नृपं द्विरदस्थं पुरोहिताः तत-
स्तच्छांतये राजा जरासंधः प्रतापवान् दीक्षितो नियमस्थोसावुपवासपरोभवत् २२ स्नातकव्रतिनस्ते तु बाहुशस्त्रा निरायुधाः युयुत्सवः प्र-
विविशुर्जरासंधेन भारत २४ भक्ष्यमाल्यापणानां च ददृशुः श्रियमुत्तमां स्फीतां सर्वगुणोपेतां सर्वकामसमृद्धिनीं २५ तां तु दृष्ट्वा
समृद्धिं ते वीथ्यां तस्यां नरोत्तमाः राजमार्गेण गच्छंतः कृष्णभीमधनंजयाः बलाद्गृहीत्वा माल्यानि मालाकारान्महाबलाः २६

पाठे तु मांसस्य नालवद्वेष्टनकर्त्रीभिः मांसनालाभिर्वध्रीभिः १६ तेन चर्मणा च आनद्धा इति व्यवहितेन संबंधः १६ अवचूर्णिताः अवकीर्णाः आसाइमर्थः यत्र पुरस्य गिरेः
१७ १८ चैत्यकं चित्यमाहुः यद्वा चयनेन निर्वृत्तं १९ शृंगं तं गिरिमेव शृंगवदुच्छ्रितं भाषायां मुनाराइति प्रसिद्धं २० २२ पर्यग्निमकुर्वन् ज्वलताउल्मुकेन परितो भ्राम्यमाणेन
पक्षियं पशुमिव पर्यग्निकृतवंतः २३ २६

राम॰ ४२

विरागवसनाः विचित्ररागवसनाः २७ गोवासं गोष्ठं २८ २९ कक्ष्याः द्वारदेशाः उत्तममध्यमाधमजनावस्थितियोग्याः ३० ३८ स्वस्त्यस्तु कुशलं राजन् कुशलं निर्विघ्नं

विरागवसनाः सर्वे स्रग्विणो मृष्टकुण्डलाः निवेशनमथाजग्मुर्जरासंधस्य धीमतः २७ गोवासमिव वीक्षन्तः सिंहा हैमवता यथा शालस्तंभनि-
भास्तेषां चंदनागुरुरूषिताः २८ अशोभंत महाराज बाहवो युद्धशालिनां तान्दृष्ट्वा द्विरदप्रख्यान् शालस्कंधानिवोद्गतान् व्यूढोरस्कान्मागधा-
नां विस्मयः समपद्यत २९ ते त्वतीत्य जनाकीर्णाः कक्ष्यास्तिस्रो नरर्षभाः अहंकारेण राजानमुपतस्थुर्गतव्यथाः ३० तान्पाद्यमधुपर्कार्हान्स-
त्कृतिं गतान् प्रत्युत्थाय जरासंध उपतस्थे यथाविधि ३१ उवाच चैतान्राजासौ स्वागतं वोऽस्त्विति प्रभुः मौनमासीत्तदा पार्थभीमयोर्जनमेजय ३२
तेषां मध्ये महाबुद्धिः कृष्णो वचनमब्रवीत् वक्तुं नायाति राजेंद्र एतयोर्नियमस्थयोः ३३ अर्वाग्निशीथात्परतस्त्वया सार्धं वदिष्यतः यज्ञागारे स्थापयि-
त्वा राजा राजगृहं गतः ३४ ततोऽर्द्धरात्रे संप्राप्ते यातो यत्र स्थिता द्विजाः तस्य ह्येतद्व्रतं राजन्बभूव भुवि विश्रुतं ३५ स्नातकान्ब्राह्मणान्प्राप्ताञ्छ्रुत्वा
स समितिंजयः अप्यर्द्धरात्रे नृपतिः प्रत्युद्गच्छति भारत ३६ तांस्त्वपूर्वेण वेषेण दृष्ट्वा स नृपसत्तमः उपतस्थे जरासंधो विस्मितश्चाभवत्तदा ३७
ते तु दृष्ट्वैव राजानं जरासंधं नरर्षभाः इदमूचुरमित्रघ्नाः सर्वे भरतसत्तम ३८ स्वस्त्यस्तु कुशलं राजन्निति तत्र व्यवस्थिताः तं नृपं नृपशार्दूल प्रेक्षमा-
णाः परस्परं ३९ तानब्रवीज्जरासंधस्तथा पांडवयादवान् आस्यतामिति राजेंद्र ब्राह्मणच्छद्मसंवृतान् ४० अथोपविविशुः सर्वे त्रयस्ते पु-
रुषर्षभाः संप्रदीप्तास्त्रयो लक्ष्म्या महाध्वर इवाग्नयः ४१ तानुवाच जरासंधः सत्यसंधो नराधिपः विगर्हमाणः कौरव्य वेषग्रहणवैकृतान् न स्नातक-
व्रता विप्रा बहिर्माल्यानुलेपनाः ४२

यथास्मान्नयथावत्स्तिसुन राज्यतः स्वस्तिश्चविनाशि मोक्षपदं तत्ते अस्तु कुशलं समस्तं मरिष्यमाणस्य तत्त्वस्य वश्यंभावादिति भावः भाजीवेत्यर्थः ३९ ४१ बहिर्माल्यानु-
लेपनाः बहिः समावर्तनादिनिमित्तं विना ४२

स॰ टी॰ ४३

४२ वाचिवीर्यंनतुक्रियायांविलिंगस्थंअस्मल्लिंगमनन्तकर्मसमर्थः ४६ अर्हणांपूजांअस्मदागमेअस्मान्प्रतिआगमने ४७ ४९ स्नातकत्वंसमर्थयतिहिमौलत्वादिकमपिस्त्री

भवंतोनिनृलोकेस्मिन्विदितंममसर्वशः केयूरंपुष्पवंतश्चभुजैर्ज्याकृतलक्षणैः ४३ बिभ्रतःक्षात्रमोजश्चब्राह्मण्यंप्रतिजानथ एवंविरागवसनाबहि
र्माल्यानुलेपनाः सत्यंवदतकेयूयंसत्यंराजसुशोभते ४४ चैत्यकस्यगिरेःशृंगंभित्वाकिमिवछद्मना अद्वारेणप्रविष्टास्थनिर्भयाराजकिल्बिषात् ४५
वदध्वंवाचिवीर्यंचब्राह्मणस्यविशेषतः कर्मचैतद्विलिंगस्थंकिंवोद्यप्रसमीक्षितं ४६ एवंचमामुपास्थायकस्माच्चविधिनार्हणां प्रणीतांनानुगृह्णी
तकार्यंकिंवास्मदागमे ४७ एवमुक्तेततःकृष्णःप्रत्युवाचमहामनाः स्निग्धगंभीरयावाचावाक्यंवाक्यविशारदः ४८ कृष्णउवाच स्नातकान्ब्राह्मणा
न्राजन्विद्ध्यस्मांस्त्वंनराधिप स्नातकव्रतिनोराजन्ब्राह्मणाःक्षत्रियाविशः ४९ विशेषनियमाश्चैषामविशेषाश्चसंत्युत विशेषवांश्चसततंक्षत्रि
यःश्रियमृच्छति ५० पुष्पवत्सुध्रुवाश्रीश्चपुष्पवंतस्ततोवयं क्षत्रियोबाहुवीर्यस्तुनतथावाक्यवीर्यवान् ५१ प्रगल्भंवचस्तस्यतस्माद्बार्हद्रथेरितं ५८
स्ववीर्यंक्षत्रियाणांतुबाह्वोर्धातान्यवेशयत् तद्दिदृक्षसिचेद्राजन्द्रष्टास्यद्यनसंशयः ५२ अद्वारेणरिपोर्गेहंद्वारेणसुहृदोगृहान् प्रविशंति
नराधीराद्वाराण्येतानिधर्मतः ५३ कार्यवंतोगृहानेत्यशत्रुतोनार्हणांवयं प्रतिगृह्णीमतद्विद्धिएतन्नःशाश्वतंव्रतं ५४ सभापर्वणिजरासंध
वधे जरासंधउवाच नस्मरामिकदावैरंकृतंयुष्माभिरित्युत चिंतयंश्चनपश्यामिभवतांप्रतिवैकृतं १ वैकृतेवासतिकथंमन्यध्वंमामनागसं
अरिंवैब्रूतहेविप्राः सतांसमयएषहि २

क्षत्रियत्वेनसमर्थयतेविशेषेत्यादिना ५० ५१ प्रगल्भंवचस्तस्यवाग्वीर्यत्वस्य ५२ ५३ अद्वारेणेत्यादिनावैरंप्रकाशयति ५४ अथ्यायवैकृतंअपकारः १ कथंअरिंमन्यध्वंतद्
ब्रूतएषःसतांवचनसमयःमर्यादा २

सभा॰ ४३

प्रसज्जति प्रसंजयति त्र्यर्थदूषोपघातं आरोपयति सः क्षत्रियः हि जिनानां कशं गतिं प्राप्नोतीति न संशय इति योजना ३ अपहंति चात्मानं ४ ५ प्रजानां वा नागसं जलमयविपरीत
मर्थं वदस्व ६ वैरमूलं प्रकाशयति कुलेति ७ ८ एनोपगच्छेत् एनः पापं कर्तृ उपगच्छेत् प्राप्नुयात् अधिराट् ९ १० ११ ननु प्रशस्तो ब्राह्मणमालभेतेत्यादिना सर्वज्ञातो

अर्थधर्मोपघाताद्धि मनः समुपतप्यते योनागसि प्रसज्जति क्षत्रियो हि न संशयः ३ अतीतमथावल्लोके धर्मज्ञः सन्महारथः हृजिनां गतिमाप्नोति श्रेय
सोप्युपहंति च ४ त्रैलोक्ये क्षत्रधर्मो हि श्रेयान्वै साधुचारिणां नान्यं धर्मं प्रशंसंति ये च धर्मविदो जनाः ५ तस्मै यस्थितस्येह त्वधर्म्मे नियतात्मनः त्व
नागसः प्रजानां वा प्रमाणं दिव्जलथ ६ कृतमुवाच कुलकार्यं महाबाहो कस्थिरेकः कुलोद्वहः वहूतेयसत्त्रियोगाद्धयमभ्युपतास्तथि ७ त्वयाचोप
इतारंजनृक्षत्रियालोकवासिनः नराः क्रूरमुताघननसे किमनागसं ८ राजाराजः कथं साधून्नहिंसान्नृपतिसत्तम तन्नाजः सम्यग्रहस्तांस्तन्नायो
पजिहीर्षसि ९ त्वस्नांत्तरेनोगच्छेद्धि कृतं वाहंदथलया वर्पहिश्रक्ताधर्मसारस्स्रोधर्मचारिणः १० मनुष्याणां समालंभो न च दृष्टः कदाचन स
कथं मानुषं देवं यष्टुमिच्छसि शंकर ११ स वर्णो हि सवर्णानां पशुसंज्ञां करिष्यसि कोस्मएवं यथाहित्वं जरासंधः प्रयामति १२ यस्मां यस्नामवस्थायां
यत्कर्म करोति यः तस्यां तस्यामवस्थायां तत्फलं समवाप्नुयात् १३ तेलां ज्ञातिक्षयकरं त्वयमार्गानुसारिणः ज्ञातिवृद्धिनिमित्तार्थं विनिहंतुमि
हागताः १४ नास्तिलोके पुमानन्यः क्षत्रियेष्विति चैव यत् मन्यसे स च ते राजन्सुमहान्बुद्धिविप्लवः १५ को हि जानन्नभिजनमात्मवान्
क्षत्रियो नृप नाविशेत्स्वर्गमतुलं रणानंतरमव्ययं १६ स्वर्गं ह्येव समास्थाय रणयज्ञेषु दीक्षिताः जयंति क्षत्रिया लोकांस्तद्विद्धि मनुजर्षभ १७

यानां सर्वकर्मणां मनुष्याणामालंभो देवतार्थं वधः श्रूयते इत्याशंक्याह सवर्णो हीति १२ १५ अभिजनं सज्जातीयं पालनपाजानन् १६ १७ ॥

स० स्वर्गमित्रस्लवेदः यशः नपोवेदोक्तंकर्मच स्वर्गयोनिः सुखहेतुः युद्धेमन्युश्चअव्यभिचारवान्स्वर्गहेतुः वेदादीनांत्ववतादीन्यतिस्वर्गहेतुत्वंमास्तियुद्धेमन्युस्तुनतथे
४४ त्यर्थः १८ एषः युद्धेमन्युः ऐंद्रः इंद्रसंबंधीवैजयंतः मासादः नम्माश्रितैर्हेतुभिरित्यर्थः येनलब्धेन समाहितः शर्णः १९ स्वर्गमार्गहेतोः विग्रहोवैरंअस्माभिःसह यथा
नघपुरापातिशयात् ननथाः मसात्तित्रत्रहेतुः क्षत्रियावमानइत्याहमागधेरितिसैमेरेवनवाहुबलेन। २० २१ विषह्यंत्र्असह्यंविगतः सह्यः सोढुंयोग्यः स्तो

ष३

स्वर्गयोनिर्महद्ब्रह्मस्वर्गयोनिर्महद्यशः स्वर्गयोनिस्तपोयुद्धेमृत्युस्तोऽव्यभिचारवान् १८ एषह्यैंद्रोवैजयंतोगुणैर्नित्यंसमाहितः येनासुरान्पराजित्य
जगत्पातिशतक्रतुः १९ स्वर्गमार्गविपक्षस्यविग्रहोवैयथातव मागधैर्विपुलैस्तैस्तैर्मैर्वाहुबलदर्पितः २० मावमंस्थाः परान्राजन्नास्ति
वीर्यंनरेनरे समंतेजस्त्वयाचैवविशिष्टंवानरेश्वर २१ यावदेतदसंबुद्धंतावदेवभवेत्तव वि[illegible]ह्यमेतदस्माकमतोराजन्ब्रवीतिमे २२
जहित्वंसदृशेष्वेवमानदर्पंचमागध माऽगमः ससुतामात्यः सबलस्त्वयमक्षयं २३ दंभोद्भवः कार्तवीर्यउत्तरश्चवृहद्रथः श्रेयसोह्यवम
न्येहविनेशुः सबलाः नृपाः २४ युयुक्षमानास्त्वत्तोहिनवयंब्राह्मणाध्रुवं शौरिरस्मिहृषीकेशोनृवीरौपांडवाविमौ अनयोर्मातुलेयंचकृ
ष्णमांविद्धितेरिपुं २५ त्वामाह्वयामहेराजनस्थिरोयुध्यस्वमागध मुंचवानृपतीन्सर्वान्गच्छवात्वंयमक्षयं २६ जरासंधउवाच नाजिता
न्वैनरपतीनहमादद्मिकांश्चन अजितः पर्यवस्थाताकोत्रयोनमयाजितः २७

टायस्मतत् यद्धात्तवएवैतौत्त्वलंचअस्माकंविषह्यंसुसहं २२ २४ युयुक्षमाणास्त्वत्तोहि त्वत्तः त्वांयुयुक्षमाणाः योगः कपटेनहेतुमिच्छंतः योगोविप्र
ध्वधातिनीतिविश्वः मुमुक्षमाणाइतिपाठेनृपानितिशेषः ब्राह्मणाध्रुवाइतिपाठेब्राह्मणाधमाः २५ २६ अजितः अस्मैरितिशेषः पर्यवस्थाता राम० ४४
शत्रुः २७

२९ व्यूढेनव्यूहरचनयास्थितेन ३० ३१ हंसडिंभकावेवकौशिकचित्रसेनावित्याहययोरिति ३३ ३४ मधुभिः यादवैः ३५ नहंतुइयेषेत्यन्वयः तत्रहेतुः ब्राह्मीमिति ३६

एकर सर्

क्षत्रियस्यैतदेवाहुर्धर्म्मंकृष्णोपजीवनं विक्रम्यवशमानीयकामतोयत्समाचरेत् २८ देवतार्थमुपाहृत्यराज्ञःकृष्णकथंभयात् अहमद्यविमुच्येयं
क्षात्रंव्रतमनुस्मरन् २९ सैन्यंसैन्येनव्यूढेनएकएकेनवापुनः द्वाभ्यांत्रिभिर्वायोत्स्येहंयुगपत्पृथगेववा ३० वैशंपायनउवाच एवमुक्त्वाजरासंधः
सहदेवाभिषेचनं आज्ञापयत्तदाराजायुयुत्सुर्भीमकर्म्मभिः ३१ सतुसेनापतीराजन्सस्मारभरतर्षभ कौशिकंचित्रसेनंचतस्मिन्युद्धउपस्थिते
३२ ययोस्तेनामनीराजन्हंसेतिडिंभकेतिच पूर्वंसंकथितेपुंभिर्नृलोकेलोकसत्कृते ३३ तंतुराजन्विभुःशौरीराजानंबलिनांवरं स्मृत्वापु
रुषशार्दूलशार्दूलसमविक्रमं ३४ सत्यसंधोजरासंधोभुविभीमपराक्रमं भागमन्यस्यनिर्दिष्टमवध्यंमधुभिर्मृधे ३५ नात्मनात्मव
तांमुख्यइयेष मधुसूदनः ब्राह्मीमाज्ञांपुरस्कृत्यहंतुंहलधरानुजः ३६ सभापर्वणिजरासंधवधे वैशंपायनउवाच ततस्तंनिश्चितात्मानं
युद्धाययदुनंदनः उवाचवाग्मीराजानंजरासंधमधोक्षजः १ कृष्णउवाच त्रयाणांकेनतेराजन्योद्धुमुत्सहतेमनः अस्मदन्यतमेनेहस
ज्जीभवतुकोयुधि २ एवमुक्तःसनृपतिर्युद्धंवव्रेमहाद्युतिः जरासंधस्ततोराजाभीमसेनेनमागधः ३ आदायरोचनांमाल्यंमंगल्यान्यप
राणिच धारयन्नगदान्मुख्यान्निर्वृतीर्वेदमानिच उपतस्थेजरासंधंयुयुत्सुंवैपुरोहितः ४

ऽध्यायः ततस्तं १ आदायपुरोहितइतिसार्द्धसंबंधः अगदान्औषधानि निर्वृतीर्वेदमानिच दुखमूर्छयोः कालेसुखसंज्ञाकराणि २ ३ ४ ४

सभा० ४२

समनह्यत्सन्नद्धोबभूव ५ १० कक्षैःदोर्मूलैःकक्षांप्रकोष्ठगतांरज्जुंधुन्वानौपतः तत्रकक्षेण्वास्फोटंचक्रतुः बाहुमूलास्फालनेनशब्दंगदबंधरज्जुशोषकंपपन्नाविसर्थः ११
१२ चित्रहस्तादिकंहस्तस्यातिवेगेनप्राकुंचनप्रसारणोत्पर्यवधस्वालनमुष्टीकरणानिचित्रहस्तः आदिपदात्पादस्याप्याकुंचनादि कक्षाबंधपरस्परंकक्षायांहस्तौ

कृतस्वस्त्ययनोराजाब्राह्मणेनयशस्विना समनह्यज्जरासंधः क्षात्रंधर्ममनुस्मरन् ५ अवमुच्यकिरीटंसकेशान्समनुगृह्यच उदतिष्ठज्जरासंधो
वेलातिगइवार्णवः ६ उवाचमतिमान्राजाभीमंभीमपराक्रमः भीमयोत्स्येत्वयासार्धंश्रेयसानिर्जितंवरं ७ एवमुक्त्वाजरासंधोभीमसेन
मरिंदमः प्रत्युद्ययौमहातेजाः शक्रंबलइवासुरः ८ ततः संमंत्र्यकृष्णेनकृतस्वस्त्ययनोबली भीमसेनोजरासंधमाससादयुयुत्सया ९ त
तस्तौनरशार्दूलौबाहुशस्त्रौसमीयतुः वीरौपरमसंहृष्टावन्योन्यजयकांक्षिणौ १० करग्रहणपूर्वंतुकृत्वापादाभिवंदनं कक्षैः कक्षांविधु
न्वानावास्फोटंतत्रचक्रतुः ११ स्कंधेदोर्भ्यांसमाहत्यनिहत्यचमुहुर्मुहुः अंगमंगैःसमाश्लिष्यपुनरास्फालनंविभो १२ चित्रहस्तादिकंकृ
त्वाकक्षाबंधंचचक्रतुः गलगंडाभिघातेनसस्फुलिंगेनचाशनिं १३ बाहुपाशादिकंकृत्वापादाहतशिरावुभौ उरोहस्तंततश्चक्रेपूर्णकुंभौ
प्रयुंजतौ १४

कृत्वाबंधनं गलेतिगलेगंडेनभालदेशेनाभिघातस्तेन पाषाणसदृशांगत्वात्तयोरभिघातेनविस्फुलिंगोत्पन्नाऽशनिंवज्रमिवससृजतुरित्यर्थः १३ बाहुपाशा एम०
दिकंचरणपाशश्चादिशब्दार्थः पादाभ्यामाहताः शिराः स्नायवोयाभ्यांतौ दृढप्रहारेणनाडीपर्यंतमपिवेदनावंतावित्यर्थः उरोहस्तंउरसिचपेटाप्रहारं पूर्णकुंभौप्र ४५
युक्तांगुलिभ्यांहस्ताभ्यांपरशिरसः पीडनं पूर्णकुंभः १४

द्विलं परस्परं द्वावपि चक्रतुरिति संबंधः द्विलं १५ तलेन चपेटया १६ आहत्य शत्रुदेहे शीघ्रं संकुला बाहुभिः वेष्टुलाद्दावपि मिथः उदरं आदाय प्रचक्रतुः प्रविक्षिपतुः क्र
विशेषःस्फुटं १७ एवं कक्षामुपार्श्वेच प्रचक्रतुः तत्क्षणंतौ तत्क्षलनं कारणं गात्रसंकोचइत्यर्थः तद्वंतौ अधोहस्तं उदरस्याधस्तात् हस्तं कृत्वा हस्ताभ्यां मुरस्माव
स्फालकंठे स्वोरसि वक्रंठोरः समीपे आनीय आक्षिपत आस्फालितवान् १८ शृंखलमूलं संबंधनजातम् अंगं परामर्शं बाहुभ्यां उदरादिनिपीडनेनसंपूर्णं मूर्छा १९ त

कारसंपीडनं कृत्वा गर्जंतौ वारणाविव नर्दंतौ मेघसंकाशौ बाहुप्रहरणावुभौ १५ तलेनाहन्यमानौ तु अन्योन्यं कृतवीक्षणौ सिंहाविव सुसंक्रु
द्धौ बाहूबाहुप्रयुध्यतां १६ अंगेनांगं समापीड्य बाहुभ्यामुभयोरपि आहत्य बाहुभिश्चापि उदरं च प्रचक्रतुः १७ उभौ कक्षां सुपार्श्वे तु तत्क्षणं
तौ च शिक्षितौ अधोहस्तं स्वकंठे तु उरस्योरसि वाक्षिपत् १८ सर्वातिक्रांतमर्यादं पृष्ठभंगं च चक्रतुः संपूर्णमूर्छां बाहुभ्यां पूर्णकुंभं प्रचक्रतुः १९
तृणपीडं यथाकामं पूर्णयोगं समुष्टिकं एवमादीनि युद्धानि प्रकुर्वंतौ परस्परं २० तयोर्युद्धं ततो द्रष्टुं समेताः पुरवासिनः ब्राह्मणा वणिजश्चैव
क्षत्रियाश्च सहस्रशः २१ शूद्राश्च नरशार्दूल स्त्रियो वृद्धाश्च सर्वशः निरंतरमभूत्तत्र जनौघैरभिसंवृतं २२ तयोश्च भुजाघातान्निग्रहः प्रग्रहात्तथा
आसीत्सुभीमः संपातो वज्रपर्वतयोरिव २३ उभौ परमसंहृष्टौ बलेन बलिनां वरौ अन्योन्यस्यांतरप्रेप्सू परस्परजयैषिणौ २४ तद्भीममुत्सार्य
जनं युद्धमासीदुपह्वरे बलिनोः संयुगे राजन्वृत्रवासवयोरिव २५

तृणपीडनं ऋजुकरणं तृणमिव पचवाद्धृदिकं आवर्ततेन तद्युद्धं तृणपीडं पूर्णयोगं योगविग्रहः घातनं तत्र पूर्णं अन्यत्र मुष्टेः पातं मदर्शप्रभ्रमत्र पातनमित्यर्थः एवमादीनि
पादाकर्षणशीर्षकक्षीकरणादीनि निग्रहः हस्ताभ्यां कंधराकर्षणेन शत्रोरधोमुखीकरणं प्रग्रहः शत्रोर्जानुपातनार्थं पादाकर्षणं २३ २४ उत्सार्य जनं हस्तबाहुवधे
न परस्परापसारणात् तदरीकृत्य नेमिश्रकजनं उपह्वरे युद्धभूमौ उपद्वारे इति पाठे निकटदेशे २५

प्रकर्षणे पश्चादपसारणेऽग्रतो नयनेऽनुकर्षेति अवाङ्मुखं पातयितुं आकर्षणेऽर्वाक्कर्षणेऽन्तरा विकर्षेति तिर्यङ्नयनेऽर्थः आचकर्षतुः देहौ विलिलिखतुः प्रहारैरितिशे
षः २८ नियुद्धं निरस्त्रयुद्धं अनाहारं नास्ति आहरणं आहारमुपसंहारो यस्मिन् तत् अविश्रान्ते न विशेषेण श्रान्तोऽन्तरो यस्मिन्तत्तथा २९ तद्वृत्तं तादृशप्रकारं यु

प्रकर्षणाकर्षणाभ्यामनुकर्षविकर्षणैः आचकर्षतुरन्योन्यं जानुभिश्चावजघ्नतुः २६ ततः शब्देन महता भर्त्सयन्तौ परस्परं पाषाणसंघातनिभैः
प्रहारैरभिजघ्नतुः २७ व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ बाहुभिः समसज्जेतामायसैः परिघैरिव २८ कार्त्तिकस्य तु मासस्य प्रवृत्तं प्रथ
मेऽहनि अनाहारं दिवारात्रमविश्रान्तमवर्त्तत २९ तद्वृत्तं तु त्रयोदश्यां समवेतं महात्मनोः चतुर्दश्यां निशायां तु निवृत्तो मागधः क्लमात् ३० तं राजा
नं तथा क्लान्तं दृष्ट्वा राजञ्जनार्दनः उवाच भीमकर्माणं भीमं संबोधयन्निव ३१ क्लान्तः शत्रुर्न कौन्तेय लभ्यः पीडयितुं रणे पीड्यमानो हि कार्त्स्न्येन ज
ह्याज्जीवितमात्मनः ३२ तस्मात्ते नैव कौन्तेय पीडनीयो जनाधिप सममेतेन युध्यस्व बाहुभ्यां भरतर्षभ ३३ एवमुक्तः स कृष्णेन पाण्डवः परवीर
हा जरासंधस्य तद्रूपं ज्ञात्वा चक्रे मतिं वधे ३४ ततस्तमजितं जेतुं जरासंधं वृकोदरः संरम्भं बलिनां श्रेष्ठो जग्राह कुरुनन्दनः ३५ सभापर्वणि
वैशंपायन उवाच भीमसेनस्ततः कृष्णमुवाच यदुनन्दनं बुद्धिमास्थाय विपुलां जरासंधवधेप्सया १ नायं पापो मया कृष्ण युक्तः स्यादनुरोधितुं
प्राणेन यदुशार्दूल बद्धकक्षेण वाससा २ एवमुक्तस्ततः कृष्णः प्रत्युवाच वृकोदरं त्वरयन्पुरुषव्याघ्रो जरासंधवधेप्सया ३

द्धं त्रयोदश्यां समवेतं त्रयोदशीपर्यन्तं जातमिति शेषः क्लमात् क्लमं प्राप्य निवृत्तः निगृहीतप्रहृत्तोऽभूत् ३० संबोधयन्निव भीष्टायाः प्रदर्शनव्याजेन शत्रुवधकालं प्र
बोधयन्निव ३१ ३२ तस्मात्ते त्वया ३३ तद्रूपं क्लान्तं रूपं ३४ संरम्भं कोपं ३५ अध्यायः १ अनिरोधितुं निरोद्धुं प्राणेन बलेन २ ३

५ जानुभ्यां धनुर्पृष्टिश्च स्पृष्टं संक्षिप्य विनाम्य ६ १० कुलहारि गृहद्वारि ११ भ्रातरौ भीमार्जुनौ बांधवाञ्जरासंधवद्धान्नृपान् १२ तेकृष्णं रत्नभुजं वक्रारिमन्वयः १३ १४ सो
दर्पवान्भीमयुक्तः द्वियोधी द्वाभ्यां हस्ताभ्यां शराणां प्रक्षेपात् अभ्यासघाती पुनः पुनराहंतिरभ्यासः तं परकीयं हंतुं शीलमस्य धनुर्विद्यायां परोत्कर्षजेता संदृश्यः रमणीयां

येनैवं देवं परं सत्तं पक्षे तं मातरिश्वनः बलेभीमजरासंधे दर्शयामास तद्घवे ४ एवमुक्तस्तदा भीमो जरासंधमरिंदमः उत्क्षिप्य भ्रामयामास बलवंतं महा
बलः भ्रामयित्वा शतगुणं जानुभ्यां भरतर्षभ बभंज पृष्ठं संक्षिप्य निष्पिष्य विननाद च ६ करेगृहीत्वा चरणं द्वेधा चक्रे महाबलः तस्य निष्पिष्यमाण
स्य पांडवस्य च गर्जतः अभवत्तुमुलो नादः सर्वप्राणिभयंकरः ८ वित्रेसुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सुस्रुवुः भीमसेनस्य नादेन जरासंधस्य चैव ह
९ किंनु स्याद्धिमवान्भिन्नः किंनु स्विद्दीर्यते मही इति वै मागधा जज्ञुर्भीमसेनस्य निस्वनात् १० गृहीत्वा पादयोः शत्रुं पातयामास भूतले एकं पा
दं पदाक्रम्य दोर्भ्यामन्यं प्रगृह्य च ११ गुरुतः पाटयामास शाखामिव महागजः एकपादोरुवृषणकटिपृष्ठस्तनांसके १२ एकबाह्वक्षिभ्रूकर्णे शक
ले ददृशुः प्रजाः ततो राज्ञः कुलद्वारि प्रसुप्तमिव तं नृपं रात्रौ गतासुमुत्सृज्य निश्चक्रमुररिंदमाः ११ जरासंधरथं कृष्णो योजयित्वा पताकिनं आ
रोप्य भ्रातरौ चैव मोक्षयामास बांधवान् १२ ते वै रत्नभुजं कृष्णं रत्नार्हाः पृथिवीश्वराः राजानश्चक्रुरासाद्य मोक्षिता महतो भयात् १३ अक्षतः श
स्त्रसंपन्नो जितारिः सह राजभिः रथमास्थाय तं दिव्यं निर्जगाम गिरिव्रजात् १४ यः स सोदर्यवान्नाम द्वियोधः कृष्णसारथिः अभ्यासघाती संदृ
श्यो दुर्जेयः सर्वराजभिः १५ भीमार्जुनाभ्यां योधाभ्यामास्थितः कृष्णसारथिः शुशुभे रथवर्योऽसौ दुर्जयः सर्वधन्विभिः १६ शक्रविष्णू हि संग्रामे
चेरतुस्तारकामये रथेन तेन वै कृष्णस्तमुपारुह्य यातदा १७ तप्तचामीकराभेण किंकिणीजालमालिना मेघनिर्घोषनादेन जैत्रेणामित्रघातिना
१८ येन शक्रो दानवानां जघान नवतीर्नव तं प्राप्य समहृष्यंत रथं ते पुरुषर्षभाः १९

गः १५ १६ शक्रविष्णू हि शब्द इवार्थे तारकामये तारकान्तारा बृहस्पतिभार्या सैवश्रामयस्तद्विनाशहेतुर्यस्मिन्संग्रामे १७ १८ १९

२१ असंगः रथस्पर्शहीनः २२ चैत्यवृक्षः ग्रामादिचिह्नभूतो वृक्षः २३ २४ २६ रिष्यते हिंस्यते पार्थिवत्वं साम्राज्यं ३७

ततः कृष्णं महाबाहुं भ्रातृभ्यां सहितं तदा रथस्थं मागधा दृष्ट्वा समपद्यंत विस्मिताः २० हयैर्दिव्यैः समायुक्तो रथो वायुसमो जवे अधिष्ठितः स शुशुभे कृष्णे-
नातीव भारत २१ असंगो देवविहितस्तस्मिन् रथवरे ध्वजः योजनाद्ददृशे श्रीमानिंद्रायुधसमप्रभः २२ चिंतयामास कृष्णोथ गरुत्मंतं स चाभ्ययात् क्ष-
णे तस्मिन् स तेनासीच्चैत्यवृक्ष इवोच्छ्रितः २३ व्यादितास्यैर्महानादैः सह भूतैर्ध्वजालयैः तस्थौ रथवरे तस्मिन् गरुत्मान् पन्नगाशनः २४ दुर्निरीक्षो
हि भूतानां तेजसाभ्यधिकं बभौ आदित्य इव मध्याह्ने सहस्रकिरणावृतः २५ न स सज्जति वृक्षेषु शस्त्रैश्चापि न रिष्यते दिव्यो ध्वजवरो राजन् दृश्यते
चेह मानुषैः २६ तमास्थाय रथं दिव्यं पर्जन्यसमनिस्वनं निर्ययौ पुरुषव्याघ्रः पांडवाभ्यां सहाच्युतः २७ यं लेभे वासवाद्राजा वसुस्तस्माद्बृहद्रथः बृ-
हद्रथात्क्रमेणैव प्राप्तो बार्हद्रथं नृपं २८ स निर्याय महाबाहुः पुंडरीकेक्षणस्ततः गिरिव्रजाद्बहिस्तस्थौ समदेशे महायशाः २९ तत्रैनं नागराः
सर्वे सत्कारेणाभ्ययुस्तदा ब्राह्मणप्रमुखा राजन् विधिदृष्टेन कर्मणा ३० बंधनाद्विप्रमुक्ताश्च राजानो मधुसूदनं पूजयामासुरूचुश्च स्तुतिपूर्व-
मिदं वचः ३१ नैतच्चित्रं महाबाहो त्वयि देवकिनंदने भीमार्जुनबलोपेते धर्मस्य प्रतिपालनं ३३ जरासंधह्रदे घोरे दुःखपंके निमज्जतां राज्ञां स-
मभ्युद्धरणं यदिदं कृतमद्य वै ३३ विष्णो समवसन्नानां गिरिदुर्गे सुदारुणे दिष्ट्या मोक्षाद्यशो दीप्तमाप्तं ते यदुनंदन ३४ किं कुर्मः पुरुषव्याघ्र शा-
धि नः प्रणतिस्थितान् कृतमित्येव तद्विद्धि नृपैर्यद्यपि दुष्करं ३५ तानुवाच हृषीकेशः समाश्वास्य महामनाः युधिष्ठिरो राजसूयं क्रतुमाहर्तुमिच्छ-
ति ३६ तस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः सर्वैर्भवद्भिर्विज्ञाय साहाय्यं क्रियतामिति ३७

३८ कृष्णानृनेमोचितेभ्योधनग्रहणंप्रशोहानिकरमितितसंकरयात् ३९ ४२ एकत्वंतस्यंयथावयः ज्येष्ठानुक्रमेणप्रथमंभीमेनततः कृष्णेनततोर्जुनेन ४३ जरासंध

ततःसुप्रीतमनसस्तेनृपानृपसत्तम तथेत्येवाब्रुवन्सर्वेप्रतिगृह्यास्यतांगिरं ३८ रत्नभाजंचदाशार्हंचक्रुस्तेपृथिवीश्वराः कृष्णाञ्जग्राहगोविंदस्ते
पांतस्त्वनुकंपया ३९ जरासंधात्मजश्चैवसहदेवोमहामनाः निर्ययौसजनामात्यः पुरस्कृत्यपुरोहितं ४० सनीचैःप्रणतोभूत्वाबहुरत्नपुरोगमाः स
हदेवोनृणांदेवंवासुदेवमुपस्थितः ४१ भयार्त्तायततस्तस्मैकृष्णोदत्त्वाभयंतदा आददेस्यमहार्हाणिरत्नानिपुरुषोत्तमः ४२ अभ्यषिंचततत्रैव
जरासंधात्मजंमुदा गत्वैकत्वंचकृष्णेनपार्थाभ्यांचैवसत्कृतः ४३ विवेशराजाद्युतिमान्बार्हद्रथपुरंपुनः अभिषिक्तोमहाबाहुर्जरासंधिर्महात्म
भिः ४४ कृष्णस्तुसहपार्थाभ्यांश्रियापरमयायुतः रत्नान्यादायभूरीणिप्रययौपुरुषर्षभ ४५ इंद्रप्रस्थमुपागम्यपांडवाभ्यांसहाच्युतः समेत्य
धर्मराजानंप्रीयमाणोभ्यभाषत ४६ दिष्ट्याभीमेनबलवान्जरासंधोनिपातितः राजानोमोक्षिताश्चैवबंधनान्नृपसत्तम ४७ दिष्ट्याकुशलि
नौचेमौभीमसेनधनंजयौ पुनःस्वनगरंप्राप्तावक्षताविति भारत ४८ ततोयुधिष्ठिरःकृष्णंपूजयित्वायथार्हतः भीमसेनार्जुनौचैवप्रहृष्टःप
रिषस्वजे ४९ ततःक्षीणेजरासंधेभ्रातृभ्यांविहितंजयं अजातशत्रुरासाद्यमुमुदेभ्रातृभिःसह ५० यथावयःसमागम्यभ्रातृभिःसहपांडवः
सत्कृत्यपूजयित्वाचविससर्जनराधिपान् ५१ युधिष्ठिराभ्यनुज्ञातास्तेनृपाहृष्टमानसाः जग्मुःस्वदेशांस्त्वरितायानैरुच्चावचैस्ततः ५२ एवंपुरु
षशार्दूलोमहाबुद्धिर्जनार्दनः पांडवैर्घातयामासजरासंधमरिंतदा ५३ घातयित्वाजरासंधंबुद्धिपूर्वमरिंदमः धर्मराजमनुज्ञाप्यपृथांकृष्णांच
भारत ५४ सुभद्रांभीमसेनंचफाल्गुनंयमजौतथा धौम्यमामंत्रयित्वाचप्रययौस्वांपुरींप्रति ५५ तेनैवरथमुख्येनमनसस्तुल्यगामिना ध
र्मराजविसृष्टेनदिव्येनानादयन्दिशः ५६ ततोयुधिष्ठिरमुखाःपांडवाभरतर्षभ प्रदक्षिणमकुर्वंतकृष्णमक्लिष्टकारिणं ५७ ततोगतेभ
गवतिकृष्णेदेवकिनंदने जयंलब्ध्वासुविपुलंराज्ञांदत्वाभयंतदा ५८ संवर्द्धितंयशोभूयःकर्मणातेनभारत द्रौपद्याःपांडवाराजन्परांप्री
तिमवर्द्धयन् ५९ तस्मिन्कालेतुयद्युक्तंधर्मकामार्थसंहितं तद्राजाधर्मतश्चक्रेप्रजापालनकीर्त्तनं ६० सभापर्वणिजरासंधवधःसमाप्तः

पार्थः क्षत्रियस्यशत्रुजयेनधनार्जनंधर्मइतिशिष्टाचारेरागदर्शयितुंपांडवानांदिग्विजयमुपक्रामतिसप्तभिरध्यायैः पार्थः प्राप्यधनुः श्रेष्ठमित्यादिना १ पक्षोवासुदेवः

वैशंपायनउवाच पार्थःप्राप्यधनुःश्रेष्ठमक्षय्येचमहेषुधी रथंध्वजंसभांचैवयुधिष्ठिरमभाषत १ अर्जुनउवाच धनुःशस्त्रंशरावीर्यंपक्षो
भूमिर्यशोबलं प्राप्तमेतन्मयाराजन्दुष्प्रापंयदभीप्सितं २ तत्रकृत्यमहंमन्येकोषस्यपरिवर्द्धनं करमाहारयिष्यामिराज्ञःसर्वान्नृपोत्तम ३ विजयाय
प्रयास्यामिदिशंधनदपालितां तिथावथमुहूर्त्तेचनक्षत्रेचाभिपूजिते ४ वैशंपायनउवाच धनंजयवचःश्रुत्वाधर्मराजोयुधिष्ठिरः स्निग्धगंभीरनादि
न्यातंगिराप्रत्यभाषत ५ स्वस्तिवाच्यार्हतोविप्रान्प्रयाहिभरतर्षभ दुर्हृदामप्रहर्षायसुहृदानंदनायच ६ विजयस्तेध्रुवंपार्थप्रियंकाममवाप्स्य
सि इत्युक्तःप्रययौपार्थःसैन्येनमहताऽवृतः ७ अग्निदत्तेनदिव्येनरथेनाद्भुतकर्मणा तथैवभीमसेनोपियमौचपुरुषर्षभौ ८ ससैन्याःप्र
ययुःसर्वेधर्मराजेनपूजिताः दिशंधनपतेरिष्टामजयत्पाकशासनिः ९ भीमसेनस्तथाप्राचींसहदेवस्तुदक्षिणां प्रतीचींनकुलोराजन्दि
शंव्यजयतास्त्रवित् १० खांडवप्रस्थमध्यस्थोधर्मराजोयुधिष्ठिरः आसीत्परमयालक्ष्म्यासुहृद्गणवृतःप्रभुः ११ इतिश्रीमहाभारतेशत
साहस्र्यांसंहितायांवैयासिक्यांसभापर्वणि

भूमिर्दुर्ग १ २ ३ ४ ५ ६ ७ ८ ९ १० खांडवप्रस्थंखांडवदाहेनख्यापितंस्थानं ११ अध्यायः ॥

अध्यायः २६

जनमेजयउवाच दिशामभिजयंब्रह्मन्विस्तरेणानुकीर्तय नहितृप्यामिपूर्वेषांशृण्वानश्चरितंमहत् १ वैशंपायनउवाच धनंजयस्यवक्ष्यामिवि
जयंपूर्वमेवमयौगपद्येनपार्थैर्हिनिर्जितेयंवसुंधरा २ पूर्वंकुलिंदविषयेवशेचक्रेमहीपतीन् धनंजयोमहाबाहुर्नातितीव्रेणकर्मणा ३ आन
र्तान्कालकूटांश्चकुलिंदांश्चविजित्यसः सुमंडलंचविजितंकृतवान्सहसैनिकं ४ सतेनसहितोराजन्सव्यसाचीपरंतपः विजिग्येशाकलंद्वी
पंप्रतिविंध्यंचपार्थिवं ५ शाकलद्वीपवासाश्चसप्तद्वीपेषुयेनृपाः अर्जुनस्यचसैन्यैस्तैर्विग्रहस्तुमुलोभवत् ६ सतानपिमहेष्वासान्विजिग्येभर
तर्षभ तैरेवसहितःसर्वैःप्राग्ज्योतिषमुपाद्रवत् ७ तत्रराजामहानासीद्भगदत्तोविशांपते तेनासीत्सुमहद्युद्धंपांडवस्यमहात्मनः ८ स
किरातैश्चचीनैश्चवृतःप्राग्ज्योतिषोभवत् अन्यैश्चबहुभिर्योधैःसागरानूपवासिभिः ९ ततःसदिवसानष्टौयोधयित्वाधनंजयं प्रहसन्नब्रवी
द्राजासंग्रामेविगतक्लमं १० उपपन्नंमहाबाहोत्वयिकौरवनंदन पाकशासनदायादेवीर्यमाहवशोभिनि ११ अहंसखामहेंद्रस्यशक्रा
दनवरोरणे नशक्तास्मिवतेतातस्थातुंप्रमुखतोयुधि १२ त्वमीप्सितंपांडवेयब्रूहिकिंकरवाणिते यद्वक्ष्यसिमहाबाहोतत्करिष्यामिपुत्र
क १३ अर्जुनउवाच कुरूणामृषभोराजाधर्मपुत्रोयुधिष्ठिरः धर्मज्ञःसत्यसंधश्चयज्वाविपुलदक्षिणः १४ तस्यपार्थिवतामीप्सेकरस्तस्मै
प्रदीयतां भवान्पितृसखाचैवप्रीयमाणोमयापिच ततोनाज्ञापयामित्वांप्रीतिपूर्वंप्रदीयतां १५ भगदत्तउवाच कुंतीमातर्यथामेत्वंत
थाराजायुधिष्ठिरः सर्वमेतत्करिष्यामिकिंचान्यत्करवाणिते १६ सभापर्वणिअर्जुनदिग्विजये २६

एवमु अनेनैवकरणेनैव अनुजानता अनुज्ञांदत्तवता १ सन्निपातः संघर्षः ८ १५ उत्सवसंकेतान् स्त्रीपुंसयोः परस्परप्रीतिरेवोत्सवार्थसंकेतः नतुराज्यसमवस्था

वैशंपायन उवाच एवमुक्तः प्रत्युवाच भगदत्तं धनंजयः अनेनैव कृतं सर्वं भविष्यत्यनुजानता १ तं विजित्य महाबाहुः कुंतीपुत्रो धनंजयः प्रययावुत्तरां तस्माद्दिशं धनदपालितां २ अंतर्गिरिं च कौंतेयस्तथैव च बहिर्गिरिं तथैवोपगिरिं चैव विजिग्ये पुरुषर्षभः ३ विजित्य पर्वतान्सर्वान्ये च तत्र नराधिपाः तान्वशे स्थापयित्वा स धनान्यादाय सर्वशः ४ तैरेव सहितः सर्वैरनुरज्य च तान्नृपान् उलूकवासिनं राजन्बृहंतमुपजग्मिवान् ५ मृदंगवरनादेन रथनेमिस्वनेन च हस्तिनां च निनादेन कंपयन्वसुधामिमाम् ६ ततो बृहंतस्तरुणो बलेन चतुरंगिणा निष्क्रम्य नगरात्तस्माद्योधयामास फाल्गुनं ७ सुमहान्संनिपातोऽभूद्धनंजयबृहंतयोः न शशाक बृहंतस्तु सोढुं पांडवविक्रमं ८ सोऽविषह्यतमं मत्वा कौंतेयं पर्वतेश्वरः उपावर्तत दुर्धर्षो रत्नान्यादाय सर्वशः ९ स तद्राज्यमवस्थाप्य उलूकसहितो ययौ सेनाबिंदुमथो राजन्राज्यादाशु समाक्षिपत् १० मोदापुरं वामदेवं सुदामानं सुसंकुलं उलूकानुत्तरांश्चैव तांश्च राज्ञः समानयत् ११ तत्रस्थः पुरुषैरेव धर्मराजस्य शासनात् किरीटी जितवान्देशान्देशान्पंच गणांस्ततः १२ स देवप्रस्थमासाद्य सेनाबिंदोः पुरं प्रति बलेन चतुरंगेण निवेशमकरोत्प्रभुः १३ स तैः परिवृतः सर्वैर्विष्वगश्वं नराधिपं अभ्यगच्छन्महातेजाः पौरवं पुरुषर्षभं १४ विजित्य चाहवे शूरान्पार्वतीयान्महारथान् जिगाय सेनया राजन्पुरं पौरवरक्षितं १५ पौरवं युधि निर्जित्य दस्यून्पर्वतवासिनः गणानुत्सवसंकेतानजयत्सप्त पांडवः १६ ततः काश्मीरकान्वीरान्क्षत्रियान्क्षत्रियर्षभः व्यजयल्लोहितं चैव मंडलैर्दशभिः सह १७

पशूनामिव यत्रास्तीत्यर्थः १६ मंडलैः क्षुद्रराजैः १७

१८ अभिसारीं नगरीं १९ २३ प्रागुत्तरां ऐशानीं २४ २७ जवनान् धावनशीलान् आशुगान् यदृच्छयाचलनसमर्थान् २८ निष्कुटं शैलविशेषं २९ अध्यायः

ततस्त्रिगर्त्तान्कौंतेयो दार्वान्कोकनदांस्तथा क्षत्रिया बहवो राजन्नुपावर्त्तंत सर्वशः १८ अभिसारीं ततो रम्यां विजिग्ये कुरुनंदनः उरगावा
सिनं चैव रोचमानं रणेजयत् १९ ततः सिंहपुरं रम्यं चित्रायुधसुरक्षितं प्राधमद्बलमास्थाय पाकशासनिराहवे २० ततः सुह्मांश्च चोलांश्च कि
रीटी पांडवर्षभः सहितः सर्वसैन्येन प्रामथत्कुरुनंदनः २१ ततः परमविक्रांतो बाल्हीकान्पाकशासनिः महता परिमर्द्देन वशे चक्रे दुरा
सदान् २२ गृहीत्वा तु बलं सारं फाल्गुनः पांडुनंदनः दरदान्सह कांबोजैरजयत्पाकशासनिः २३ प्रागुत्तरां दिशं ये च वसंत्याश्रित्य दस्यवः
निवसंति वने ये च तान्सर्वानजयत्प्रभुः २४ लोहान्परमकांबोजानृषिकानुत्तरानपि सहितांस्तान्महाराज व्यजयत्पाकशासनिः २५ ऋषिकेषु तु
संग्रामो बभूवातिभयंकरः तारकामयसंकाशः परस्त्वृषिकपार्थयोः २६ स विजित्य ततो राजन्नृषिकान्रणमूर्द्धनि शुकोदरसमांस्तत्र हया
नष्टौ समानयत् २७ मयूरसदृशानन्यानुत्तरानपरानपि जवनानाशुगांश्चैव करार्थं समुपानयत् २८ स विनिर्जित्य संग्रामे हिमवंतं
सनिष्कुटं श्वेतपर्वतमासाद्य न्यविशत्पुरुषर्षभः २९ सभापर्वणि फाल्गुनदिग्विजये वैशंपायन उवाच स श्वेतपर्वतं वीरः समति
क्रम्य वीर्यवान् देशं किंपुरुषावासं द्रुमपुत्रेण रक्षितं १ महता सन्निपातेन क्षत्रियांतकरेण ह अजयत्पांडवश्रेष्ठः करे चैनं न्यवेशयत्
२ तं जित्वा हाटकं नाम देशं गुह्यकरक्षितं पाकशासनिरव्यग्रः सहसैन्यः समासदत् ३ तांस्तु सांत्वेन निर्जित्य मानसं सर उत्तमं
ऋषिकुल्यास्तथा सर्वा ददर्श कुरुनंदनः ४ सरो मानसमासाद्य हाटकानभितः प्रभुः गंधर्वरक्षितं देशमजयत्पांडवस्ततः ५

सश्वेत १ २ ३ ४ ५

स० ५०

८ नसमवेतन्निर्येनेनसर्थः १० १५ क्षुमाञ्चतशीविशेषः क्षुमाः तसीनीलिकयोरितिमेदिनी तत्तंतुनिर्मितानिक्षौमाणि अजिनानिच १६ २१ अध्यायः

त ३

ततस्तित्तिरिकल्माषान्मंडूकाख्यान्हयोत्तमान् लेभेसकरमत्यंतंगंधर्वनगरात्तदा ६ उत्तरंहरिवर्षंतुससमासाद्यपांडवः इयेषजेतुंतंदेशं
पाकशासननंदनः ७ ततएनंमहावीर्यामहाकायामहाबलाः द्वारपालाःसमासाद्यहृष्टावचनमब्रुवन् ८ पार्थनेदंत्वयाशक्यंपुरंजेतुंकथं
चन उपावर्तस्वकल्याणपर्याप्तमिदमच्युत ९ इदंपुरंयःप्रविशेद्ध्रुवंनसभवेन्नरः प्रीयामहेत्वयावीरपर्याप्तोविजयस्तव १० नचात्र
किंचिज्जेतव्यमर्जुनात्रप्रदृश्यते उत्तराःकुरवोह्येतेनात्रयुद्धंप्रवर्तते ११ प्रविष्टोपिहिकौंतेयनेहद्रक्ष्यसिकिंचन नहिमानुषदेहेनशक्यम
त्राभिवीक्षितुं १२ अथेहपुरुषव्याघ्रकिंचिदन्यच्चिकीर्षसि तत्प्रब्रूहिकरिष्यामोवचनात्तवभारत १३ ततस्तानब्रवीद्राजन्नर्जुनःप्र
हसन्निव पार्थिवत्वंचिकीर्षामिधर्मराजस्यधीमतः १४ नप्रवेक्ष्यामिवोदेशंविरुद्धं यदिमानुषैः युधिष्ठिराययत्किंचित्करपण्यं
प्रदीयतां १५ ततोदिव्यानिवस्त्राणिदिव्यान्याभरणानिच क्षौमाजिनानिदिव्यानितस्यतेप्रददुःकरं १६ एवंसपुरुषव्याघ्रोविजिग्ये
दिशमुत्तरां संग्रामान्सुबहून्कृत्वाक्षत्रियैर्दस्युभिस्तथा १७ सविनिर्जित्यराज्ञस्तान्करेचविनिवेश्यतु धनान्यादायसर्वेभ्योर
त्नानिविविधानिच १८ हयांस्तित्तिरिकल्माषान्शुकपत्रनिभानपि मयूरसदृशानन्यान्सर्वाननिलरंहसः १९ वृतःसुमह
ताराजन्बलेनचतुरंगिणा आजगामपुनर्वीरःशक्रप्रस्थंपुरोत्तमं २० धर्मराजायतत्पार्थोधनंसर्वंसवाहनं न्यवेदयदनुज्ञात
स्तेनराज्ञागृहान्ययौ २१ सभापर्वणिउत्तरदिग्विजयः

सम० ५०

एतस्मिन् १ बलचक्रेणसेनासमूहेन दंशितेनसन्नद्धेन २ ३ ४ दशार्णाश्चदेशाः निरायुधां बाहुयुद्धं ५ अधिचक्रेइतिसंबंधः जितात्स्वबलंज्ञात्वासेनाप

वैशंपायनउवाच एतस्मिन्नेवकालेतुभीमसेनोपिवीर्यवान् धर्मराजमनुज्ञाप्यययौप्राचींदिशंप्रति १ महताबलचक्रेणपरराष्ट्रावम
र्दिना हस्त्यश्वरथपूर्णेनदंशितेनप्रतापवान् २ हतोभरतशार्दूलोद्विषच्छोकविवर्द्धनः सगत्वानरशार्दूलः पंचालानांपुरंमहत् ३ पंचा
लान्विविधोपायैः सांत्वयामासपांडवः ततः सगंडकान्शूरोविदेहान्भरतर्षभः ४ विजित्याल्पेनकालेनदशार्णानजयत्प्रभुः तत्रदा
शार्णकोराजासुधर्मालोमहर्षणं कृतवान्भीमसेनेनमहद्युद्धंनिरायुधं ५ भीमसेनस्तुतदृष्ट्वातस्यकर्मंमहात्मनः अधिसेनापतिंचक्रे
सुधर्म्माणंमहाबलं ६ ततःप्राचींदिशंभीमोययौभीमपराक्रमः सैन्येनमहताराजकंपयन्निवमेदिनीं ७ सोश्वमेधेश्वरंराजन्रोचमा
नंसहानुगं जिगायसमरेवीरोबलेनबलिनांवरः ८ सतंनिर्जित्यकौंतेयोनातितीव्रेणकर्म्मणा पूर्वदेशंमहावीर्योविजिग्येकुरुनंद
नः ९ ततोदक्षिणमागम्यपुलिंदनगरंमहत् सुकुमारंवशेचक्रेसुमित्रंचनराधिपं १० ततस्तुधर्मराजस्यशासनाद्भरतर्षभः
शिशुपालंमहावीर्यमभ्यगाज्जनमेजय ११ चेदिराजोपितच्छ्रुत्वापांडवस्यचिकीर्षितं उपनिष्क्रम्यनगरात्प्रत्यगृह्णात्परंतप १२ तौस
मेत्यमहाराजकुरुचेदिवृषौतदा उभयोरात्मकुलयोः कौशल्यंपर्यपृच्छतां १३ ततोनिवेद्यतद्राष्ट्रंचेदिराजोविशांपते उवाचभीमंप्र
हसन्किमिदंकुरुषेनघ १४ तस्यभीमस्तदाचख्यौधर्मराजचिकीर्षितं सचतंप्रतिगृह्यैवतथाचक्रेनराधिपः १५ ततोभीमस्तत्रराज
न्नुषित्वात्रिदशाःक्षपाः सत्कृतःशिशुपालेनययौसबलवाहनः १६ सभापर्वणिभीमदिग्विजये

सांत्वसंदत्तवानित्यर्थः अधिसेनापतिंसेनापतिष्वधिकंमुख्यंचक्रेइतिवार्थः ६ १२ वृषौश्रेष्ठौ १३ १५ त्रिदशाः अधिकादशत्रयोदश १६ अध्यायः

ततः १५ सुह्माः एताः मागधानभ्यधाद्बली करं प्रयच्छंतेतुकवान् सर्वमेवपराक्रांतमतान् १६ १७ १८

वैशंपायनउवाच ततः कुमारविषये श्रेणिमंतमथाजयत् कोशलाधिपतिं चैव बृहद्बलमरिंदमः १ अयोध्यायां तु धर्मज्ञं दीर्घप्रज्ञं महाबलं अ
जयत्पांडवश्रेष्ठो नातितीव्रेण कर्म्मणा २ ततो गोपालकच्छं च सोत्तरानपि कोशलान् मल्लानामधिपं चैव पार्थिवं चाजयत्प्रभुः ३ ततो हि
मवतः पार्श्वे समभ्येत्य जलोद्भवं सर्वमल्पेन कालेन देशं चक्रे वशं बली ४ एवं बहुविधान्देशान् विजित्य भरतर्षभः भल्लाटमभितो जिग्ये
शुक्तिमंतं च पर्वतं ५ पांडवः सुमहावीर्यो बलेन बलिनां वरः स काशिराजं समरे सुबाहुमनिवर्त्तिनं ६ वशे चक्रे महाबाहुर्भीमो भीम
पराक्रमः ततः सुपार्श्वमभितस्तथा राजपतिं क्रमं ७ युध्यमानं बलात्संख्ये विजिग्ये पांडवर्षभः ततो मत्स्यान्महातेजा मलदांश्च
महाबलान् ८ अनघानभयांश्चैव पशुभूमिं च सर्वशः निवृत्य च महाबाहुर्मदधारं महीधरं ९ सोपदेशं विनिर्जित्य प्रययावुत्त
रामुखः वत्सभूमिं च कौंतेयो विजिग्ये बलवान्बलात् १० भर्गाणामधिपं चैव निषादाधिपतिं तथा विजिग्ये भूमिपालांश्च मणिमत्प्र
मुखान्बहून् ११ ततो दक्षिणमल्लांश्च भोगवंतं च पर्वतं तरसैवाजयद्भीमो नातितीव्रेण कर्म्मणा १२ शर्मकान्वर्मकांश्चैव अजय
त्सांत्वपूर्वकं वैदेहकं च राजानं जनकं जगतीपतिं १३ विजिग्ये पुरुषव्याघ्रो नातितीव्रेण कर्म्मणा शकांश्च बर्बरांश्चैव अजयच्छद्मपूर्व
कं १४ वैदेहस्थस्तु कौंतेय इंद्रपर्वतमंतिकात् किरातानामधिपतीनजयत्सप्त पांडवः १५ ततः सुह्मान्प्रसुह्मांश्च सपक्षानतिवीर्य
वान् विजित्य युधि कौंतेयो मागधानभ्यधाद्बली १६ दंडं च दंडधारं च विजित्य पृथिवीपतीन् तैरेव सहितः सर्वैर्गिरिव्रजमुपाद्रवत् १७
जारासंधिं सांत्वयित्वा करे च विनिवेश्य ह तैरेव सहितः सर्वैः कर्णमभ्यद्रवद्बली १८

सकंपयन्निवमहींवलेनचतुरंगिणा युयुधेपांडवश्रेष्ठः कर्णेनामित्रघातिना १९ सकर्णंयुधिनिर्जित्यवशेकृत्वाचभारत ततोविजिग्ये
वलवान्राज्ञः पर्वतवासिनः २० अथमोदागिरौचैवराजानंवलवत्तरं पांडवोवाहुवीर्येणनिजघानमहामृधे २१ ततःपुंड्राधिपंवी
रंवासुदेवंमहावलं कौशिकीकच्छनिलयंराजानंचमहौजसं २२ उभौवलभृतौवीरावुभौतीव्रपराक्रमौ निर्जित्याजौमहाराजवंग
राजमुपाद्रवत् २३ समुद्रसेनंनिर्जित्यचंद्रसेनंचपार्थिवं ताम्रलिप्तंचराजानंकर्वटाधिपतिंतथा २४ सुह्मानामधिपंचैवयेच
सागरवासिनः सर्वान्म्लेच्छगणांश्चैवविजिग्येभरतर्षभः २५ एवंवहुविधान्देशान्विजित्यपवनात्मजः वसुतेभ्यउपादा
यलौहित्यमगमद्वली २६ सस्सर्वान्म्लेच्छनृपतीन्सागरानूपवासिनः करमाहारयामासरत्नानिविविधानिच २७ चंदनागुरुव
स्त्राणिमणिमौक्तिककंवलंकांचनंरजतंचैवविद्रुमंचमहाधनं २८ तेकोटीशतसंख्येनकौंतेयंमहतातदा अभ्यवर्षन्महात्मानं
धनवर्षेणपांडवं २९ इंद्रप्रस्थमुपागम्यभीमोभीमपराक्रमः निवेदयामासतदाधर्मराजायतद्धनं ३० सभापर्वणिभीमदिग्विज
यः वैशंपायनउवाच तथैवसहदेवोपिधर्मराजेनपूजितः महत्यासेनयाराजन्प्रययौदक्षिणांदिशं १ सशूरसेनान्कार्त्स्न्येन
पूर्वमेवाजयत्प्रभुः मत्स्यराजंचकौरव्योवशेचक्रेवलाद्वली २

सभा०
५२

पट्टचरान्वीरदेशान् ४ ५ ६ ७ ८ १८

अधिराजाधिपंचैवदंतवक्रंमहाबलं जिगायकरदंचैवकृत्वाराज्येन्यवेशयत ३ सुकुमारंवशेचक्रेसुमित्रंचनराधिपं तथैवापरमत्स्यांश्च
व्यजयत्सपटच्चरान् ४ निषादभूमिंगोशृंगंपर्वतप्रवरंतथा तरसैवाजयद्धीमान्श्रेणिमंतंचपार्थिवं ५ नराष्ट्रंचविनिर्जित्यकुंतिभोजमुपा
द्रवत् प्रीतिपूर्वंचतस्यासौप्रतिजग्राहशासनं ६ ततश्चर्मण्वतीकूलेजंभकस्यात्मजंनृपं ददर्शवासुदेवेनशेषितंपूर्ववैरिणा ७
चक्रेतेनससंग्रामंसहदेवेनभारत सतमाजौविनिर्जित्यदक्षिणाभिमुखोययौ ८ सेकानपरसेकांश्चव्यजयत्सुमहाबलः करंतेभ्यउपा
दायरत्नानिविविधानिच ९ ततस्तेनैवसहितोनर्मदामभितोययौ विंदानुविंदावावंत्यौसैन्येनमहतावृतौ जिगायसमरेवीरावाश्विने
यःप्रतापवान् १० ततोरत्नान्युपादायपुरींभोजकटंययौ तत्रयुद्धमभूद्राजन्दिवसद्वयमच्युत ११ सविजित्यदुराधर्षंभीष्मकंमाद्रि
नंदनः कोशलाधिपतिंचैवतथावेणातटाधिपं १२ कांतारकांश्चसमरेतथाप्राक्कोशलान्नृपान् नाटकेयांश्चसमरेतथाहेरंबकान्युधि १३
मारुधंचविनिर्जित्यरम्यग्राममथोबलात् नाचीनानर्बुकांश्चैवराज्ञश्चैवमहाबलः १४ तांस्तानाटविकान्सर्वानजयत्पांडुनंदनः वाताधि
पंचनृपतिंवशेचक्रेमहाबलः १५ पुलिंदांश्चरणेजित्वाययौदक्षिणतःपुनः युयुधेपांड्यराजेनदिवसंनकुलानुजः १६ तंजित्वासमहा
बाहुःप्रययौदक्षिणापथं गुहामासादयामासकिष्किंधांलोकविश्रुतां १७ तत्रवानरराजाभ्यांमैंदेनद्विविदेनच युयुधेदिवसान्सप्तन
चतौविकृतिंगतौ १८

सभा०
५२

२५ वृत्तमित्रः शत्रुः २६ पारदारिकः स्वेनानूढायाञ्चपि परकीयपत्नीत्वपरदारास्तक्तो गृहीतः विवशः ३० २९ चकमे मानुषरूपेण आवृतः कामयामास एवं सर्वेषामपि

टी २

ततस्क्षेमहात्मानौ सहदेवाय पार्थिवो रौ ऋत्वंतु स्ववशं तं हृष्टो प्रीतिपूर्वमिदं वचः १९ गच्छ पाण्डवशार्दूल रत्नान्यादाय सर्वशः अविघ्नमस्तु कार्या
य धर्मराजाय धीमते २० ततो रत्नान्युपादाय पुरीं माहिष्मतीं ययौ तत्र नीलेन राज्ञा स चक्रे युद्धं नरर्षभः २१ पाण्डवः परवीरघ्नः सहदेवः प्रता
पवान् ततोस्य सुमहद्युद्धमासीद्भीरुभयंकरं २२ सैन्यक्षयकरं चैव प्राणानां संशयावहं चक्रे तस्य हि साहाय्यं भगवान् हव्यवाहनः २३ त
तो रथा हया नागाः पुरुषाः कवचानि च प्रदीप्तानि व्यदृश्यंत सहदेवबले तदा २४ ततः सुसंभ्रांतमना बभूव कुरुनंदनः नोत्तरं प्रतिवक्तुं च श
क्तोभूज्जनमेजय २५ जनमेजय उवाच किमर्थं भगवानग्निः प्रत्यमित्रोभवद्युधि सहदेवस्य यज्ञार्थं घटमानस्य वै द्विज २६ वैशंपायन उवाच
तत्र माहिष्मतीवासी भगवान् हव्यवाहनः श्रूयते हि गृहीतो वै पुरस्तात्पारदारिकः २७ नीलस्य राज्ञो दुहिता बभूवातीव शोभना साग्नि
त्य १ होत्रमुपातिष्ठद्बोधनाय पितुः सदा २८ व्यजनैर्धूयमानोपि तावद्धुलतेनेन सः यावच्चारुपुटौष्ठेन वायुना न विधूयते २९ ततः स भगवान
ग्निश्चकमे तां सुदर्शनां नीलराज्ञः सर्वेषामुपनीतस्तु सोभवत् ३० ततो ब्राह्मणरूपेण रममाणो यदृच्छया तं तु राजा यथाशास्त्रमशासद्धा
र्मिकस्तदा ३१ प्रजज्वाल ततः कोपाद्भगवान् हव्यवाहनः तं दृष्ट्वा विस्मितो राजा जगाम शिरसावनिं ३२ ततः कालेन तां कन्यां तथैव
हि तदा नृपः प्रददौ विप्ररूपाय वह्नये शिरसा नतः ३३ प्रतिगृह्य च तां सुभ्रूं नीलराज्ञः सुतां तदा चक्रे प्रसादं भगवांस्तस्य राज्ञो विभावसुः ३४
वरेणच्छंदयामास तं नृपं स्विष्टकृत्तमः अभयं च स तज्ज्याह स्वसैन्ये वै महीपतिः ३५

गृहे इत्युक्तं सर्वेषामिति तथा च सः उपनीतः स्वीकृतः नीलस्य राज्ञो अविदित इतिशेषः ३० ३४ शोभनः सुतरां इष्टकृत् प्रियकृत् अतिशयेन स्विष्टकृत्तमः छंदयामा
सप्रीणितवान् ३५

३६ छंदतः इछातः अनतिग्राह्याः अप्रतिषेध्याः नवभूवुः सर्वासांच्चप्रेमापरिगृहीतत्वात् ३७ अप्रतिवारणेप्रातिकूलेनस्त्रीणांवारणंनकर्तुंशक्यः कश्चिदपित्यर्थः

ततःप्रभृतियेकेचित्तस्यानगरींपुरींनृपाः जिगीषंतिबलाद्राजनतेदह्यंतेस्मवह्निना ३६ तस्यांपुर्यांतदाचैवमाहिष्मत्यांकुरूद्वहः बभूवुरनतिग्राह्याः
योषितःछंदतःकिल ३७ एवमग्निर्वरंप्रादात्स्त्रीणामप्रतिवारणे स्वैरिण्यस्तत्रनार्योहियथेष्टंविचरंत्युत ३८ वर्जयंतिचराजानस्तत्पुरंभर
तर्षभ भयादग्नेर्महाराजतदाप्रभृतिसर्वदा ३९ सहदेवस्तुधर्मात्मासैन्यंदृष्ट्वाभयार्दितं परीतमग्निनाराजन्नाकंपतयथाचलः उपस्पृश्य
शुचिर्भूत्वासोब्रवीत्पावकंततः ४० सहदेवउवाच त्वदर्थोयंसमारंभः कृष्णवर्त्मन्नमोस्तुते मुखंत्वमसिदेवानांयज्ञस्त्वमसिपावक ४१ पावना
त्पावकश्चासिवहनाद्धव्यवाहनः वेदास्त्वदर्थंजातावैजातवेदास्ततोह्यसि चित्रभानुःसुरेशश्चअनलस्त्वंविभावसो स्वर्गद्वारस्पृशश्चासिहुता
शोज्वलनःशिखी ४३ वैश्वानरस्त्वंपिंगेशःप्लवंगोभूरितेजसः कुमारसूस्त्वंभगवान्रुद्रगर्भोहिरण्यकृत् ४४ अग्निर्ददातुमेतेजोवायुःप्रा
णंददातुमे पृथिवीबलमादध्याच्छिवंचापोदिशंतुमे ४५ अपांगर्भमहासत्वजातवेदःसुरेश्वर देवानामुखमग्नेत्वंसत्येनविपुनीहिमां ४६ ऋ
षिभिर्ब्राह्मणैश्चैवदैवतैरसुरैरपि नित्यंसुहुतयज्ञेषुसत्येनविपुनीहिमां ४७ धूमकेतुःशिखीचत्वंपापहानिलसंभवः सर्वप्राणिषुनित्यस्थः
सत्येनविपुनीहिमां ४८ एवंस्तुतोसिभगवन्प्रीतेनशुचिनामया तुष्टिंपुष्टिंश्रुतंचैवप्रीतिंचाग्नेप्रयच्छमे ४९ वैशंपायनउवाच इत्येवंमं
त्रमाग्नेयंपठन्योजुहुयाद्विभुं ऋद्धिमान्सततंदांतःसर्वपापैःप्रमुच्यते ५० सहदेवउवाच यज्ञविघ्नमिमंकर्तुंनार्हस्त्वंहव्यवाहनः एवमुक्त्वा
तुमाद्रेयःकुशैरास्तीर्यमेदिनीं ५१ विधिवत्पुरुषव्याघ्रःपावकंप्रत्युपाविशत् प्रमुखेतस्यसैन्यस्यभीतोद्विग्नस्यभारत ५२ नचैनमत्यगा
द्वह्निर्वेलामिवमहोदधिः तमुपेत्यशनैर्वह्निरुवाचकुरुनंदनं ५३

निवारःतत्स्वाहस्वैरिण्यइति भर्तुरन्यस्यवाशरीरप्रविशणार्थिरेवास्माकंभोगंकरोतीतिनिस्वपारिसमर्थः ३८ ४८ तुष्टिंचबलंबुद्धिं प्रीतिंसुखं ४९ आग्नेयमंत्रंश्लोकरूपंमंत्राष्टकं
गृह्णुपात्मापसादिनास्वाहांतेनमंत्रेहोमंकुर्यात् ५० ५३

५० ऋसगात्एनंत्र्यतिक्रम्यसैमंनदहाहेत्यर्थः पृःपुरी ५८ ५९ ६० ७४

सहदेवंनृणांदेवंसांत्वपूर्वमिदंवचः उत्तिष्ठोत्तिष्ठकौरव्यजिज्ञासेयंकृतामया वेद्मित्वंसर्वमभिप्रायंतवधर्मसुतस्यच ५४ मयाचरक्षितव्येयंपुरीभरतसत्तम या
वद्राज्ञोस्यनीलस्यकुलेवंशधराइति ५५ ईप्सितंतुकरिष्यामिमनसस्तवपांडव ततउत्थायहृष्टात्माप्रांजलिःशिरसानतः पूजयामासमाद्रेयःपावकंभर
तर्षभ ५७ पावकेविनिवृत्तेतुनीलोराजाभयात्तदा पावकस्याज्ञयाचैवमर्चयामासपार्थिवः ५८ सत्कारेणनरव्याघ्रंसहदेवंयुधांपतिं प्रतिगृह्यचतांपूजांक
रेचविनिवेश्यच ५९ माद्रीसुतस्ततःप्रायाद्विजयीदक्षिणांदिशं त्रैपुरंसवशेकृत्वाराजानममितौजसं ६० निजग्राहमहाबाहुस्तरसापोरवेश्वरं आकृ
तिंकौशिकाचार्यंयत्नेनमहताततः ६१ वशेचक्रेमहाबाहुःसुराष्ट्राधिपतिंतदा सुराष्ट्रविषयस्थश्चप्रेषयामासरुक्मिणे ६२ राज्ञेभोजकटस्थायमहामात्रा
यधीमते भीष्मकायसधर्मात्मासाक्षादिंद्रसखायवै ६३ सचास्यप्रतिजग्राहससुतःशासनंतदा प्रीतिपूर्वंमहाराजवासुदेवमवेक्ष्यच ६४ ततःसर
त्नान्यादायपुनःप्रायाद्युधांपतिः ततःशूर्पारकंचैवतालाकटमथापिच ६५ वशेचक्रेमहातेजादंडकांश्चमहाबलः सागरद्वीपवासांश्चनृपतीन्
म्लेच्छयोनिजान् ६६ निषादान्पुरुषादांश्चकर्णप्रावरणानपि येचकालमुखानामनरराक्षसयोनयः ६७ कृत्स्नंकोल्लगिरिंचैवसुरभीपट्टनंत
था द्वीपंताम्राह्वयंचैवपर्वतंरामकंतथा ६८ तिमिंगिलंचसनृपंवशेकृत्वामहामतिः एकपादांश्चपुरुषान्केरलान्वनवासिनः ६९ न
गरींसंजयंतींचपाषंडंकरहाटकं दूतैरेववशेचक्रेकरंचैनानदापयत् ७० पांड्यांश्चद्रविडांश्चैवसहितांश्चोड्रकेरलैः अंध्रांस्तालवनांश्चैव
कलिंगानुष्ट्रकर्णिकान् ७१ आटवींचपुरींरम्यांयवनानांपुरंतथा दूतैरेववशेचक्रेकरंचैनानदापयत् ७२ ततःकच्छगतोधीमान्दू
तान्माद्रवतीसुतः प्रेषयामासराजेंद्रपौलस्त्यायमहात्मने ७३ विभीषणायधर्मात्माप्रीतिपूर्वमरिंदमः सचास्यप्रतिजग्राहशासनंप्रीतिपू
र्वकं तच्चकालकृतंधीमानन्वमन्यतसप्रभुः ७४

अध्यायः नकुल ३ रोहीतकंगिरिमत्तमयूरसत्तैः क्षत्रियैः ५ १५ मद्राणांपुटभेदनं १५

ततःसंप्रेषयामासरत्नानिविविधानिच चंदनागुरुकाष्ठानिदिव्यान्याभरणानिच वासांसिचमहार्हाणिमणींश्चैवमहाधनान् सवर्णंततनोधीमान्सह
देवःप्रतापवान् ७६ एवंनिर्जित्यतरसासांत्वेनविजयेनच करदान्पार्थिवान्कृत्वाप्रत्यागच्छदरिंदमः ७७ धर्मराजायतत्सर्वंनिवेद्यभरतर्षभ कृ
तकर्मासुखंराजन्नुवासजनमेजय ७८ इतिसभापर्वणिसहदेवदिग्विजयः वैशंपायनउवाच नकुलस्यतुवक्ष्यामिकर्माणिविजयंतथा वा
सुदेवजितामाशांयथासावजयत्प्रभुः १ निर्यायखांडवप्रस्थात्प्रतीचीमभितोदिशं उद्दिश्यमतिमान्प्रायान्महत्यासेनयासह २ सिंहनादेन
महतायोधानांगर्जितेनच रथनेमिनिनादैश्चकंपयन्वसुधामिमां ३ ततोबहुधनंरम्यंगवाढ्यंधनधान्यवत् कार्त्तिकेयस्यदयितंरोहीतकमु
पाद्रवत् ४ तत्रयुद्धंमहच्चासीच्छूरैर्मत्तमयूरकैः मरुभूमिंसकार्त्स्न्येनतथैवबहुधान्यकं ५ शैरीषकंमहेत्थंचवशेचक्रेमहाद्युतिः आक्रो
शंचैवराजर्षिंतेनयुद्धमभून्महत् ६ तान्दशार्णान्सजित्वाचप्रतस्थेपांडुनंदनः शिबींस्त्रिगर्त्तानंबष्ठान्मालवान्पंचकर्पटान् ७ तथाम
ध्यमकेयांश्चवाटधानान्द्विजानथ पुनश्चपरिवृत्याथपुष्करारण्यवासिनः ८ गणानुत्सवसंकेतान्व्यजयत्पुरुषर्षभः सिंधुकूलाश्रितायेच
ग्रामणीयामहाबलाः ९ शूद्राभीरगणाश्चैवयेचाश्रित्यसरस्वतीम् वर्त्तयंतिचयेमत्स्यैर्येचपर्वतवासिनः १० कृत्स्नंपंचनदंचैवतथैवाम
रपर्वतं उत्तरज्योतिषंचैवतथादिव्यकटंपुरं ११ द्वारपालंचतरसावशेचक्रेमहाद्युतिः रामठान्हारहूणांश्चप्रतीच्याश्चैवयेनृपाः १२
तान्सर्वान्सवशेचक्रेशासनादेवपांडवः तत्रस्थःप्रेषयामासवासुदेवायभारत १३ सचास्यगतभीराजन्प्रतिजग्राहशासनं ततःशा
कलमभ्येत्यमद्राणांपुटभेदनं १४ मातुलंप्रीतिपूर्वेणशल्यंचक्रेवशेबली सतेनसत्कृतोराजन्सत्कारार्होविशांपते १५

१७ करभाणांउष्ट्राणां १८ २० दिग्विजयःसमाप्तः रक्षणात् शत्रूणांदस्यूनां १ वलीनांकराणांनिकामंयथेष्टंवर्षतीतिनिकामवर्षी स्फीतःसमृद्धः २ सुप्रवृत्ताः स्वस्व
परिपांचहिताबहाः नतुक्रूराः राजकर्मणाःराज्ञःपुण्यात् ३ दस्युभ्यः चोरेभ्यःवंचकेभ्यः धूर्तेभ्यः राज्ञोराजवल्लभतोवामृषागिरोवानाश्रूयंतसर्वेपिसत्यवादिनः राजवदित्य

९१

रत्नानिभूरीण्यादायसंप्रतस्थेयुधांपतिः ततः सागरकुक्षिस्थान्म्लेच्छान्परमदारुणान् १६ पल्हवान्बर्बरांश्चैवकिरातान्यवनान्शकान् त
तोरत्नान्युपादायवशेकृत्वाचपार्थिवान् न्यवर्तत्कुरुश्रेष्ठोनकुलश्चित्रमार्गवित् १७ करभाणांसहस्राणिकोशंतस्यमहात्मनः ऊहुर्दशमहारा
जकृच्छ्रादिवमहाधनं १८ इंद्रप्रस्थगतंवीरमभ्येत्यसयुधिष्ठिरं ततोमाद्रीसुतःश्रीमान्धनंतस्मैन्यवेदयत् १९ एवंविजित्यनकुलोदिशंव
रुणपालितां प्रतीचींवासुदेवेननिर्जितांभरतर्षभ २० इतिसभापर्वणिराजसूयेदिग्विजयः समाप्तः वैशंपायनउवाच रक्षणाद्ध
र्मराजस्यसत्यस्यपरिपालनात् शत्रूणांक्षपणाच्चैवस्वकर्मनिरताःप्रजाः १ वलीनांसम्यगादानाद्धर्मतश्चानुशासनात् निकामवर्षी
पर्जन्यः स्फीतोजनपदोभवत् २ सर्वारंभाःसुप्रवृत्ताः गोरक्षाकर्षणंवणिक् विशेषात्सर्वमेवैतत्संजज्ञेराजकर्मणा ३ दस्युभ्योवंचके
भ्योवाराजन्प्रतिपरस्परं राजवल्लभतश्चैवनाश्रूयंतमृषागिरः ४ अवर्षंचातिवर्षंचव्याधिपावकमूर्छनं सर्वमेतत्तदानासीद्धर्मनित्येयुधि
ष्ठिरे ५ प्रियंकर्तुमुपस्थातुंवलिकर्म्मस्वभावजं अभिहर्तुंनृपाजग्मुर्नान्यैःकार्य्यैःकथंचन ६ धर्म्यैर्धनागमैस्तस्यववृधेनिचयो
महान् कर्तुंयस्यनशक्येतक्षयोवर्षशतैरपि ७ स्वकोष्ठस्यपरीमाणंकोशस्यचमहीपतिः विज्ञायराजाकौंतेयोयज्ञायैवमनो
दधे ८ सुहृदश्चैवयेसर्वेपृथक्चसहिताब्रुवन् यज्ञकालस्तवविभोक्रियतामत्रसांप्रतं ९

र्थः दस्यवोपिपरस्परंनवंचयंतिनाप्यस्वामिवंचनमाचरंतेजातितः खलाअपिनतत्कर्म्मकुर्वंतीत्यर्थः ४ मूर्छनंप्रदीपनं ५ जग्मुःराज्ञानंप्रतीतिशे
षः नान्यैः जिगीषादिभिः ६ निचयोभांडागारं ७ कोशोधनं कोष्ठंधान्यादिनयोः परीमाणं ८ ९

ऋषिर्नारायणः अदृश्यइतिछेदः विजानतां विदुषां अदृश्यः अग्रगात्मत्वात् अविजानतां तु कार्यकारणरूपेणादृश्यः तथाच श्रुतिः अविज्ञातं विजानतां विज्ञात
मविजानतां विज्ञातमविज्ञानतामिति १० अभवनिस्थानं अप्ययो लयस्थानं ११ प्राकारः प्राकारस्य वरक्षकः बलाधिकारं सेनाधिपत्यं १२ जहर्षे हर्षं प्राप्य

धनौघं पुरुषव्याघ्रो बलेन महता वृतः १३।३

अथैवं ब्रुवतामेवं तेषामभ्याययौ हरिः ऋषिः पुराणो वेदात्मा हृश्यश्चैव विजानतां १० जगतस्तस्थुषां श्रेष्ठः प्रभवश्चाप्ययश्च ह भूतभव्यभवन्नाथः
केशवः केशिसूदनः ११ प्राकारः सर्ववृष्णीनामापत्स्वभयदोरिहा बलाधिकारे निक्षिप्य सम्यगानकदुंदुभिं १२ उच्चावचमुपादाय धर्मराजाय
माधवः तं धनौघमपर्यन्तं रत्नसागरमक्षयं नादयन्रथघोषेण प्रविवेश पुरोत्तमं १४ पूर्णमापूर्यं तेषां द्विषच्छोकावहोभवत् असूर्यमिव सूर्येण
निवातमिव वायुना कृष्णेन समुपेतेन जहृषे भारतं पुरं १५ तं मुदाभिसमागम्य सत्कृत्य च यथाविधि स पृष्ट्वा कुशलं चैव सुखासीनं युधि
ष्ठिरः १६ धौम्यद्वैपायनमुखैः ऋत्विग्भिः पुरुषर्षभ भीमार्जुनयमैश्चैव सहितः कृष्णमब्रवीत् १७ युधिष्ठिर उवाच त्वत्कृते पृथिवी सर्वा
मद्वशे कृष्ण वर्तते धनं च बहु वार्ष्णेय त्वत्प्रसादादुपार्जितं १८ सोहमिच्छामि तत्सर्वं विधिवद्देवकीसुत उपयोक्तुं द्विजाग्र्येभ्यो हव्यवाहे च मा
धव १९ तदहं यष्टुमिच्छामि दाशार्ह सहितस्त्वया अनुजैश्च महाबाहो तन्मानुज्ञातुमर्हसि २० तद्दीक्षापय गोविंद त्वमात्मानं महाभुज त्व
य्यिष्टवति दाशार्ह विपाप्मा भविता ह्यहं २१ मां वाप्यभ्यनुजानीहि सहैभिरनुजैर्विभो अनुज्ञातस्त्वया कृष्ण प्राप्नुयां क्रतुमुत्तमं २२ वैशं
पायन उवाच तं कृष्णः प्रत्युवाचेदं बहूक्त्वा गुणविस्तरं त्वमेव राजशार्दूल सम्राडर्हो महाक्रतुं २३ संप्राप्नुहि त्वया प्राप्ते कृतकृत्यास्ततो व
यं यजस्वाभीप्सितं यज्ञं मयि श्रेयस्यवस्थिते नियुंक्ष्व त्वं च मां कृत्ये सर्वं कर्तास्मि ते वचः २४

१४ २० मामां वानुज्ञातुं त्वं दीक्षस्वेति वक्तव्ये आत्मानं दीक्षापयेत्युक्तिः अकर्तुरात्मनो दीक्षणायोगात् औपाधिकमेव भ्रांतिबिंबचलनन्यायेनैव तस्य दीक्षापनं ज्ञेयं २१ २३
श्रेयसि कल्याणकरे २४

अधियज्ञान्यज्ञियान्संभारान्त्राज्यपश्वादीन् ३० ३१ काम्यन्त इति कामाः स्पृष्टान्नादीनि ३२ ३४ धनंजयानां धनंजयगोत्राणां मध्ये श्रेष्ठः सुसामा नाम आंगिरसः ३५

युधिष्ठिर उवाच सफलः कृष्ण संकल्पः सिद्धिश्च नियता मम यस्य मे त्वं हृषीकेश यथेप्सितमुपस्थितः २६ वैशंपायन उवाच अनुज्ञातस्तु कृष्णेन
पांडवो भ्रातृभिः सह ईजितुं राजसूयेन साधनान्युपचक्रमे २७ ततस्त्वाज्ञापयामास पांडवोऽरिनिबर्हणः सहदेवं युधां श्रेष्ठं मंत्रिणश्चैव सर्वशः
२८ अस्मिन्क्रतौ यथोक्तानि यज्ञांगानि द्विजातिभिः तथोपकरणं सर्वं मंगलानि च सर्वशः २९ अधियज्ञांश्च संभारान्धौम्योक्तान्क्षिप्रमेव हि
समानयंतु पुरुषा यथायोगं यथाक्रमं ३० इंद्रसेनो विशोकश्च पूरुश्चार्जुनसारथिः अन्नाद्याहरणे युक्ताः संतु मत्प्रियकाम्यया ३१ सर्वकामाश्च का
र्यंतां रसगंधसमन्विताः मनोरथप्रीतिकरा द्विजानां कुरुसत्तम ३२ तद्वाक्यसमकालं च कृतं सर्वमवेदयत् सहदेवो युधां श्रेष्ठो धर्मराजे युधिष्ठिरे ३३
ततो द्वैपायनो राजन्नृत्विजः समुपानयत् वेदानिव महाभागान्साक्षान्मूर्तिमतो द्विजान् ३४ स्वयं ब्रह्मत्वमकरोत्तस्य सत्यवतीसुतः धनंज
यानामृषभः सुसामा सामगोऽभवत् ३५ याज्ञवल्क्यो बभूवाथ ब्रह्मिष्ठोऽध्वर्युसत्तमः पैलो होता वसोः पुत्रो धौम्येन सहितोऽभवत् ३६ एते
षां पुत्रवर्गाश्च शिष्याश्च भरतर्षभ बभूवुर्होत्रगाः सर्वे वेदवेदांगपारगाः ३७ ते वाचयित्वा पुण्याहमूहयित्वा च तं विधिं शास्त्रोक्तं योजयामासु
स्तद्देवयजनं महत् ३८ तत्र चक्रुरनुज्ञाताः शरणान्युत शिल्पिनः गंधवंति विशालानि वेश्मानीव दिवौकसां ३९ ततस्त्वाज्ञापयामास स राजा
राजसत्तमः सहदेवं तदा सद्यो मंत्रिणं पुरुषर्षभः ४० आमंत्रणार्थं दूतांस्त्वं प्रेषयस्वाशुगान्द्रुतं उपश्रुत्य वचो राज्ञः स दूतान्प्राहिणोत्तदा
४१ आमंत्रयध्वं राष्ट्रेषु ब्राह्मणान्भूमिपानथ विशश्च मान्याञ्छूद्रांश्च सर्वानानयतेति च ४२ वैशंपायन उवाच समाज्ञप्तास्ततो दूताः पां
डवेयस्य शासनात् आमंत्रयांबभूवुश्च आनयंश्चापरान्द्रुतं तथा परानपि नरानात्मनः शीघ्रगामिनः

३६ होत्रकाः सप्तसंख्याः ३७ ऊहयित्वा च तं विधिं राजसूयेन यक्ष्ये त्वां राज्यमवाप्तवानीति संकल्पादिरूपमूहं कृत्वा देवयजनं यज्ञस्थानं ३८ शरणानि पञ्चशा
लादीन्यगाराणि ३९

५२ रुक्मस्य कांचनस्य शयनानां तूलिकादितहितानां नीतस्थानां ५३ ५६ अध्यायः समाप्ता ४

ततस्तेतु यथाकालंकुंतीपुत्रंयुधिष्ठिरं दीक्षयांचक्रिरेविप्राराजसूयाय भारत ४४ दीक्षितः सतुधर्मात्माधर्मराजोयुधिष्ठिरः जगाम यज्ञायत
नंहृतोविप्रैः सहस्रशः ४५ भ्रातृभिर्ज्ञातिभिश्चैव सुहृद्भिः सचिवैः सह क्षत्रियैश्चमनुष्येंद्रैर्नानादेशसमागतैः ४६ अमात्यैश्चनरश्रेष्ठोधर्मोवि
ग्रहवानिव आजग्मुर्ब्राह्मणास्तत्रविषयेभ्यस्ततस्ततः ४७ सर्वविद्यासुनिष्णातावेदवेदांगपारगाः तेषामावसथांश्चक्रुर्धर्मराजस्यशासनात्
४८ बह्वन्नाच्छादनैर्युक्तान्सगणानांपृथक्पृथक् सर्वर्तुगुणसंपन्नान्शिल्पिनोथसहस्रशः ४९ तेषुतेन्यवसन्राजन्ब्राह्मणाभृशसत्कृताः
कथयंतः कथाबह्वीःपश्यंतोनटनर्तकान् ५० भुंजतांचैवविप्राणांवदतांचमहास्वनः अनिशंश्रूयतेतत्रमुदितानांमहात्मनां ५१ दीयतांदीयता
मेषांभुज्यतांभुज्यतामिति एवंप्रकाराः संजल्पाः श्रूयंतेस्मात्रनित्यशः ५२ गवांशतसहस्राणिशयनानांचभारत रुक्मस्ययोषितांचैवधर्मराजः
पृथक्ददौ ५३ प्रावर्ततैवंयज्ञः सपांडवस्यमहात्मनः पृथिव्यामेकवीरस्यशक्रस्येवत्रिविष्टपे ५४ ततोयुधिष्ठिरोराजाप्रेषयामासपांडवं
नकुलंहास्तिनपुरंभीष्मायपुरुषर्षभ ५५ द्रोणायधृतराष्ट्रायविदुरायकृपायच भ्रातृणांचैवसर्वेषांयेनुरक्तायुधिष्ठिरे ५६ सभापर्वणि
राजसूये वैशंपायनउवाच सगत्वाहास्तिनपुरंनकुलः समितिंजयः भीष्ममामंत्रयांचक्रेधृतराष्ट्रंचपांडवः १ सत्कृत्यामंत्रितास्तेनत्वा
चार्यप्रमुखास्ततः प्रययुः प्रीतमनसोयज्ञंब्रह्मपुरःसराः २ संश्रुत्यधर्मराजस्ययज्ञंयज्ञविदस्तदा अन्येचशतशस्तुष्टैर्मनोभिर्भरत
र्षभ ३ द्रष्टुकामाः सभांचैवधर्मराजंचपांडवं दिग्भ्यः सर्वेसमापेतुः क्षत्रियास्तत्रभारत ४

८ यज्ञसेनोद्रुपदः १८ दीर्घिकागृहवापी १९ २० मणिकुट्टिमंमणिबद्धभूमिः २१ २३ आवसथानश्चपश्यन्नितिनानुकृष्टेनसंबंधः २४ २५ अध्यायः

अ

समुपादायरत्नानिविविधानिमहान्तिच धृतराष्ट्रश्चभीष्मश्चविदुरश्चमहामतिः ५ दुर्योधनपुरोगाश्चभ्रातरः सर्वएवते गांधारराजः सुबलः शकुनिश्चम
हाबलः ६ अचलोवृषकश्चैवकर्णश्चरथिनांवरः तथाशल्यश्चबलवान्बाल्हिकश्चमहाबलः ७ सोमदत्तोथकौरव्योभूरिर्भूरिश्रवाः शलः अश्व
त्थामाकृपोद्रोणः सैंधवश्चजयद्रथः ८ यज्ञसेनः सपुत्रश्चशाल्वश्चवसुधाधिपः प्राग्ज्योतिषश्चनृपतिर्भगदत्तोमहारथः ९ सतुसर्वैः सह
म्लेच्छैः सागरानूपवासिभिः पार्वतीयाश्चराजानोराजानोराजाबृहद्बलः १० पौंड्रकोवासुदेवश्चवंगः कालिंगकस्तथा आकर्षः कुंतलश्चैवमालवाश्चांध्र
कास्तथा ११ द्राविडाः सिंहलाश्चैवराजाकाश्मीरकस्तथा कुंतिभोजोमहातेजाः पार्थिवोगौरवाहनः १२ बाल्हिकाश्चापरेशूराराजानः सर्वएवते
विराटः सहपुत्राभ्यांमावेल्लश्चमहाबलः १३ राजानोराजपुत्राश्च नानाजनपदेश्वराः शिशुपालोमहावीर्यः सहपुत्रेणभारत १४ आगच्छ
त्पांडवेयस्ययज्ञंसमरदुर्मदः रामश्चैवानिरुद्धश्चकंकश्चसहसारणः १५ गदप्रद्युम्नसांबाश्चचारुदेष्णश्चवीर्यवान् उल्मुकोनिशठश्चैव
वीरश्चांगावहस्तथा १६ वृष्णयोनिखिलाश्चान्येसमाजग्मुर्महारथाः एतेचान्येचबहवोराजानोमध्यदेशजाः १७ आजग्मुः पांडुपुत्रस्य
राजसूयंमहाक्रतुं ददुस्तेषामावसथान्धर्मराजस्यशासनात् १८ बहुभक्ष्यान्वितान्राजन्दीर्घिकावृक्षशोभितान् तथाधर्मात्मजः पूजांच
क्रेतेषांमहात्मनां १९ सत्कृताश्चयथोद्दिष्टान्जग्मुरावसथान्नृपाः कैलासशिखरप्रख्यान्मनोज्ञान्द्रव्यभूषितान् २० सर्वतः संवृतानुच्चैः प्राका
रैः सुकृतैः सितैः सुवर्णजालसंवीतान्मणिकुट्टिमभूषितान् २१ सुखारोहणसोपानान्महासनपरिच्छदान् स्रग्दामसमवच्छन्नानुत्तमागुरु
गंधिनः २२ हंसेंदुवर्णसदृशानायोजनसुदर्शनान् असंबाधान्समद्वारान्युतानुच्चावचैर्गुणैः २३ बहुधातुनिबद्धांगान्हिमवच्छिखराणि
व विश्रांतास्तेततोपश्यन्भूमिपाभूरिदक्षिणं २४ वृतंसदस्यैर्बहुभिर्धर्मराजंयुधिष्ठिरं तत्सदः पार्थिवैः कीर्णंब्राह्मणैश्चमहर्षिभिः भ्राजते
स्मतदाराजन्नाकपृष्ठंयथामरैः २५ इतिसभापर्वणिराजसूये

पितामहं १ २ प्रणायंतु प्रकर्षेणाप्रेयः प्राप्नुवंतु अभिमंत्रिताः प्रार्थिताः संतः ३ ६ हिरण्यस्य कांचनस्य सुवर्णस्य शोभनवर्णस्य ७ स्वामिवत्तत्रोपयद्दिनर्थः ८ अर्हणानि उपायनानि ९ सर्वलोकसमावृत्तः सर्वैः उपायनवद्भिर्लोकैः समावृत्तः वेष्टितः पिप्रीषुः प्रीणयितुमिच्छुः १० १२ सविमानाग्रैः उत्तमागतानां देवानां विमा

वैशंपायन उवाच पितामहं गुरुं चैव प्रत्युद्गम्य युधिष्ठिरः अभिवाद्य ततो राजन्निदं वचनमब्रवीत् १ भीष्मं द्रोणं कृपं द्रौणिं दुर्योधनविविंशती अस्मिन्यज्ञे भवंतो मामनुगृह्णंतु सर्वशः २ इदं वः स्वमहं चैव यदिहास्ति धनं मम प्रीणयंतु भवंतो मां यथेष्टमनिमंत्रिताः ३ एवमुक्त्वा स तान्सर्वान्दीक्षितः पाण्डवाग्रजः युयोज स यथायोगमधिकारेष्वनंतरं ४ भक्ष्यभोज्याधिकारेषु दुःशासनमयोजयत् परिग्रहे ब्राह्मणानामश्वत्थामानमुक्तवान् ५ राज्ञां तु प्रतिपूजार्थे संजयं संन्ययोजयत् कृताकृतपरिज्ञाने भीष्मद्रोणौ महामती ६ हिरण्यस्य सुवर्णस्य रत्नानां चान्ववेक्षणे दक्षिणानां च वै दाने कृपं राजा न्ययोजयत् ७ तथान्यान्पुरुषव्याघ्रांस्तस्मिंस्तस्मिन्न्ययोजयत् बाह्लीको धृतराष्ट्रश्च सोमदत्तो जयद्रथः नकुलेन समानीताः स्वामिवत्तत्र रेमिरे ८ क्षत्ता व्ययकरस्त्वासीद्विदुरः सर्वधर्मवित् दुर्योधनस्त्वर्हणानि प्रतिजग्राह सर्वशः ९ चरणक्षालने कृष्णो ब्राह्मणानां स्वयं ह्यभूत् सर्वलोकः समावृत्तः पिप्रीषुः फलमुत्तमं १० द्रष्टुकामः सभां चैव धर्मराजं युधिष्ठिरं न कश्चिदाहरत्तत्र सहस्रावरमर्हणं ११ रत्नैश्च बहुभिस्तत्र धर्मराजमवर्द्धयत् कथं तु मम कौरव्यो रत्नदानैः समाप्नुयात् १२ यज्ञमित्येव राजानः स्पर्द्धमाना ददुर्द्धनं भवनैः सविमानाग्रैः सोदर्कैर्बलसंवृतैः १३ लोकराजविमानैश्च ब्राह्मणावसथैः सह कृतैरावसथैर्दिव्यैर्विमानप्रतिमैस्तथा १४ विचित्रै रत्नवद्भिश्च ऋद्ध्या परमया युतैः राजभिश्च समावृत्तैरतीवश्रीसमृद्धिभिः अशोभत सदो राजन्कौंतेयस्य महात्मनः १५

नैरहितानि संलग्नानि अग्र्याणि उपरिभागा येषां तैः १३ लोकराजविमानैः इंद्रादिलोकपालविमानैः लोकराजः स्वर्गो यात्रत्यैर्विमानैः स्वर्गिणामप्याश्चर्यकरैर्यं यज्ञसदस्यर्थः १४ कौंतेयस्य यज्ञदतिशेयः १५

ऋद्धानुवर्णनं देवर्षिनारदेरध्यायशेषस्तात्पर्येण संबोगसंपूर्णोयं यज्ञइमर्थो षड्ग्निनायडूत्त्वग्नयः आरंभणीयः क्षत्रधृतिः व्युष्टिः द्विरात्रः दशपेयः इति १६ रक्षोपहारसंपन्नइमन्त्रर
मन्त्ररक्षोपहारकर्मणइति पाठे रक्षसां नाशे साधुनां कर्मणायुक्तः १६ १७ इडाकर्म स्विष्टकृद्भूशिष्टहविः प्रतिपत्तिकर्म मंत्रशिक्षाविशारदैः मंत्रेषु शिक्षायां हस्तक्रियायां च
विशारदैः ऋत्विग्भिः १८ १९ सभापर्वणि राजसूयेध्यायः तमभिषेचनीये च ब्राह्मणाराजभिः सहेत्यादिः शिशुपालवधांतावस्था आपीनानाविधमतभेदोपन्यासपूर्वकं
कृष्णशिशुपालरूपकेण ब्रह्मणोजीवस्य महाकाशमठाकाशन्यायेन लयं दर्शयति तत्र कथापक्षेतु स्पष्टमेव लभ्योर्थः स्पष्टः अध्यात्मपक्षेतु परोक्षवत्त्रिलक्ष्मनयातत्तं दुर्मा

स.प.३६:१

अथावभृथनुत्यं देवं सद्धमानो युधिष्ठिरः षड्ग्निनाथयज्ञेन सोयजद्दक्षिणावता १६ सर्वान्जनान्सर्वकामैः समतर्पयत् अन्नवान्बहुभक्ष्यश्च भुक्तवज्जु
नसंवृतः रक्षोपहारसंपन्नो बभूव स समागमः १७ इडाज्यहोमाहुतिभिर्मंत्रशिक्षाविशारदैः तस्मिन्हि ततृपुर्देवास्तते यज्ञे महर्षिभिः १८
यथा देवास्तथा विप्रा दक्षिणान्नमहाधनैः ततृपुः सर्ववर्णाश्च तस्मिन्यज्ञे मुदान्विताः १९ इति सभापर्वणि वैशंपायन उवाच ततोभिषेचनीये
द्विजा ब्राह्मणा राजभिः सह अंतर्वेदीं प्रविविशुः सत्कारार्हा महर्षयः १ नारदप्रमुखास्तस्यामंतर्वेद्यां महात्मनः समासीनाः शुशुभिरे सहराज
र्षिभिस्तदा २ समेता ब्रह्मभवने देवा देवर्षयस्तथा कर्मांतरमुपासन्तो जजल्पुरमितौजसः ३ इदमेवं न चाप्येवमेवमेवं न चान्यथा इत्यत्रु
र्बहवस्तत्र वितंडावादिनो द्विजाः ४ कृशानर्थांस्ततः केचिदकृशांस्तत्र कुर्वते अकृशांश्च कृशांश्चक्रुर्हेतुभिः शास्त्रनिश्चयैः ५ अर्थं मेधा
विनः केचिदन्यमानैः प्रपूरितं विचिक्षिपुर्यथाश्येना नभोगतमिवामिषं ६ केचिद्धर्मार्थकुशलाः केचित्तत्र महाव्रताः रेमिरे कथयंतश्च स
र्वभाष्यविदांवराः ७

स्येयमितित्तदेव प्रकाशयते १२ अभिषेचनीये राजसूयांगभूते सोमयागविशेषे कर्मांतरं मध्येमध्ये कर्मविरामकालं उपासंतः उपगच्छंतः प्रो
चुवंतः असङ्गतावितस्सरूपं कर्मछिद्रं प्राप्य जल्पकथां चक्रुरित्यर्थः अमितौजसः बहुप्रतिभावंतः ३ एवमेतदिति स्वपक्षस्थापनं न चाप्येवमिति परपक्षदूषणं एवं मति
वादिप्रक्षेपि बहवः कृसामान्याः वितंडा स्वपक्षपरपक्षस्थापनाहीनां कथां ४ कृशान्युक्तिसौर्बल्यात् अकृशान्युक्तिप्राबल्यात् तत्र विपरीतं कुर्वंतीति हेतुभिर्नानाविधैस्तर्कैः
५ ६ तत्रैति परोक्तस्य हूषणेरवाहताः तत्तु शास्त्रतत्त्वेइति भावः ७

१० अथचिंतांसमापेदेइमादिश्लोकैःसबहुमानतइत्यंतोग्रंथः नारदस्यपूर्वापरानुसंधानात्क्षत्रस्यस्थानेपरंउपक्रमोजातइतिचिंताचित्तव्यथास्मृतिर्वा शाश्वतरूपात्स्वाक्रमंसह
सभायांनिश्चितस्यभूभारहरणस्याभूदित्यर्थः क्षेत्रेक्षत्रियजातौजातः आविर्भूतः १४ १५ नारायणस्यैवशंभुत्वंचतुर्वक्त्रापरपर्यायंभूतभावनत्वंचेतियुक्तं एकस्यैवत्रिमूर्ति
धारित्वात् यदुस्येयदुगृहे १६ १७ महद्भूतंमहाविष्णुः स्वयंभूः अस्मदादिवच्छरीरग्रहणापेक्षयत्वेनापिभवनेनमहद्भूतेइत्यर्थः आसांस्यतिआच्छेत्तुमिच्छति पुनरितिअत्रसकृदे

सावर्दिवर्दसंपन्नैर्देवद्विजमहर्षिभिः अवभासेसमाकीर्णानक्षत्रैर्द्यौरिवापता ८ नतस्यांसन्निधौशूद्रःकश्चिदासीन्नचाव्रती अतवैघांतदाराजन्
युधिष्ठिरनिवेशने ९ तांतुलक्ष्मीवतोलक्ष्मींतदायज्ञविधानजां तुतोषनारदःपश्यन्धर्मराजस्यधीमतः १० अथचिंतांसमापेदेसमुनिर्मनुजाधिप
नारदस्तुतदापश्यन्सर्वक्षत्रसमागमं ११ सस्माराथपुरावृत्तांकथांतांपुरुषर्षभ अंशावतरणेयासौब्रह्मणोभवनेभवत् १२ देवानांसंगमंतत्रविज्ञा
यकुरुनंदन नारदःपुंडरीकाक्षंसस्मारमनसाहरिं १३ साक्षात्सविबुधारिघ्नःक्षत्रेनारायणोविभुः प्रतिज्ञांपालयंश्चेमांजातःपरपुरंजयः १४
संदिदेशपुरायोसौविबुधान्भूतकृत्स्वयं अन्योन्यमभिनिघ्नंतःपुनर्लोकानवाप्स्यथ १५ इतिनारायणःशंभुर्भगवान्जगतःप्रभुः आदिश्य
विबुधान्सर्वानजायतयदुक्षये १६ क्षितौअंधकवृष्णीनांवंशेवंशभृतांवरः परयाशुशुभेलक्ष्म्यानक्षत्राणामिवोडुराट् १७ यस्यबाहुबलंसेंद्राःसु
राःसर्वउपासते सोयंमानुषवन्नामहरिरास्तेरिमर्दनः १८ अहोवतमहद्भूतंस्वयंभूर्यदिदंस्वयं आदास्यतिपुनःक्षत्रमेवंबलसमन्वितं १९ इत्येतांना
रदश्चिंतांचिंतयामासधर्मवित् हरिंनारायणंज्ञात्वायज्ञैरिज्यंतमीश्वरं २० तस्मिन्धर्मविदांश्रेष्ठोधर्मराजस्यधीमतः महाध्वरेमहाबुद्धिस्तस्थौस
बहुमानतः २१ ततोभीष्मोब्रवीद्राजन्धर्मराजंयुधिष्ठिरं क्रियतामर्हणंराज्ञांयथार्हमितिभारत २२ आचार्यमृत्विजंचैवसंयुजंचयुधिष्ठिरं स्ना
तकंचप्रियंप्राहुःषडर्घार्हान्नृपंतथा २३ एतानर्घ्यानभिगतानाहुःसंवत्सरोषितान् तइमेकालपूगस्यमहतोस्मानुपागताः २४ एषामेकैक
शोराजन्नर्घआनीयतामिति अथचैषांवरिष्ठायसमर्थायोपनीयतां २५
तदनेनकर्म्मकृतमस्तीतिसूचितं १९ २० धर्मविदांश्रेष्ठोनारदः धर्म्मराजस्ययज्ञैरीज्यं २१ २२ संयुजंसंबंधिनंश्वशुरादिं प्रियंमित्रं २३ २४ एकैकशः प्रत्येकं अथअपा
विषयाणामध्येवरिष्ठायप्रथममितिशेषः २५

२७ बुध्या बुध्यति जानातिवक्ततत्वमनयेतिबुद्धिः श्रवणमननध्यानात्मिकाचेतोवृत्तिः तयानिश्चित्यसाक्षात्कृत्य अर्हणीयतमं अर्हणीयाः ब्राह्मणाः देवताश्चसाक्षात्तदेह
तुत्वात् अर्हणीयतराः देवाः कामप्रदत्वात् अर्हणीयतमस्त्वात्मासर्वेसततत्त्वमर्थत्वात्तथाचश्रुतिः नवाअरेदेवानांकामायदेवाःप्रियाभवंत्यात्मनस्तुकामायदेवाःप्रिया
भवंतीतितदेतत्प्रेयःपुत्रात्प्रेयोवित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरंयदयमात्मेतिच श्रुतीसनेनात्मैवकर्मभूमावर्हणीयःइहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिरितिश्रुतेर
मत्रतल्लाभात् एवमात्मनोजिज्ञासत्वमुक्त्वा स्वरूपमाहएषहीति एषपुरोवर्त्तीश्रीकृष्णः सूर्यश्चज्योतिषांपदार्थप्रकाशकानांसूर्यचंद्राग्निवागादीनांचंद्राग्नितारादीनांचसमस्ता
नांसम्यगस्तंगतानांस्वप्नावस्थायामक्लिष्टमध्येःतपन्प्रभातीतितियोजना अयंभावःनत्ववद्ग्निःस्वयंज्योतिः सूर्येकांतादिद्वारासूर्यस्यैवइंधनादेरेतदपेक्षत्वात् ना

युधिष्ठिरउवाच कस्मैभवान्मन्यतेर्घमेकस्मैकुरुनंदन उपनीयमानंयुक्तंचतन्मेब्रूहिपितामह २६ वैशंपायनउवाच ततोभीष्मःशां
तनवोबुध्यानिश्चित्यवीर्यवान् वार्ष्णेयंमन्यतेकृष्णंपूजनीयतमंभुवि २७ एषह्येषांसमस्तानांतेजोबलपराक्रमैः मध्येतपन्निवाभाति
ज्योतिषामिवभास्करः २८

पिचंद्रतारादिस्तस्यजलमयस्यसूर्यज्योतिषैवभास्वत्वात् यथायंदृष्टांतएवंचक्षुरादयोपिनस्वशक्त्याप्रकाशकाः किंतुआत्मसत्तानुवेधादेव तथायथास्वाघभावेपिसूर्यः
इतरनिरपेक्षःप्रकाशयतिएवमात्माचक्षुरादयुपरमेपिस्वप्रेस्वप्रकाशेनैवसर्ववासनामयंपदार्थजातंप्रकाशयति तस्यभासासर्वमिदंविभातिअत्रायंपुरुषःस्वयंज्योति
रित्यादिश्रुतिभ्यः तेजोबलपराक्रमैः तेजःप्रकाशः बलंतेजोंतराभिभवसामर्थ्यंपराक्रमः निःशेषेणतमोनाशकत्वंदृष्टांतेतेजआदि दार्ष्टांतिकेतुचित्प्रकाशः
बलंअबाध्यत्वं पराक्रमःसर्वोपादानत्वेनसर्वव्यापकत्वंच कथापक्षेतुतेजःकांतिबलंपराभिभवसामर्थ्यं पराक्रमः संग्रामोद्यमः २८

अतप्येमिवेति यथागाढांधकारस्थंगृहादिवस्तुजातंप्रकाशमानंचतत्सत्तास्फूर्तीस्पष्टैरेवभवतः एवंअहंकारादेर्घटांतस्यार्थजातस्यसत्ताप्रकाशौविदधीनावेवे
तिपूर्वोक्तस्यैवविवरणं एवंयथानिवातेवातस्पर्शः यवरकेनिदाघेखिद्यमानान्जंतून्वातएवाह्लादयतिएवंअयंस्वरूपानंदेनजगदाह्लादयति एषह्येवानंदय
तिएतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः सोयंपरस्परहृशिलापरएवसन्तदर्पणेनमुखमिवाविद्यमायपापराग्रहस्पत्वमिवाप्रादितः पूजनीयः
अत्रहिदेहाद्युपाधिविस्मरणेनलब्धपदंचित्तंमोक्षायकल्पते तथोक्तंभगवतापतंजलिना बहिरकल्पितावृत्तिर्महाविदेहाततःप्रकाशावरणक्षयइति

अतप्यमिवतत्पूर्वेणाग्निर्वातमिववायुना भासितंह्लादितंचैवकृष्णेनेदंसदोहिनः २९ तस्मैभीष्माभ्यनुज्ञातः सहदेवः प्रतापवान् उ
पजह्रेऽथविधिवद्वार्ष्णेयायार्घमुत्तमं ३० प्रतिजग्राहतत्कृष्णः शास्त्रदृष्टेनकर्म्मणा शिशुपालस्तुतांपूजांवासुदेवेनचक्षमे ३१ सउ
पालभ्यभीष्मंचधर्मराजंचसंसदि अपाक्षिपद्वासुदेवंचेदिराजोमहाबलः ३२ इतिसभापर्वणिअर्घाभिहरणे शिशुपालउवाच
नायमर्हतिवार्ष्णेयस्तिष्ठत्स्विहमहात्मसु महीपतिषुकौरव्यराजवत्पार्थिवार्हणं १

बहिःस्फूर्तो अकल्पितादेहादिष्वसंयेनासंकोचेनमहाविदेहेतिधारणयानाम २९ ३० अध्यायः कर्तृत्वादिकंकृष्णस्यवास्तवमेवनतुमायिकमविद्यकंवाशरीरमात्रस्य
कर्मजन्यत्वनियमात् मिथ्याभूतस्यापिप्रागत्वार्थक्रियाकारित्वेमुक्तिरजतादेरपिरजतोचितक्रयीभावापत्तेश्चेत्यभिसंदधानोजैमिनिमतानुसारीशिशुपालः वर्णा
श्रमवयस्तपोविद्यादिभिरेवपुंसांश्रैष्ठ्यात्रैष्ठ्यविभागंवक्तुमन्यमानोन्यथांतस्साधारणेपनकृष्णमधृष्टंकरोतिनायमिति वार्ष्णेयः वृष्णिषूत्पन्नइतिपूर्वोक्तंस्वयंभूत्वंनि
राकृतंतद्धिआत्मनः सर्वसाधारणं देहस्यतुअस्मदादिवद्दृष्टवर्णाजाततात्पुर्वत्वमिति भावः १

२ अपाश्रिपत्तद्दूषितवान् आपगेयो भीष्मः ३ ४ ननु अस्मदादिवज्ज्ञातो अराजापि वृद्धत्वादिना हेतुना अर्घ्यः कृष्णः इत्याशंक्य विकल्प्य दूषयति अथवा मन्यसे इत्यादिना
१० अप्राप्तलक्षणं राजचिह्नं छत्रचामरादि सम्प्राप्तलक्षणः अप्राप्तवाश्च द्वितीयेति समासः तस्मात् अप्राप्तलक्षणत्वं वक्तव्यमपि अत्र तादृशं अत्र संगतिमात्र

नायं युक्तः समाचारः पांडवेषु महात्मसु यत्कामात्पुंडरीकाक्षं पांडवार्चितवानसि २ बाला यूयं न जानीध्वं धर्मः सूक्ष्मो हि पांडवाः अयं च स्मृ
त्यतिक्रांतो ह्यापगेयोऽल्पदर्शनः ३ त्वादृशो धर्मयुक्तो हि कुर्वाणः प्रियकाम्यया भवत्यभ्यधिकं भीष्म लोकेष्ववमतः सतां ४ कथं ह्यराजा दाशा
र्हो मध्ये सर्वैर्महीक्षितां अर्हणामर्हति तथा यथा युष्माभिरर्चितः ५ अथवा मन्यसे कृष्णं स्थविरं कुरुपुंगव वसुदेवे स्थिते वृद्धे कथमर्हति तत्सु
तः ६ अथवा वासुदेवोपि प्रियकामोऽनुवृत्तवान् द्रुपदे तिष्ठति कथं माधवोऽर्हति पूजनं ७ आचार्यं मन्यसे कृष्णमथवा कुरुनंदन द्रोणे ति
ष्ठति वार्ष्णेयं कस्मादर्चितवानसि ८ ऋत्विजं मन्यसे कृष्णमथवा कुरुनंदन द्वैपायने स्थिते वृद्धे कथं कृष्णोऽर्चितस्त्वया ९ भीष्मे शांतनवे राजन्
स्थिते पुरुषसत्तमे स्वच्छंदमृत्युके राजन्कथं कृष्णोऽर्चितस्त्वया १० अश्वत्थाम्नि स्थिते वीरे सर्वशास्त्रविशारदे कथं कृष्णस्त्वया राजन्नर्चितः कुरु
नंदन ११ दुर्योधने च राजेन्द्रे स्थिते पुरुषसत्तमे कृपे च भारताचार्ये कथं कृष्णस्त्वयार्चितः १२ द्रुमं किंपुरुषाचार्यमतिक्रम्य तथार्चितः भीष्म
के चैव दुर्धर्षे पांडुवत्कृतलक्षणे १३ नृपे च रुक्मिणि श्रेष्ठे एकलव्ये तथैव च शल्ये मद्राधिपे चैव कथं कृष्णस्त्वयार्चितः १४ अयं च सर्वराज्ञां
वै बलश्लाघी महाबलः जामदग्न्यस्य दयितः शिष्यो विप्रस्य भारत १५ येनात्मबलमाश्रित्य राजानो युधि निर्जिताः तं च कर्णमतिक्रम्य क
थं कृष्णस्त्वयार्चितः १६ नैव ऋत्विग्न चाचार्यो न राजा मधुसूदनः अर्चितश्च कुरुश्रेष्ठ किमन्यत्प्रियकाम्यया १७ अथवाभ्यर्चनीयोऽयं यु
ष्माकं मधुसूदनः किं राजभिरिहानीतैरवमानाय भारत १८ वयं तु न भयादस्य कौंतेयस्य महात्मनः प्रयच्छामः करान्सर्वे न लोभान्न च
सांत्वनात् १९ अस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः करानस्मै प्रयच्छामः सोऽयमस्मान्न मन्यते २० किमन्यदवमानाद्धि यदेनं
राजसंसदि अप्राप्तलक्षणं कृष्णमर्घेणार्चितवानसि २१
त्वात् अलक्षणमित्यस्मिन्सादिक्रमेणेरिति वाक्येनायात्मायं २१

२२ धर्मच्युतत्वमेवाह योयमिति राजानं कंसं २३ २६ अयुक्तामिति आत्मनः अयुक्तां पूजां व्यूढैः ते पूज्यपूजकभावेन भेदस्यायोगात् तथापि हविर्विघोनिः स्वदंष्ट्रलेशं प्राशितुं
द्वैपरीशाकशेषवत् प्राशनाय प्राप्य द्विषं ग्रहिवन्मायया भेदमारूढोपकोपहतत्वात्त्वा वदेव बहुमन्यसे निर्जने निर्मनुष्ये अंतरिक्षे श्वसतीति श्वा वायुः मातरिश्वा सदागति
रिति कोशः मातर्यन्तरिक्षे श्वसनीति याक्षः इति सारस्वतापाय कथापरोपैतुसप्ररणार्थः २७ प्रलंभंते अवलंबंते २८ २९ अध्यायः १ अधर्मश्चेति वैदैकग

अकस्मादिमपुत्रस्य सधर्मात्मेति शायशो गतं को हि धर्मच्युतं पूजामेवंयुक्तां नियोजयेत् २३ योयं वृष्णिकुले जातो राजानं हतवान्पुरा जरासंधं महात्मा
नमन्यायेन दुरात्मवान् २३ अद्य धर्मात्मतां चैव व्यपकृष्टा युधिष्ठिरात् दर्शितं कृपणत्वं च कृष्णेर्घस्य निवेदनात् २४ यदि भीतास्य कौन्तेयाः कृप
णास्तपस्विनः ननु त्वयापि बोद्धव्यं यां पूजां माधवाहसि २५ अथवा कृपणैरेतामुपनीतां जनार्दन पूजामनर्हः कस्मात्त्वमभ्यनुज्ञातवानसि
२६ अयुक्तामात्मनः पूजां त्वं पुनर्बहुमन्यसे हविषः प्राप्य निस्यंदं प्राशिता श्वेव निर्जने २७ न त्वयं पार्थिवेन्द्राणामपमानः प्रयुज्यते त्वामेव
कुरवो व्यक्तं प्रलंभंते जनार्दन २८ क्लीबे दारक्रिया यादृगंधे वा रूपदर्शनं अराज्ञो राजवत्पूजा तथा ते मधुसूदन २९ दृष्टो युधिष्ठिरो राजा दृष्टो भी
ष्मश्च यादृशः वासुदेवोप्ययं दृष्टः सर्वमेतद्यथातथं ३० इत्युक्त्वा शिशुपालस्तानुत्थाय परमासनात् निर्ययौ सहितो राजभिस्त
दा ३१ इति सभापर्वणि अर्घाभिहरणे वैशंपायन उवाच ततो युधिष्ठिरो राजा शिशुपालमुपाद्रवत् उवाच चैनं मधुरं सांत्वपूर्वमिदं व
चः १ नेदं युक्तं महीपाल यादृशं वै त्वमुक्तवान् अधर्मश्च परो राजन् पारुष्यं च निरर्थकं २

न्यायपरदेवताकृत्स्नो न तर्कगम्यात् तर्कबलेन तु तां घ्नन्ताच्छात्रागमस्य शाकल्यस्येव तवाधर्मो महान्भवतीत्यर्थः यतः पारुष्यं च निरर्थकं परत्र पिपर्वाणि तुंडाः भेद इति यावत्
पत्रूपं च पारुष्यं स्वार्थंत्रयं निरर्थकं स्वप्नगजवदर्थशून्यमाभासमात्रं पौरुषं चेति पाठे पुरुषधर्मः कर्तृत्वादिः पौरुषं तदपि सुप्तिसमाध्यादौ व्यगात्म निरस्त्रदर्शना
त्रज्जुरगादिवदाभासमात्रं तत्राधिष्ठानभूतं आत्मवस्तु कृत्स्नमेव निरधिष्ठानकभ्रमायोगात् २

एतद्वयोगबलेनैव भीष्मो वेदेत्याह नहीति परो धर्मः अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति याज्ञवल्क्योक्तेः यतस्तं भीष्मो वेदातोऽस्य वचस्सु विश्वासो न कर्तव्य इत्यर्थः
कथापक्षेपात्कृष्णं कुर्वीकालं ३ ५ अनुनयः नयो युक्तिस्तामनु पश्चात् भवतीति अनुनयो मननानन्तरभावि ध्यानं योग इति यावत्तेनात्मैवास्तं भावनाग्रस्तायनदेयः ५
श्लेषेऽनुनयः कुपितप्रसादनं सान्त्वनेशमं तस्य गुणोपालम्भाभावादनधिकारितोऽयमित्यर्थः ६ तत्र मूढं मूढभावपैयेव बोधयेदिति न्यायेन शिशुपालमतमनुसृत्यैव कृष्णस्याधि

नहि धर्मं परं जातु नावबुध्येत पार्थिवः भीष्मः शान्तनवस्त्वेनं मावमंस्थास्त्वमन्यथा ३ पश्य चैतान्महीपालांस्त्वत्तो वृद्धतरान्बहून् मृष्यन्ते चार्ह
णां कृष्णे तद्वत्त्वं क्षन्तुमर्हसि ४ वेद तत्त्वेन कृष्णं हि भीष्मश्चेदिपते भृशं नह्येनं त्वं तथा वेत्थ यथैनं वेद कौरवः ५ भीष्म उवाच नास्मै देयो
ह्यनुनयो नायमर्हति सान्त्वनं लोकवृद्धतमे कृष्णे योऽर्हणां नाभिमन्यते ६ क्षत्रियः क्षत्रियं जित्वा रणे रणकृतां वरः यो मुञ्चति वशे कृत्वा
गुरुर्भवति तस्य सः ७ अस्यां हि समितौ राज्ञामेकमप्यजितं युधि न पश्यामि महीपालं सात्वतीपुत्रतेजसा ८ नहि केवलमस्माक
मयमर्च्यतमोऽच्युतः त्रयाणामपि लोकानामर्चनीयो महाभुजः ९ कृष्णेन हि जिता युद्धे बहवः क्षत्रियर्षभाः जगत्सर्वं च वार्ष्णेये निखिले
न प्रतिष्ठितं १० तस्मात्सत्स्वपि वृद्धेषु कृष्णमर्चाम नेतरान् एवं वक्तुं न चार्हस्त्वं मा ते भूद्बुद्धिरीदृशी ११

कामाहद्दाम्यांसत्रियरति ८ इतोऽप्यधिकमाह नहीति त्रैलोक्यान्तर्गतानां ब्रह्मादीनामित्यर्थः ९ इदानींतनक्षत्रियेभ्यः क्षत्रियर्षभाः श्रेष्ठा हिरण्याक्षादयः वार्ष्णेये ह
वंसप्रतिष्ठितं विलीनं किं कनककुण्डलन्यायेनेत्याह निखिलेनेति समासमपि कनकबुद्ध्यो कुण्डलबुद्ध्यनपायात्तद्वत्सर्वन्यायेनैवेयं संप्रतिष्ठा ज्ञानादेव तु कैवल्यमि
तिश्रुतेश्च प्रशान्ते तु ब्रह्मणः कनकवत्परिणामित्वं कुण्डलस्येव प्रपञ्चस्य क्रियया प्रविलाप्यत्वं च स्मात् तथा चासंगो ह्ययं पुरुष इत्यसंगत्वश्रुतेर्ज्ञानादेवेत्यवधारणा
स च व्यापकोऽपरंतिरिक्त १० ११

वक्ष्यैषप्रमाणमाह ज्ञानवृद्धा इत्यादिना १२ कर्म्माणि एतन्नावधारयेति १३ १४ कृतार्थं कृतं स्वार्थं उपकारं १५ १६ वैश्यानामिति। लक्ष्मीपतित्वात् गुणाः पुरुषत्वा
द्य नियताः स्युतेः कर्म्मजत्वात् प्रसवकर्तृजत्वाद्वेषामस्थैर्यं भवन्तीमर्थः २० लोकसंपन्नं ज्ञानसंपन्नं २१ २२ लोकदृष्ट्या कृष्णमाहात्म्यमुक्त्वा शास्त्रदृष्ट्यापि तदाह

ज्ञानवृद्धा मया राजन्बहवः पर्युपासिताः तेषां कथयतां शौरेरहं गुणवतो गुणान् १२ समागतानामश्रौषं बहून्बहुमतान्सतां कर्माण्यपि च या
न्यस्य जन्मप्रभृति धीमतः १३ बहुशः कथ्यमानानि नरैर्भूयः श्रुतानि मे न केवलं वयं कामाच्चेदिराज जनार्दनं १४ न संबंधं पुरस्कृत्य कृतार्थं
वा कथंचन अर्चामहेऽर्चितं सद्भिर्भुवि भूतसुखावहं १५ यशः शौर्यं जयं चास्य विज्ञायार्चां प्रयुञ्ज्महे न च कश्चिदिहास्माभिः सुबालोऽप्यपरीक्षितः १६
गुणैर्वृद्धानतिक्रम्य हरिरर्च्यतमो मतः ज्ञानवृद्धो द्विजातीनां क्षत्रियाणां बलाधिकः १७ वैश्यानां धान्यधनवान् शूद्राणामेव जन्मतः पू
ज्यतायां च गोविंदे हेतू द्वावपि संस्थितौ १८ वेदवेदांगविज्ञानं बलं चाप्यधिकं तथा नृणां लोके हि कोऽन्योऽस्ति विशिष्टः केशवादृते १९
दानं दाक्ष्यं श्रुतं शौर्यं ह्रीः कीर्तिर्बुद्धिरुत्तमा संनतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताच्युते २० तमिमं सर्वसंपन्नमाचार्यं पितरं गुरुं अ
र्च्यमर्चितमर्चार्हं सर्वे संक्षंतुमर्हथ २१ ऋत्विग्गुरुर्विवाह्यश्च स्नातको नृपतिः प्रियः सर्वमेतद्धृषीकेशस्तस्मादभ्यर्चितोऽच्युतः २२ कृ
ष्ण एव हि लोकानामुत्पत्तिरपि चाव्ययः कृष्णस्य हि कृते विश्वमिदं भूतं चराचरं २३

कृष्ण एवेति उत्पत्तिरपि उपादानमपि अव्ययः अविनाशी स्वपरिणामित्वात् रज्जुवत् सरिणामुपादानस्य नाशाद्वश्यंभावादिति भावः अव्ययइति पाठे लयस्थानं कृष्णस्य
कृते कृष्णार्थं सर्वशेषित्वात् कृते इत्यव्ययं तादर्थ्ये निपात्यते भूतं उत्पन्नं तेन विनाऽपि एतत् कृष्ण एव समस्तमपि ज्ञेयं २३

नन्वपरिणामित्वे कृत्स्नस्य कथं परिणामिनमाकाशादिकं प्रत्युपादानत्वं कारणस्य कार्यसजातीयत्वनियमादित्याशंक्याह एषा प्रकृतिः उपादानं सनातनः अव्यक्ताव्यक्ता रज्जुरिव
सर्पस्य सत्ताप्रदत्वात्सर्पस्य कर्त्री महदहंकारादिरूप्यप्रपंचे परिणामवद्बुद्धिर्वर्तेऽपि कार्यस्य कारणानन्यत्वात् महदादेश्च विवर्तरूपत्वात् नन्वन्योऽन्यत्रात्मत्वं कल्पयति महदादेस्तक
थं सदात्मनित्वस्वकल्पकत्वमित्याशंक्याह सतानन इति शुक्तिरजतपादावपि तेषां संस्कारात्मनासत्वमस्ति अतः कदाचित्तत्सत्तीयमानत्वान्मिथ्यात्वेपि भ्रमततत्संस्कारपरंपराप
बीजांकुरवदनादित्वान्महदादिरपि सनातनोऽनादिरेवेत्यर्थः ननु एवं घटकादिमत्वदात्मनि महदादेराविर्भावतिरोभावौ उक्तौ स्यातां तथा चात्मनस्समसत्ताकत्वं तयोः
स्यादित्यत आह पर इति सर्वभूतेभ्यस्तत्रेभ्यो महदादिभ्योऽतिरिक्तः महदाद्युपादानं तज्ज्ञानमेव न तु चिदात्मा तदपि रज्ज्वज्ञानवत्तदभावेऽपि बाधेऽपि तत्सत्ताकस्तत्र

एषा प्रकृतिरव्यक्ता कर्त्री चैव सनातनः । परश्च सर्वभूतेभ्यस्तस्मात्सृजतमोच्युत ॥ २४
बुद्धिर्मनो महद्वायुस्तेजोंऽभः खं मही च या । चतुर्विधं च यद्भूतं सर्वं कृत्स्ने प्रतिष्ठितं ॥ २५

येपि तत्कार्यमाशीर्दिशि प्रसज्यात् यादृशो यक्षस्तादृशो बलिरिति न्यायेन कार्यवत् अनिर्वचनीयमेव कल्प्यते अतः कृत्स्न एव परेण तज्ज्ञानं त्रैकालिकबाधविषयत्वान्न सेति
भावः कृत्स्नतम इति निरुपाधिकरूपमविषयत्वेन सर्वशेषित्वं च तस्यात्मत्वं चोक्तं [illegible] अच्युत इति भोक्तृत्वरूपविकारनिषेधः अहंकारस्यैव भोक्तृत्वादा
त्मनि च तत्त्वं चांशस्य वत्तदुपधानात्कल्पितमिति भावः २४ अत एव कृत्स्नाद्वैतसिद्धमित्याह बुद्धिरित्यादिना प्रतिष्ठितं रज्जूरगवत्कृत्स्नानन्यत्वादित्यर्थः बुद्धिरहं
कारः मन इत्यैन्द्रियाण्येकादश महान्महत्तत्त्वं वायुपंचकेन पंचतन्मात्राणां स्थूलभूतानां च ग्रहणं चतुर्विधं जरायुजादि भौतिकं २५

२९ सर्वत्रसर्वदासन्नात्स्फूर्तिमदलेनसंतमितिशेषः ३० तत्कृष्टंधर्मंस्त्वात्मदर्शनं ३१ ३३ अध्यायः षण्णविधः कृस्नः सएववसुदेवसूनुरितिसहदेवप्रतिज्ञानारदवचना
भ्यांनिश्चेतुमध्यायमारभंतएवमुक्तेसादि १ अप्रमेयोनिर्गुणत्वात् परंपश्चाद्विकार्यत्वात् सात्माकामतिमाप्नोतीतिपराक्रमस्तत्पादानं अप्रमेयस्यात्मेपराक्रमस्य

पास्याय५

आदित्यश्चंद्रमाश्चैवनक्षत्राणिग्रहाश्चये दिशश्चविदिशश्चैवसर्वंकृस्नेप्रतिष्ठितं २६ अग्निहोत्रमुखावेदागायत्रीछंदसांमुखं राजामुखं
मनुष्याणांनदीनांसागरोमुखं २७ नक्षत्राणांमुखंचंद्रआदित्यस्तेजसांमुखं पर्वतानांमुखंमेरुर्गरुडःपततांमुखं २८ ऊर्ध्वंतिर्यगधश्चैव
यावतीजगतोगतिः सदेवकेषुलोकेषुभगवान्केशवोमुखं २९ अयंतुपुरुषोबालःशिशुपालोनबुध्यते सर्वत्रसर्वदाकृस्नंतस्मादेवंप्र
भाषते ३० योहिधर्मंविचिनुयादुत्कृष्टंमतिमान्नरः सवैपश्येद्यथाधर्मंनतथाचेदिराडयं ३१ सवृद्धबालेष्वथवापार्थिवेषुमहात्मसु को
नार्हंमन्यतेकृस्नंकोवाप्येनंनपूजयेत् ३२ अथैतांदुष्कृतांपूजांशिशुपालोव्यवस्यति दुष्कृतायांयथान्यायंतथायंकर्तुमर्हति ३३ इतिसभापर्वणिअ
र्घाभिहरणे वैशंपायनउवाच एवमुक्त्वाततोभीष्मोविररामहाबलः व्याजहारोत्तरंतत्रसहदेवोर्थवद्वचः १ केशवंकेशिहंतारमप्रमेयपरा
क्रमं पूज्यमानंमयायोवःकृस्नंनसहतेनृपाः २ सर्वेषांबलिनांमूर्ध्निमयेदंनिहितंपदं एवमुक्तेमयासम्यगुत्तरंप्रब्रवीतुसः ३ सएवहि
मयावध्योभविष्यतिनसंशयः मतिमंतस्तुयेकेचिदाचार्यंपितरंगुरुं ४ अर्च्यमर्चितमर्घार्हमनुजानंतुतेनृपाः ततोनव्याजहारैषांकश्चि
द्बुद्धिमतांसतां ५ मानिनांबलिनांराज्ञांमध्येवैदर्शितेपदे ततोपतत्पुष्पवृष्टिःसहदेवस्यमूर्द्धनि ६ अदृश्यरूपावाचश्चाप्यब्रुवन्साधुसा
ध्विति आविध्यदजिनंकृस्नंभविष्यद्भूतजल्पकः ७ सर्वसंशयनिर्मोक्तानारदःसर्वलोकवित् उवाचाखिलभूतानांमध्येस्पष्टतरंवचः ८

तिसमासः सुहृच्छवलत्रह्मकृस्नोपायंकेशिहंतेत्यर्थः १ २ ३ ४ ५ ६ ७ ८

ननु उपास्यविषयस्य ब्रह्मभावोऽस्मदादीनामप्यस्ति न हि विषयापत्तु फलशालाद्धुवत्कृष्णस्यास्माकं च ज्ञानैश्वर्यतारतम्येऽपि तस्य आवृतत्वेनास्मदादिवदुभयविध ब्रह्मभावो ना
स्त्येवेत्याशंक्याह कृष्णमिति यथा परिमाणतारतम्यस्य विश्रान्तिराकाशादौ देशतः कालतश्चापरिच्छेदाभावान्दृष्टा तथा ऐश्वर्यतारतम्यस्यापि द्रष्टव्या ननु त्वलयकार्यमा
त्रनाशस्य वक्तव्यत्वात्कथं कृष्णविग्रहस्य कालापरिच्छेद्यत्वं युज्यते इति चेन्न तस्याकार्यत्वात् न हि स्वर्गादौ दाहनस्य हिरण्यगर्भमुक्तादिविशिष्टस्य ब्रह्मणः कार्यत्वं वक्तुं शक्यं श्रुतं
तद्धर्मोपदेशादिति न्यायविरोधात् शास्त्रांतरन्यायविरोधाच्च न त्रहि नित्यसिद्धेश्वरस्यार्वाचीनानां ज्ञानध्यानसिद्धानामीश्वराणामैश्वर्यं वियदादिजगत्सृष्टिसंहारादिव्या
पारवर्जं तेन सह भोगसाम्यमात्रं हेतुश्चाचोक्तः अस्तत्विहितत्वादिति भौतिकपदार्थसृष्ट्यादिक्रमकाले हितेषां सृष्टिप्रलयाविति न ते भूतानां निलयकाले सन्निहिताः स्व
यं तु तदानीमपि सन्निहितोऽस्तीति नित्य एव व्यवहारतः सर्वपरंपरापाश्चाद्यतनश्रुत्वान्न हेतुहेतोरस्यापि तथात्वं दुर्वारं न तस्य नित्यत्वे तल्लोकादेरपि नित्यत्वं वाच्यं तथा चाद्वैत

कृष्णं कमलपत्राक्षं नार्चयिष्यन्ति ये नराः । जीवन्मृतास्तु ते ज्ञेया न संभाष्याः कदाचन ९

लस्यास्तीति चेन्न प्राप्नोति यथा त्रैलोक्यनाशेऽपि ब्रह्मलोकाद्यस्ति तथा ब्रह्मलोकनाशेऽपि तल्लोकादिकमस्ति यथा तस्मिन्नपि ब्रह्मलोकादिषु त्वस्मदादीनां शुद्धं कैवल्यमप्रति
हतं तथा तस्मिन्नपि सति भविष्यतीति का नो हानिः ये तु तल्लोकप्राप्तिरेव कैवल्यमिति साधुस्तद्ध्यानमिति सूत्रादिति मन्यन्ते केचिदाहुरीशं सांबं केचिद्धिरण्यगर्भं केचिद्
रामं केऽप्येवं नद्विधाः पार्थसारथिं तस्मात्कृष्णं कमलपत्राक्षस्य रूपं वीक्षणीयास्त्वसंगस्य साक्षाद्ब्रह्मत्वं इतरेषां तूपाधितादात्म्यव्यवहितमिति महान्भेद इत्युक्तं कृष्णस्या
चैकोपतमतं अतः कृष्णशरीरे वदेहेंद्रियाद्युपाधिसांनिध्यात् मुकुरस्थलवत्कृष्णस्वरूपेण चरमे जन्मनि परागृह्यरूपात्मना भासमानत्वादिति दिक् ९

१२ १३ सुनीथः शिशुपालः १४ १५ निर्वेदात् अपमानेन देहादौ वैराग्यात् आत्मनिश्चयात् तत्त्वज्ञानिश्चयात् १६ १७ समयं संकेतं १९ अध्यायः २ अत्र

वैशंपायन उवाच स कृत्वा पिता च पूजार्हानां ब्रह्मक्षत्रविशेषवित् सहदेवो नृणां देवः समापयत कर्म तत् १९ तस्मिन्नभ्यर्चिते कृष्णे सुनीथः शत्रुकर्षणः
अतिताम्रेक्षणः कोपादुवाच मनुजाधिपान् २१ स्थितः सेनापतिर्योऽहं मन्यध्वं किं नु सांप्रतं युधि तिष्ठाम सन्नद्धाः समेतान् वृष्णिपांडवान् २२
इति सर्वान् समुत्साह्य राज्ञस्तांश्चेदिपुंगवः यज्ञोपघाताय ततः सोऽमंत्रयत राजभिः २३ तत्राहूतागताः सर्वे सुनीथप्रमुखा गणाः समदृश्यन्त संक्रु
द्धा विवर्णवदनास्तथा २४ युधिष्ठिराभिषेकं च वासुदेवस्य चार्हणं न स्याद्यथा तथा कार्यमेवं सर्वे तदाब्रुवन् २५ निःकर्षान्निश्चयात् सर्वे राजानः क्रो
धमूर्छिताः अब्रुवंस्तत्र राजानो निर्वेदादात्मनिश्चयात् २६ सुहृद्भिर्वार्यमाणानां तेषां हि वपुराबभौ आमिषादपकृष्टानां सिंहानामिव गर्जतां २७
तं बलौघमपर्यंतं राजसागरमक्षयं कुर्वाणं समयं कृष्णो युद्धाय बुबुधे तदा २९ इति सभापर्वणि अर्घाभिहरणं समाप्तं वैशंपायन उवाच ततः
सागरसंकाशं दृष्ट्वा नृपतिमंडलं संवर्तवाताभिहतं भीमं क्षुब्धमिवार्णवं १ रोषात् प्रचलितं सर्वमिदमाह युधिष्ठिरः भीष्मं मतिमतां मुख्यं वृ
द्धं कुरुपितामहं २ बृहस्पतिं बृहत्तेजाः पुरुहूत इवारिहा असौ रोषात् प्रचलितो महान् नृपतिसागरः अत्र यत् प्रतिपत्तव्यं तन्मे ब्रूहि पितामह ३
यज्ञस्य च न विघ्नः स्यात् प्रजानां च हितं भवेत् यथा सर्वत्र तत् सर्वं ब्रूहि मेऽद्य पितामह ४ इत्युक्तवति धर्मज्ञे धर्मराजे युधिष्ठिरे उवाचेदं वचो भी
ष्मस्ततः कुरुपितामहः ५

स्वतं भवेयत्र इति पाठे नः अस्माकं स्वतं अमुमोदर्के ३ ५ ॥

शिवः पंथाः कस्माच्छ्रयणीयः सुनीतः सुनीतिमद्भिराहृतः ६ १० नूनमेतदिति यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंशसंभवमिति भगवद्वचनात् शि
शुपालोपि विभूतिमत्वात्पूर्वं भगवदंशस्वादवत्वाद्वा परमेश्वरं तानेश्वर्यादिरूपं तेजोस्ति तस्मादादानं तदिह पाते नैवेति हंतुमिच्छतीत्यर्थः पुनः शब्दो हिरण्याक्षादिरूपेक्षया ११ १२

मा मे त्वं कुरु शार्दूलस्वामिं हंतुमर्हसि शिवः पंथाः सुनीतोत्र मया पूर्वतरैर्वृतः ६ प्रसुप्तं हि यथा सिंहं श्वानस्तमुपागताः भषेयुः सहि
ताः सर्वे तथेमे वसुधाधिपाः ७ इस्मिंसिंहस्य सुप्तस्य तथामी च मुखस्थिताः भषंते तात संक्रुद्धाः श्वानसिंहस्य सन्निधौ ८ नहि संबुध्य
ते यावत्तु मे सिंहः श्वा च्युतः तेन सिंहीकरोत्येतान्नृसिंहश्चेदिपुंगवः ९ पार्थिवान्पार्थिवश्रेष्ठ शिशुपालोऽप्रचेतनः सर्वान्सर्वात्मना ता
त नेतुकामो यमक्षयं १० नूनमेतत्समादातुं पुनरिच्छत्यधोक्षजः यदस्य शिशुपालस्य तेजस्तिष्ठति भारत ११ विप्लुता चास्य भद्रं ते बुद्धिर्बुद्धि
मतां वर चेदिराजस्य कौंतेय सर्वेषां च महीक्षितां १२ आदातुं च नरव्याघ्रो यं यमिच्छत्ययं तदा तस्य विप्लवते बुद्धिरेवं चेदिपतेर्यथा १३ चतुर्वि
धानां भूतानां त्रिषु लोकेषु माधवः प्रभवश्चैव सर्वेषां निधनं च युधिष्ठिर १४ वैशंपायन उवाच इति तस्य वचः श्रुत्वा ततश्चेदिपतिर्नृपः भीष्मं
रूक्षाक्षरा वाचः श्रावयामास भारत १५ इति सभापर्वणि शिशुपालवधे

आदातुं संहर्तुं विप्लवते विपर्ययं प्राप्नोति १३ कुतः कस्मादेषां तेजांस्यादत्ते न तु तानि दृष्टानि तिष्ठंतीत्यत आह चतुर्विधानामिति चेतनाचेतनप्रपंचस्य जलतरंगबुद्बुदस्ये
व नतत्त्वेनोत्पत्तिप्रलययोः प्रवरणात् एषयोनिः सर्वस्य प्रभवाप्ययौ हि भूतानामपि ति तदनमत्वात्सर्वस्येति भावः १४ १५ अध्यायः ॥

सभा० ६४

ननु विभीषिकाभिर्बह्वीभिरित्यादिग्रंथो भगवन्निंदापरत्वान्न भूतार्थवादः किंतु ध्यानमात्रं श्रेयसा तूष्णीं पापकं नत्वद्वेषेणापि कर्तव्यमित्यतिशयोक्तिमात्रं ध्यानविधेस्तावकं अत्र
मया भगवन्निंदाकृतेवेनादीनां भगवन्निंद्यावेनाह्निजेस्तमपि पातितइत्यादिदोषस्मरणमनुपपन्नं स्यात् तृह्यदारणकपंचमेच ब्रह्मविदं याज्ञवल्क्यं द्विषतः शाकल्यस्यसघो
मस्तुतक्षोः स्थ्यांनु संस्कारालाभेन दुर्गतिश्च सूचिता सा श्लाघ्य ब्रह्मद्विषस्ततोऽप्यधिकं दुःखं वक्तव्यं स्यात् अत्र च द्विषतोऽपि शिशुपालस्यापराधशतं क्षांतवतस्सै भगवतस्वसा
युज्यं दत्तमित्युच्यते तस्मान्निंदाग्रंथः प्रकरणसंगतेर्भगवत्समर्थनेतत्वाभावाद्भूतार्थवाद एवं तथा हि त्रिविधोऽर्थवादः विरोधगुणवादस्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानात्त्रिधा
इत्यधामनइत्युक्तलक्षणः एतेषां क्रमादुदाहरणानि प्रजापतिरात्मनो वपामुदखिदत् सर्वयोगत्वनेनेदंहस्येवनाशो भवतीति भूतार्थवादोऽयं अग्निर्हिमस्य भेषजं मेधा
तिथिं हृकारणवाचनं मेधो भूत्वेति इज्जहरिमादीनि तस्मादिहनिंदकस्य मुक्तिर्विरुद्धत्वे भूतार्थवाद एवेति चेन्न न हृत्कृत्स्नस्यापि भागतस्तत्त्वालापत्तेः अनन्यगतिकत्व कारणवा
धापत्तेश्चानर्थकापतितहतानां विपरीतं वलावत्वमिति न्यायेनाकाशादिश्रुतिवत्त्रिंशच्छ्रुतिरपि गौणपाहत्वाद्ब्रह्मपरतयानेयेति युक्तमुत्पश्यामः अत एव श्रीमद्भागवतेऽपि ह

शिशुपाल उवाच विभीषिकाभिर्बह्वीभिर्भीषयन्मस्व पार्थिवान् न त्वपत्रपसे कस्माद्वृद्धः स्वकुलपांसनः १

रितिं द्वयंस्य स्तुतिपरत्वेनैवव्याख्यातः श्रीधरस्वामिभिः एवं भीष्मेणावबोधितः शिशुपालः स्वबोधमाविश्चिकीर्षुर्भीष्मं तावन्महीकरोति विभीषिकाभिरिति हेनत्रपसः
त्वं कुलपांसनः वृद्धः सन् नः अस्मान् पार्थिवान् बह्वीभिर्विभीषिकाभिः भीषयन् कस्मान्न त्रपसे इति योजना नीतुं स्तोतुं योग्यं नत्वं पाति गोपयतीति हे नयपहे परमेश्वरस्तव
गृहनपर कुलपांकुलपत्नीनां कुलनारीकाणां ब्रह्मविदां मध्ये वृद्धः सन् नः अस्मान् पार्थिवान् शरीरकारणत्व पृथिवीमात्रनिष्ठात्पृथिव्यंशबाहुल्यात् शरीरस्य पृथि राम० ६४
वीत्वं पञ्चशरीरं स्यात् पृथिवीतिश्रुतेश्च देहाभिमानयुक्तान् बह्वीभिर्नानाविधभेदवतीभिर्विभीषिकाभिः संसारभीतिहेतुभिः प्रमातृत्वप्रमाणताभिः कर्तृत्वभोक्तृत्वादिभिः
भीषयन् भीषयितुं किमिति त्रपसे त्वया हे हेनास्माकं संसारभयं प्रदर्शनीयमेव न तु तत्रास्माकमनधिकारमाशंक्य भीतिहरं तत्त्वं गोपनीयमित्यर्थः २

ननु वक्तृत्वमपि त्वत्कर्मैवेत्याशंक्य यथाज्ञातं तथा नोक्तमित्याह स्वकर्मेति तृतीयायां प्रकृतौ वर्तमानया एतदेव धर्मादयेत्यर्थं वक्तुं युक्तमित्यन्वयः द्वे प्रकृती परित्यज्य इमे मा
यातस्यांचित्सतिविंबस्वतृतीयाप्रकृतित्वेनतत्कुम्भपार्थ्यासाधिष्ठानं निर्विशेषं त्वत्कृतत्ववर्तितावर्तमानेनतन्मात्रनिष्ठेनतयाधर्मादयेतः मोक्षः तस्यात्कर्मत्वाभावात्तदर्थं धर्मो
दिसत्तुक्तमात्तः मोक्षार्थमेतदेव तृतीयप्रकृतिरूपं वक्तुं युक्तं ननु सगुणं अस्माकं ब्रह्मलोकांतस्योपासनाफलस्यानपेक्षितत्वादित्यर्थः एवं च यथाज्ञातं तथा नोक्तमि
त्युक्तं भवति उक्तार्थे हेतुमाह त्वं हि सर्वं कुरुत्वमसि २ एतदेव सदृष्टांतं विवृणोति नावीति यथाऽरित्रकर्णधारादिमत्यां महानावि संबंधाद्धास्युक्तार्नोः पारं प्राप्नोति
यथावोः ध्वशरीरं जडत्वात् अंधः अत्र भिस्माहीमत्कं मंदधीत्र्यपि समरं अविपात् अतुलश्रीकृष्णवलेन अत्र इहमाराद् इति स्मुनेरनुभवाद्यातथाभूताः त्वदधीनगतपत्व

उक्तमेतत्तृतीयायां प्रकृतौ वर्तिता त्वया वक्तुं धर्मादयेत्यर्थे त्वं हि सर्वं कुरुत्वम २ नाविनौरिव संबद्धा यथांऽधोऽधमतिर्यात
तथाभूता हि कौरव्यापेयाभीप्सितमग्रणोः ३ दृत्तनाद्यातस्वाशिकर्मारुपस्य विशेषतः त्वया कीर्तयतास्माकं भूयः प्रत्य
र्थितं मनः ४ अगलितसमूर्तस्य केशवं स्तोतुमिच्छतः कथं भो मन्तते जिह्वा शतधा यं विदीर्यते ५

दधीनजीवनाम्नकौरव्याः येषां चास्मदादीनां त्वं अग्रणीः पुरोभूत्वा प्ररूपार्थेशप्रकृत्यापि तथाभूता एवेत्यर्थः तस्मादनन्यगतिका नामास्माकं अवश्यं त्वया उपदेशः
कर्तव्य इति भावः ३ दृत्तनेति अस्य सगुणब्रह्मणः अथिते निर्गुणेऽपि गुणारोपेण वक्तृत्वगोपनात् दुःखितमित्यर्थः ४ अवेतिलितसमूर्तस्य इच्छतः इति
कर्मणि षष्ठी लितं विषयसंगिनं मूढं मां केशवं स्तोतुमिच्छं तं अवत्तुच्छमपि भगवद्भक्तं मां पालय हितोपदेशेनेति भावः अस्मात्स्वयमेनदिस्माहकथमिति हे भीष्म
हे वितहेविहृननतेनन्वेमादृशोपि उपनतेशिष्यरूपं जिह्वा त्वदीया लपाया तथा कथं न ईर्यते प्रेर्यते अनेकैः प्रकारैः तत्त्वं प्रतिपादयितुमिति शेषः ५

पत्रैतिपत्रमशुणोकुत्स्तानिंद्याबालतरैः आपाततउपनिषन्मात्राध्येतृभिर्वेदुभिः बालेतरैरितिपाठेऽहेहेरेपिपन्मनसानमनुतेयेनाहुर्मनोमतं तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपा
सतइत्यब्रह्मत्वेनकुत्साप्रयोक्तव्यातमिमंगोपयतीतिगोपः तंगोपंअधिकरणेद्वितीया तस्यसार्वलस्यगूहनकर्तारंमुग्धंसंस्तोतुंसम्यकुर्वतातुमिच्छसिसपार्थनामापंचमोऽल
कारः तंप्रस्तोतुंस्तुतिंकुर्विमर्थः ६ अनंतब्रह्मांडाधिपेमायाविन्यपिप्रहननाघातास्क्रिमसंततुच्छमिमाहूपूतनाघनेनेत्यादिनापाठांतरेशकुनिवत्वेचचारत्त्वरणावत्त्वे ७ ८
इतितेसनः शृण्वानाः विस्मयमागताः नत्वहमित्यर्थः १० यस्यचेति यस्यरोपधारैः अत्रंचरत्रीपंशाकलेशादिभुक्तंतत्रकंसः कामयमानः दुर्वासाः तस्मारिकंद

यत्रकुत्साप्रयोक्तव्याभीष्मबालतरैर्नरैः तमिमंज्ञानवृद्धःसन्गोपंसंस्तोतुमिच्छसि ६ यद्यनेनहतोबाल्येशकुनिश्चित्रमत्रकिं तौवा
श्ववृषभौभीष्मयौनयुद्धविशारदौ ७ चेतनारहितंकाष्ठंयद्यनेननिपातितं पादेनशकटंभीष्मतत्रकिंकृतमद्भुतं ८ वल्मीकमात्रःस
ताहंयद्यनेनधृतोऽचलः तदागोवर्द्धनोभीष्मनतच्चित्रंमतंमम ९ भुक्तमेतेनबह्वन्नंक्रीडतानगमूर्द्धनि इतितेभीष्मशृण्वानाःपरेविस्मयमा
गताः १० यस्यचानेनधर्मज्ञभुक्तमन्नंबलीयसः सचानेनहतःकंसइत्येतन्नमहाद्भुतं ११ नतेश्रुतमिदंभीष्मनूनंकथयतांसतां य
द्वक्ष्येत्वामधर्मज्ञंवाक्यंकुरुकुलाधम १२

यत्रचानेनकंसेनहतः गतः अतुसतः हंतेर्गत्यर्थत्वात् तदिष्टंसंपादितमित्यर्थः सर्वात्मनिकंसेशाकलेशेनतस्मैविश्वतृप्तिजातेसतिनाद्भुतमित्यर्थः ११
नतेनश्रेशिष्यसमीपेकथयतांसतांमुखात्इदंत्वदुक्तंहननावधादिमयाश्रुतं किंज्ञानस्यार्थनिरूपणेनेतिभावः हेकुलाधमकुलंगृहंअधर्मंयस्यगृहालीन स
मासधर्मरतयत्तुवाक्यंअहंवक्ष्येवोढुंशक्ष्येनकुरुअथमधर्मज्ञंअपक्वधर्मः श्रेयसुफलत्वात्कर्मोपास्तौ तदभिज्ञंमांप्रतितदेववाक्यंअशब्दार्थप्रतिपादकंवचः
निर्गुणब्रह्मविषयंकुरु तथाहंज्ञातुंशक्ष्येइत्यर्थः १२

स्त्रीष्विति १३ हिंसायाश्चानिष्टत्वाधुनत्वमुक्तं तत्त्वमपि विज्ञानवतीति वितथं मिथ्यैव हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यत इत्युक्तेः १४ स्वागेति ज्ञातज्ञापनं व्यर्थमित्यर्थः १५ गो
घ्न इति गां वाचं हृत्वा हिनस्ति यतो वाचो निवर्तन्त इति श्रुतेः स्वस्माद्यावर्तयति तथा ह्रीवह्रीसंष्टो सहायभूता मायातद्वन्ता वावामापि कसगुणावनः स्तुतिः कर्तव्यास्य
सोत्तमायः वागतीतः कथं संस्तवमर्हति न कथमपीति १६ मतिमतां मतिमद्भिः श्रेष्ठः प्रशस्यतमः संभावयतीति जनार्दनः संसारवर्द्धनेन जनपीडनकरः माया
वीश्वरः त्वहङ्कारात्तत्ववश्यपवश्च सो वा कात एतत्सर्वं पूतनाघातादि स्वात्मनि संभावयति सम्यक्त्वेनैव दर्शयति श्रेष्ठेन त्वया पदेवक्तव्यं तदेव लोकः सत्यमित्यध्य

स्त्रीषु गोषु न शस्त्राणि पातयेद्ब्राह्मणेषु च यस्य चान्नानि भुञ्जीत यत्र च स्यात्प्रतिश्रयः १३ इति सन्तोऽनुशासन्ति सज्जनं धर्मिणः सदा भीष्म लो
के हि तत्सर्वं वितथं त्वयि दृश्यते १४ ज्ञानवृद्धं च वृद्धं च भूयांसं केशवं मम अजानत इवाख्यासि संस्तवन्कौरवाधम १५ गोघ्नः स्त्रीघ्नश्च सन्भीष्म त
द्वाक्याद्यदि पूज्यते एवंभूतश्च यो भीष्म कथं संस्तवमर्हति १६ असौ मतिमतां श्रेष्ठ य एष जगतः प्रभुः संभावयति चाप्येवं त्वद्वाक्याद्वै ज
नार्दनः एवमेतत्सर्वमिति तत्सर्वं वितथं ध्रुवं १७ न गाथा गाथिनं शास्ति बहु चेदपि गायति प्रकृतिं यान्ति भूतानि भूलिङ्गशकुनिर्यथा १८

वस्तुतिवस्तुतत्त्वएतत्सर्वंक्रमेकिंयाऽऽपरांवितथंनिष्कलंनिष्क्रियमिमादिस्मृतेः १७ तत्र सर्वे ब्रह्म वदिष्यन्ति संप्राप्ते तु कलौ युगे नानुतिष्ठन्ति मैत्रेय शिश्नोदर
परायणा इति शब्दमात्रं वदन्ति न शमादिपरा भवन्ति तादृशो भीष्मो न भवतीमाहच्छाभ्यां नगाथेति भूलिंगो नाम भूशायी पक्षी मा साहसमिति निशं वदन्नपि सिंहदंष्ट्रा
न्तरस्थमांसमादत्ते स यं साहसमतिशयितं करोति तथा न हिंसादिकं कर्तव्यमिति वदन्नपि हिंसामेव करोतीत्यर्थः १८ ॥ श्री ॥ राम

त्वंनुअस्मिन्चरमेजन्मनियथावदसितथैवकरणीत्याह नूनमितिप्रकृतिः शरीरंजघन्याचरमा तथापांडवानामपिप्रकृतिर्जघन्यातः हेतोः पापीयसीवैरोक्तधर्मसंर
क्षकत्वरा प्राप्नोतिपाः वैरोक्तोधर्मइतिपाठेंऽपदनिर्वचनेआसेनैवप्राप्तत्वात् तंपातीतिपापास्त्रातिशयेनपापापापीयसीयोगात् १९ चरमदेहत्वेगमकमा
हेयपामिति अतोहेतोः सर्वथात्वंअवेतिसंबंधः कंअनेतुअते योत्रधर्मज्ञःधर्म्मज्ञोनभवतिपश्चसत्तांमार्गीतप्रभुः श्रुतः तमितियत्नत्स्छद्राधाहारेणयोज्यं २०
म

नूनंप्रकृतिरेषातेजघन्यानात्रसंशयः अतःपापीयसीचैषांपांडवानामपीष्यते १९ येषामर्थेनमःक्रस्त्वंवयेषांप्रदर्शकः धर्म्मवांस्त्वधर्मज्ञः
सतांमार्गोदवप्रभुतः २० कोहिधर्म्मिणामात्मानंज्ञानवृद्धानविदांवरः कुर्याद्यथात्वयाभीष्मकृतंधर्म्ममवेक्षता २१ चेत्वंधर्मविज्ञानासिय
दिप्राज्ञामतिस्तव अमकामाह्विधर्म्मज्ञाकन्यकाप्राज्ञमानिना अंबानामेतिभद्रंतेकथंसापहृतात्वया २२ तांत्वयापहृतांभीष्मकन्यां
नैषितवान्पतः भ्राताविचित्रवीर्यस्तेसतांमार्गमनुष्ठितः २३ दारयोर्यस्यचान्येनमिषतःप्राज्ञमानिनः तवजातान्यपत्यानिसज्जनाचीर्
णेपथि २४

यथावदसितथाकरणीयमेतदूर्षयितुंभीष्मस्यब्रह्मचर्य्यदाढ्येस्तौतिपंचभिः कोहीति धार्म्मिणांधर्म्मेऽधिकारिणां २१ अनेतिहेप्राज्ञमानिनात्वयाहृताप्राकन्यकामा
तेनेः कथंभद्रंअपनकथंचनहृठत्वान्नवब्रह्मचर्यस्य २२ नवभ्रातापितादृशरत्नाहृयामिति यदर्थंहृतासभ्रातापितांनैषितवान्अन्यकामाहोतिपूर्वोक्तहेतोरेवेत्यर्थः
२३ अंबानाम्नाप्रार्थ्यमानेनापित्वयाब्रह्मचर्येनसक्तमित्युक्ताधर्मसंकरेपित्वयातत्रसक्तमित्याहदारयोरितियस्यविचित्रवीर्यस्यहिप्राज्ञतवमिषतःपश्यतःमा
निनःमानवतः २४

कोहिधर्मइति हेभीष्मेनेतवीनकरिष्यहिहेत्वामुरस्तसधर्मोदंभदर्पौहि: कोपिनकोपीत्यर्थः नवकोपिदंभादिनायुतोधर्मोनास्तिअतःपरिदंधारयमिब्रह्मचर्येतदुथा आसनेनवलया
पिन्धातस्यैव सुखपसेनात्तदनंकर्तुमुक्तमेवासीदित्यर्थः वाशब्दोइवार्थे लज्जोपिपर्वमो मोहंप्राप्यैवक्लीववत्तंप्राप्यैवमूर्छितवतक्लीववद्वासंभावितविलवंतवब्रह्मचर्यमि
त्यर्थः २५ नास्तीति हेधर्मज्ञकश्चिदपिसाधनेशमदमादौतवत्पचर्यंदुष्टिंनपश्यामीतिनचापितुपश्याम्येव हिनेहितनिमित्तंत्वयायद्ब्रह्मचर्यसेवितात्दमपिपश्यामितत्र
लिंगंयएवंधर्ममब्रवीरिति २६ एवंकृत्स्नस्यैवस्वतत्त्वरूपंधर्मंदृष्टंतत्त्वमिनिमाइश्लोकत्रयंवाक्यं दृष्टादिकंत्वपसस्यषोडशीमपिकलांनार्हतिअनपत्यस्यव्रतादिकंनो

कोहिधर्मोस्तितेभीष्मब्रह्मचर्यमिदंत्वया यद्धारयसिमोहाद्वाक्लीवत्वाद्वानसंशयः २५ नत्वहंतवधर्मज्ञपश्याम्युपचयंक्वचित् नहितेसेविता
वृद्धायएवंधर्मवर्तकः २६ इष्टंदत्तमधीतंचयज्ञाश्चबहुदक्षिणाः सर्वमेतदपत्यस्यकलांनार्हतिषोडशीं २७ व्रतोपवासैर्बहुभिःकृतंभ
वतिभीष्मयत् सर्वंतदनपत्यस्यमोघंभवतिनिश्चयात् २८ सोऽनपत्यश्चवृद्धश्चमिथ्याधर्मानुशासनात् हंसवत्त्वमपीदानींज्ञातिभिः प्रा
प्नुयावधं २९

घमितेवंत्वमेनरः कथयंतीतियोजना २७ २८ सत्वंत्वनपत्यः सन्मिथ्याधर्मेत्वाध्यासिकधर्मोः पत्योस्मादनादितस्यत्वनुसारकः तंत्वनुसर्तुंवृद्धोवयोतीतत्वात्
योग्योहीत्यर्थः अनुशासनादितिपाठेमिथ्याधर्मानुशासनंदेहाभिमानियोग्यंशास्त्रंविहायाऽनपत्यश्चवृद्धश्चजातोसीतिशेषः तस्मात्हंसवत्संन्यासिवत्ज्ञातिभ्यः
ज्ञानेभ्यः तत्वज्ञानात्श्रवणादिव्यापारभेदात्बहुत्वंवधंगतिंमोक्षंगमत्यर्थःसहंतेऽरिदंरूपंश्रवणमननिदिध्यासनैः सम्यगनुष्ठितैरात्मानंप्राप्नुहीत्यर्थः २९

यस्त्वनृतामिसंधिः शठैर्नैवज्ञानंवदतिनवध्यानेनसाक्षात्करोतिसवध्यनरत्सस्मिन्नर्थेहंसाख्यापिकामाहएवंहीत्यादिना कुरुत्तमेसंतेन ३० ३८ नेत्वामितितेनइमेवसुधापाः
शरीरनृपाधाः इथ्वाञ्चधिपाः श्चालकाः मागाएकादशेद्रियाणिच तांनिहन्तुरपिहन्नगानिवनानायोनिपातेनीहिंस्तुरपिनतुहिंसितवंतः नत्रहननेदृष्टांतः संक्रुद्धाः पक्षिणः
स्तमंडजमिवेति। अपिः काष्ठाहिंसायात्रभावंयोतयति नत्रहेतुः हंसस्यधर्माणांहंसाः ध्यानभिक्षुकः तन्नुसेसदाध्यापिनंजितमारोंद्रियगणमित्यर्थः ३९ शार्ङ्गपांडिसमे

मि २

एवंहिकथयंस्त्वमेनराज्ञानविदःपुरा भीष्मयन्नदृहंसस्यकुशस्यामितवम्नृतावत ३० वृद्धः किलसमुद्रांतेकश्चिद्धंसोभवत्पुरा धर्मवागमथ्यावृत्तः
पक्षिणः सोनुशास्तिच ३१ धर्मंचरतमाधर्ममितितस्यवचः किल पक्षिणःशुश्रुवुर्भीष्मसततंसमवादिनः ३२ अथास्यभक्ष्यमाजह्रुः समुद्र
जलचारिणः अंडजाभीष्मतस्यान्येधर्मार्थमितिशुश्रुम ३३ तेचतस्यसमभ्याशेनिक्षिप्यांडानिसर्वशः समुद्रांभस्यमज्जंतचरंतोभीष्मपक्षिणः
तेषामंडानिसर्वेषांभक्षयामासपापकृत् ३४ सहंसः संप्रमत्तानामप्रमत्तः स्वकर्मणि ततः प्रक्षीयमाणेषुतेषुतेष्वंडजोपरः अशंकतमहा
प्राज्ञः सकदाचिद्ददर्शह ३५ ततः सकथयामासदृष्ट्वाहंसस्यकिल्विषं तेषांपरमदुःखार्त्तः सपक्षीसर्वपक्षिणां ३६ ततः प्रत्यक्षतोदृष्ट्वा
पक्षिणस्तेसमीपगाः निजघ्नुस्तंतदाहंसंमिथ्यावृत्तंकुरूद्वह ३७ हंसवत्त्वमपीदानीज्ञातिभ्यः प्राप्नुयावधं निहन्तुर्भीष्मसंक्रुद्धाः पक्षिणस्तं
यथांडजं ३८ गाथामप्यत्रगायंतियेपुराणविदोजनाः भीष्मयांतांचतेसम्यक्कथयिष्यामिभारत ३९ अंतरात्मनिविहितेरौषिपत्र
रथीनथं अंडभक्षणममुचितंकर्मवाचमतीयते ४० इतिसभापर्वणिशिशुपालवधे ॥

वल्मीकेवदुत्संनत्वार्थिकमित्यर्थेपूर्वोक्तकथार्थसंग्राहिकागाथाश्लोकमाहगाथामिति। अभिहतेकामादिभिः रौषिवदसिधर्म्मं एतत्तवचनमुचितंअंडजभक्षणकर्म्मवाचमती
येनेत्यक्तिविरुद्धमित्यर्थः ४० भारतभावदीपेसभापर्वणिशिशुपालोक्तिप्रकाशः ध्यायः ४१

एवं भीष्मप्रशंसामुखेन हरिं स्तुत्वा संप्रति जरासंधमुत्साति तं स्तौति समेद्दस्यादिना निर्ह्रासं हि समं ब्रह्मेति गीतोक्तेः समे ब्रह्मणि जरासंधोपि वद्धमनतः श्रेष्ठः यः स्वयं ब्रह्मगा
त्मा द्यस्त इति मताः तेन स्वामिना कृष्णेन युद्धं न इयेष ... नेच्छितवान् १ स्वेनैव सत्वादेशाद्यमर्थं सप्रतीचः तदर्थेन कृष्णेनाभेदं दर्शयति केशवेनेति कः ब्रह्मा २ टी २
केशवादिभिर्यत्कृतं तदेवाह अद्वारेणेत्यादिना कृष्णेन जरासंधानुग्रहार्थं गच्छता गजेन्द्रानुग्रहे इव च तु भुजंग रुद्राहृदं स्वरूपं न प्रकाशितं किंतु प्रसिद्धमपि कृष्णस्वरूपं ब्रह्मा । विवे

शिशुपाल उवाच समेव कुमतो राजा जरासंधो महाबलः योऽनेन युद्धं नेयेष दासोयमिति संयुगे १ केशवेन कृतं कर्म जरासंधवधे तदा
भीमसेनार्जुनाभ्यां च कस्तत्साध्विति मन्यते २ अद्वारेण प्रविष्टेन छद्मना ब्रह्मवादिना दृष्टः प्रभावः कृष्णेन जरासंधस्य भूपतेः ३
येन धर्मात्मनात्मानं ब्रह्मण्यमविजानता नैषितं पाद्यमस्मै तद्दातुमग्रे दुरात्मने ४ भुज्यतामिति तेनोक्ताः कृष्णभीमधनंजयाः ज
रासंधेन कौरव्य कृष्णेन विकृतं कृतं ५

पु २

रणाद्यादितं तन्न ब्रह्मा साधु मन्यते स्वमथा सर्वेषां न त्वत्पदृशां ब्रह्मलोको ह्यं येनेन ब्रह्मरणो पवमानो भगवतीति तु सहं तत्तस्य तथा च श्रुतिः तस्मादेषां तन्न प्रियं यदेतन्म
नुष्या वि[illegible]रिति एषां देवानां एतत् ब्रह्म अद्वारेण प्रवेशादिकं मानुषं नाद्यं मनुकुर्वतः शत्रुत्वाभिनयार्थयुक्तमेतत् लौकिकमर्यादाप्रदर्शनार्थं ३ स्तुतिपक्षे च त
थौषध्यर्थे दुरात्मनो लोकस्याग्रे स्वस्मै कृष्णायपाद्यं दातुं नेषितं तत्स्वरूपगूहनायेति भावः ४ विकृतं भोजनग्रहणाख्यानं वैराभिनयापेतमर्थः ५ ॥

भ२

एवं कूटस्थेन सह जीवेनैव कर्म संप्राप्यं तेन कूटस्थदर्शनेनैव प्राणानां स्वजनानां तस्माद्युक्तं प्रामाणिकमाहुर्यद्यपीति अयं जन एवं धात्रा जीव एव जगतः कर्ता भवेत् न तर्हि एनं मूर्खं प्रतिपद्यात
याकस्मात् मनसैवेदं मूर्खेव देनं कथं मन्यसे स्वर्थः अथेनामास्येयात् कूटस्थस्तु तो भोक्त्रा एकत्वेनावधारितः अतः कूटस्थ एव स पर जपांतं वदाम्यज्ञातमुक्तमितिज्ञेयं अयं च ब्राह्मणं
ब्राह्मणत्वेषेणागतं कूटस्थं मरणकालेपि कस्मात् आत्मानं प्रगतात्मभावेन तस्य कूटनावगच्छति किंतु अवगच्छत्येव अयंभावः जीव एव तत्र स्तर्हि जीवेन कृतं परेणावकृतमिति
जीवो न स्तोत्रः पर्यन्तु पोक्तव्याचा कोऽहमेवान्नात्कः मा एवान्नपदेष आकाश आनंदो न स्यादिति श्रुतेस्तस्यैव सर्वचेष्टा प्रवर्तकत्वात् तथा अंते मतिः सा गतिरिति स्मृतेः

यद्ययं जगतः कर्ता पर्येनं मूर्ख मन्यसे कस्मादेवं ब्राह्मणं सम्प्रगामात्मानमवगच्छति ६ इदं त्वाश्चर्यभूतं मे यदिमे पाण्डवास्त्वया अपकृष्टाः सुतां मा
गोन्ममते न बह्वसाधिति ७ अथवा नैतदाश्चर्यं येषां त्वमसि भारत ह्रीः स धर्मो विहृत्य स्वसर्वार्थानां प्रदर्शकः ८ वैशंपायन उवाच तस्य
तद्वचनं श्रुत्वा रूक्षं रूक्षाक्षरं बहु चुकोप बलिनां श्रेष्ठो भीमसेनः प्रतापवान् ९ तथा पद्मप्रतीकाशे सभायामनविस्तृते भूपः क्रोधोऽभिता
म्राक्षे रक्तेनैवेव भूवतुः १० त्रिशिखां भ्रुकुटीं चास्य ददृशुः सर्वपार्थिवाः ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव ११

नेकूटस्थं पश्यतः कस्मात् वसिष्ठ इति तस्य लोकश्चाकूटस्थगोऽहि तेपि न काचिद्धानिः अनेन कूटस्थदर्शनहेतोरनेकजन्मांतरानुष्ठितस्य पुण्यपुंजस्य तत्त्वात् गुणवानेवेति स
मंतव्य इति ६ एवं मूर्खानामपि हृद्वदाभासमानैर्वाक्यैः कूटस्थं तद्रूक्ताश्चक्रत्वात् संपत्स्यनुपदेश इत्याशयः केवलमात्मपक्षकूटस्थस्य त्रिधोमनु संपादनार्थं नानेवनिंदति
सप्तार्थैर्वाक्यैः इदं त्वित्यादिना तुशब्दः कृष्णेपरीमयोतनार्थः ७ ८ रूक्षं त्वर्थतः रूक्षाक्षरं शब्दतश्च ९ १० ११

महासेनंकार्तिकेयं १३ २८ अध्यायः स्यासशहंचकार १ २ मृत्युः स्थूलदेहवियोगः कालः यमः ५ मृत्युः हंता ८

दंतानुसंदशतस्तस्यकोपाद्दृशुराननं युगांतेसर्वभूतानिकालस्येवजिघत्सतः १२ उत्पतंतंतुवेगेनजग्राहैनंमनस्विनं भीष्मएवमहाबाहुः महा
सेनमिवेश्वरः १३ तस्यभीमस्यभीष्मेणवार्यमाणस्यभारत गुरुणाविविधैर्वाक्यैः क्रोधःप्रशममागतः १४ नातिचक्रामभीष्मस्यसहिवाक्यमरिंदम
समुद्धूतोघनापायेवेलामिवमहोदधिः १५ शिशुपालस्तुसंक्रुद्धेभीमसेनेजनाधिप नाकंपततदावीरःपौरुषेव्यवस्थितः १६ उत्पतंतंतुवेगे
नपुनःपुनररिंदम नसतंचिंतयामाससिंहःक्रुद्धोमृगंयथा १७ प्रहसंश्चाब्रवीद्वाक्यंचेदिराजःप्रतापवान् भीमसेनमभिक्रुद्धंदृष्ट्वाभीमपराक्रमं
मुंचैनंभीष्मपश्यंतुयावदेनंनराधिपाः मत्प्रभावविनिर्दग्धंपतंगमिववह्निना १९ ततश्चेदिपतेर्वाक्यंश्रुत्वातत्कुरुसत्तमः भीमसेनमुवाचेदं
भीष्मोमतिमतांवरः २० इतिसभापर्वणिशिशुपालवधे भीष्मउवाच चेदिराजकुलेजातस्त्र्यक्षएषचतुर्भुजः रासभारावसदृशंरुराववननाद्च
१ तेनास्यमातापितरौत्रेसतुस्तौसबांधवौ वैकृतंतस्यतौदृष्ट्वात्यागायकुरुतांमतिं २ ततःसभार्यंनृपतिंसामात्यंसपुरोहितं चिंतासंमूढहृ
दयंवागुवाचाशरीरिणी ३ एषतेनृपतेपुत्रःश्रीमान्जातोबलाधिकः तस्मादस्मान्नभेतव्यमव्यग्रःपाहिवैशिशुं ४ नचैवैतस्यमृत्युर्वैनका
लःप्रत्युपस्थितः मृत्युर्हंतास्यशस्त्रेणसचोत्प[illegible]नराधिप ५ संश्रुत्योदाहृतंवाक्यंभूतमंतर्हितंततः पुत्रस्नेहाभिसंतप्ताजननीवाक्यमब्रवी
त् ६ येनेदमीरितंवाक्यंममैतंतनयंप्रति प्रांजलिस्तंनमस्यामिब्रवीतुसपुनर्वचः ७ याथातथ्येनभगवान्देवोवायदिवेतरः श्रोतु
मिच्छामिपुत्रस्यकोस्यमृत्युर्भविष्यति ८

भी ३

तथोचैतिरासभारावसदृशं समुदाहृतंशब्दं ११ १२ निदर्शनं वाहुपातनादिकंज्ञापकं १४ १५ कुशलंबलकोशादिवृद्धिः अनामयंआरोग्यं १९ २३ अपराधशतमिति

अंतर्भूतंततोभूतमुवाचेदंपुनर्वचः यस्योत्संगेगृहीतस्यभुजावभ्यधिकावुभौ ९ पतिष्यतःक्षितितलेपंचशीर्षाविवोरगौ तृतीयमेतद्बालस्यललाट
स्थंतुलोचनं १० निमज्जिष्यतिपंदृष्ट्वासोस्यमृत्युर्भविष्यति त्र्यक्षंचतुर्भुजंश्रुत्वातथाचसमुदाहृतं ११ पृथिव्यांपार्थिवाः सर्वेअभ्यागच्छन्दिदृक्षवः ता
न्पूजयित्वासंप्राप्तान्यथार्हंसमहीपतिः १२ एकैकस्यनृपस्यांकेपुत्रमारोपयत्तदा एवंराजसहस्राणांपृथक्त्वेनयथाक्रमं १३ शिशुरंकेसमारूढो
नतत्प्रापनिदर्शनं एतदेवतुसंश्रुत्यद्वारवत्यांमहाबलौ १४ ततश्चेदिपुरींप्राप्तौसंकर्षणजनार्दनौ यादवौयादवींद्रष्टुंस्वसारंतौपितुस्तदा १५ अभि
य वाद्ययथान्यायंयथाज्येष्ठंनृपांश्चतां कुशलानामयंपृष्ट्वानिषण्णौरामकेशवौ १६ साभ्यर्चितौतदावीरौप्रीत्याचाभ्यधिकंततः पुत्रंदामोदरोत्संगेदेवीसंन्यदधा
त्स्वयं १७ न्यस्तमात्रस्यतस्यांकेभुजावभ्यधिकावुभौ पेततुस्तच्चनयनंन्यमज्जतललाटजं १८ तद्दृष्ट्वाव्यथितात्रस्तावरंकृष्णमयाचत ददस्वमेव
रंकृष्णभयार्त्तायामहाभुज १९ त्वंह्यार्तानांसमाश्वासोभीतानामभयप्रदः एवमुक्तस्ततःकृष्णःसोब्रवीद्यदुनंदनः २० माभैस्त्वंदेविध
र्मज्ञेनमत्तोस्तिभयंतव ददामिकंवरंकिंचकरवाणिपितृष्वसः २१ शक्यंवायदिवाशक्यंकरिष्यामिवचस्तव एवमुक्तातत:कृष्णमब्रवीद्यदुनं
दनं शिशुपालस्यापराधान्क्षमेथास्त्वंमहाबलः मत्कृतेयदुशार्दूलविद्धिनंमेवरंप्रभो २३ कृष्णउवाच अपराधशतंक्षाम्यंमयाह्यस्यपितृष्वसः
पुत्रस्यतेवधार्हस्यमात्वंशोकेमनःकृथाः २४ भीष्मउवाच एवमेषनृपःपापःशिशुपालःसुमंदधीः त्वांसमाहूयतेवीरगोविंदवरदर्पितः २५
सभापर्वणिराजसूयेशिशुपालचरिते

हिवसिद्धंवधार्हाणामनेषामपिमयाऽपराधशतंक्षाम्यमिहेपितृष्वसः नेपुत्रस्यतुसंबंधवशात्सर्वेषांक्षाम्यमेवेत्यर्थः यः आहूयतेयुद्धायेतिशेषः २ अध्यायः ॥

नैषा कृष्णस्यैवविनिश्चयइत्यनेनकृष्णप्रेरितोयंप्रलपतीत्युक्तं १ कालपरीतात्माकालेनग्रस्तदेहः २ हरेस्तेजोंशस्तस्यशिशुपालस्यएषहरिस्तंस्वांशंआदातुंसंहर्तुंऐच्छत्पुनः
शार्दूलोहिंस्रपक्षेशिवाद्यपेक्षया ३ ४ संमुमूर्षुःकृष्णंकोपयितुमित्येवंसंक्रुद्धोपिमनस्तन्नागत्कृष्टत्वंवचनमुवाच ५ पुनः तदेवाह द्विषतांनइतिसमानाधिकरणेषष्ठ्यौ
केशवस्यः प्रभावः सः द्विषतांनःद्विषतामस्माकमस्तु ६ एवंईश्वरप्रभावंसार्ध्यंजन्मूलहेतुंद्वेषमाहेतरस्तवेन संस्तवेचेत्यादिना हित्वेतिदधातेः नूनंजनार्दनंद्दिनिधाय

त्रु४

भीष्मउवाच नैषाचेदिपतेर्बुद्धिर्ययात्वाह्वयतेच्युतं नूनमेषजगद्भर्तुःकृष्णस्यैवविनिश्चयः १ कोहिमांभीमसेनाद्यक्षितावर्हतिपार्थिवः क्षेप्तुं
कालपरीतात्मायथैषकुलपांसनः २ एषह्यस्यमहाबाहुस्तेजोंशश्चहरेर्ध्रुवं तमेवपुनरादातुमिच्छत्युततथाविभुः ३ येनैषकुरुशार्दूल
शार्दूलइवचेदिराट् गर्जत्यतीवदुर्बुद्धिःसर्वानस्मानचिंतयन् ४ वैशंपायनउवाच ततोनममृषेचैद्यस्तद्भीष्मवचनंतदा उवाचचैनंसंक्रुद्धः
पुनर्भीष्ममथोत्तरं ५ शिशुपालउवाच द्विषतांनोस्तुभीष्मैषःप्रभावःकेशवस्ययः यस्यसंस्तववक्तात्वंबंदिवत्सततोत्थितः ६ संस्तवा
यमनोभीष्मपरेषांरमतेयदि तदासंस्तौषिराज्ञस्त्वमिमंहित्वाजनार्दनं ७ दरदंस्तुहिबाल्हीकमिमंपार्थिवसत्तमं जायमानेनयेनेयमभव
द्दारितामही ८ वंगांगविषयाध्यक्षंसहस्राक्षसमंबले स्तुहिकर्णमिमंभीष्ममहाचापविकर्षणं ९ यस्येमेकुंडलेदिव्येसहजेदेवनिर्मि
ते कवचंचमहाबाहोबालार्कसदृशप्रभं १०

नइपत्येनइन्तएनराज्ञःस्तुहीत्यर्थः निंदापक्षेत्वजुरेवार्थः ७ जायमानेनेतिपाठेदारिताभीमेनमातुरंकात्पततांशिलेवयेनमहीविदारिता यजमानेनेतिपाठेक्रत्वि
ग्भिर्दक्षिणाभयंप्रापिता ब्राह्मणानामाधिपत्येबलनिग्रहायोगादितिभावः ८ १०

१४ वेपतिसमः विगतः प्रतिसमोयस्यसतथा स्वार्थेतद्धितः अतुल इत्यर्थः १५ केशवं अतिक्रम्यजयद्रथंकिंप्रशंससीतिप्रोक्तं निंदापक्षेतुस्पष्टएवार्थः १६ १७
२१ शल्यादीनितिसशब्दपाठःत्वयैतेईतिश्रुतस्मात्स्तवः परमेश्वरः तस्मैतस्मात्स्तवे किंनुत्वोपि अपितुसर्वोपिपरमेश्वरत्वेनैवस्तुहीत्यर्थः २२ किंहीतिपितामात्रेतिचनसहा

वासवप्रतिमोयेनजरासंधोतिदुर्जयः विजितोबाहुयुद्धेनदेहभेदंचलंभितः ११ द्रोणंद्रौणिंचसाधुत्वंपितापुत्रौमहारथौ स्तुहिस्तुत्यावुभौभीष्मस
ततंद्विजसत्तमौ १२ ययोरस्मनरोभीष्मसंक्रुद्धःसचराचरं दृष्टांवसुमतिंकुर्यान्निःशेषामितिमेमतिः १३ द्रोणस्यहिसमंयुद्धेनपश्यामिनराधिपं
नाश्वत्थाम्नःसमंभीष्मनचैनौस्तोतुमिच्छसि १४ पृथिवींसागरांतांपांयोवैप्रतिसमोभवेत् दुर्योधनंत्वंराजेंद्रमतिक्रम्यमहाभुजं १५ जयद्रथंचरा
जानंकृतास्त्रंदृढविक्रमं द्रुमंकिंपुरुषाचार्यंलोकेप्रथितविक्रमं अतिक्रम्यमहावीर्यंकिंप्रशंससिकेशवं १६ वृद्धंचभरताचार्यंतथाशारद्वतंकृपं अ
तिक्रम्यमहावीर्यंकिंप्रशंससिकेशवं १७ धनुर्धराणांप्रवरंरुक्मिणंपुरुषोत्तमं अतिक्रम्यमहावीर्यंकिंप्रशंससिकेशवं १८ भीष्मकंचमहावीर्यं
दंतवक्त्रंचभूमिपं भगदत्तंयूपकेतुंजयत्सेनंचमागधं १९ विराटद्रुपदौचोभौशकुनिंचबृहद्बलं विंदानुविंदावावंत्यौपांड्यंश्वेतमथोत्तमं २० शं
खंचसुमहाभागंवृषसेनंचमानिनं एकलव्यंचविक्रांतंकालिंगंचमहारथं २१ शल्यादीनपिकस्मात्त्वंनस्तौषिवसुधाधिपान् स्तवायमदिनेबुद्धि
र्वर्ततेभीष्मसर्वदा २२ किंहिशक्यंमयाकर्तुंयद्वृद्धानांत्वयानृप पुराकथयतांनूनंनश्रुतंधर्मवादिनां २३

र्यपोगणभावेपितत्तोपा वृद्धतमेनत्वयासहकथयतांउपदिशतांवृद्धानांवचनंयतोमया नश्रुतंअतः किंकर्तुंशक्यंअस्त्वादर्किंचित्करोहमित्यर्थः २३

श्लोक४ स्प२ स्व२

एवंस्त्वगर्वपरिहृत्यपतज्ज्ञानंतदाह आत्मेति देहबुध्या आत्मपरयोःस्तवो वा ईश्वरबुध्यातयोर्द्वेषो वा नकर्तव्य इति तेनज्ञानं अस्माभिःश्रुतमितियोज्यं २४ अस्तव्यं वाचामगोचरत्वात् मोहात् मोहः अज्ञानं आश्रित्येति श्लोपे पंचमी मायिकैर्गुणैः सर्वैः र्यादिभिःनिर्विशेषचिन्मात्रस्य केशवस्य स्तवं कश्चित तदभिज्ञो नानुमन्यते २५ एतदेवाह कथमिति भो भीष्म अ[illegible]जस्य अविद्योपाधेर्जीवस्य पुरुषेषु शिशये अंतरात्मनि सच्चिदानंदरूपे वर्णैः देहेन्द्रियादिसंघातः तस्य पालपितरि कोद्वेषो वा स्यात्कः प्राणा तयद्वेषु आकाशअानंस्यादिति श्रुतेः अदुरात्मनि उपाधिधर्मकालुष्याद्दुःस्थित आत्मादुरात्माविराट् सूत्रेश्वराख्यः तद्भिन्नेजगत्कथं समावेशयसे नेहि मद्भुदन्यायेनात्रजगत्समावेशः अपरिणामित्वादस्य किंतर्हि रज्जुसर्पन्यायेन तथा चाज्ञानमेव जगदुपादानं अयं तु तदधिष्ठानमात्रं यथोक्तं अस्य द्वैतेंद्रजालस्य यदुपादानकारणं अज्ञानं तदुपाश्रि

स्व१

आत्मनिंदात्मपूजा च परनिंदा परस्तवः अनाचरितमार्याणां वृत्तमेतच्चतुर्विधं २४ परस्त्वमिमं शंतमोहात्संसौषिभक्तितः केशवं तच्चते भीष्म न कश्चिदनुमन्यते २५ कथं भोजस्य एरुषे वर्गपाले दुरात्मनि समावेशयसे सर्वं जगत्केवलकाम्यया २६ अथवैषा नते बुद्धि प्रकृतिं याति भारत मयैव कथितं पूर्वं भूलिंगाशकुनिर्यथा २७ भूलिंगाशकुनिर्नाम पार्श्वे हिमवतः परे भीष्म तस्याः सदा वाचः श्रूयंतेर्थविगर्हिताः २८ मा साहसमितीदं सा सततं वाशते किल साहसं चात्मनातीव चरन्ती नावबुध्यते २९ सा हि मांसार्गलं भीष्म मुखात्सिंहस्यादतः दन्तांतरविलग्नं यत्तदादत्ते ल्पचेतना ३०

स्व ब्रह्मकारणमुच्यते इति केवलस्य निर्गुणस्य काम्यया इच्छाया सगुणोपासकानां निर्गुणप्राप्तिः सद्योनसंभवतीत्यर्थः पद्भे भोजस्य कंसस्य वर्गपाले गोसंघपाले २६ अथ चेति तेत्वत्संबंधिनी एषांपुंसां बुद्धिः प्रकृतिं न याति स्वकारणे न लीयते तर्हि भूलिंगाशकुनिर्यथा न्यद्वदत्यन्यत्करोति तद्वत्ते श्रुद्धं कामय[illegible]त्वं २७ अन्ते शबलं वदन्तीत्यर्थः भुवं लिंगतीति भूलिंगो बिलशायी पक्षिविशेषः एषेति पाठे एषा अस्मदीया बुद्धिः तेत्वदीया तद्वत्तेति योज्यं तदाख्यस्येव शकुन्युपमत्वं २७ अर्थविगर्हिताः उक्तिविपरीतक्रियया अर्थो विगर्हितो यासां ताः २८ वाशते शब्दं करोति २९ मांसार्गलं दंष्ट्रांतरलग्नस्य मांसस्य बहिर्निर्गतभागं उक्तोलं ३०

वहु ३ ७१ त्वं २

इच्छतइति माहिपदिति णीमत्पमुमुखेप्रविष्टपितदुपेक्ष्यामजीवंतीपथालोकानुपदिशति मासाहमिति तथात्वमपिदेहधारिलान्मम्मुखेपततितोपिम त्सुनाउपेक्षितोजीवसित्र
ममान्धोपदिशसिमत्पमुखेनपतितमपितित्तत्रहेतुः अधर्मिष्ठेति सर्वधर्मश्रुत्यंब्रह्म अधर्मि तन्निष्ठ ब्रह्मनिष्ठोहिमत्पमुखेनपततीतिवेदशास्त्रप्रसिद्धं ३१ अत्रैवहेतरमा
स० हइच्छतामिति पूजायांवचनं शांतनोःस्वपितुरिच्छयावरदानेनापिजीवसीत्पर्थः लोकविद्विष्टतिविषकर्मेतिचछेदः लोक आत्मानमेवलोकमुपासीतेतिश्रुति छिंदे स्वयुक्तंहि

७१ इच्छतःसाहिसिंहस्यभीष्मजीवत्यसंशयं तद्वत्वमप्यधर्मिष्ठसदावाचःप्रभाषसे ३१ इच्छतांभूमिपालानांभीष्मजीवस्यसंशयं लोकविद्विष्टक निष्ठुतेः१
र्माहिनान्योस्तिभवतासमः ३२ वैशंपायनउवाच ततश्चेदिपतेःश्रुत्वाभीष्मःसकटुकंवचः उवाचेदंवचोराजंश्चेदिराजस्यशृण्वतः ३३ इच्छतांकि
लनामाहंजीवाम्येषांमहीक्षितां सोहंनागणयाम्येतांस्तृणेनापिनराधिपान् ३४ एवमुक्तेतुभीष्मेणततःसंचुक्रुधुर्नृपाः केचिज्जहृषिरेतत्र के
चिद्भीष्मंजगर्हिरे ३५ केचिदूचुर्महेष्वासाःश्रुत्वाभीष्मस्यतद्वचः पापोवलिप्तोवृद्धश्चनायंभीष्मोर्हतिक्षमां ३६ हन्यतांदुर्मतिर्भीष्मःपशुवत्साध्व
यंनृपाः सर्वैःसमेत्यसंरब्धोदह्यतांवाकटाग्निना ३७ इतितेषांवचःश्रुत्वाततःकुरुपितामहः उवाचमतिमान्भीष्मस्तानेववसुधाधिपान् ३८ उक्त
स्योक्तस्यनेहान्तमहंसमुपलक्षये यत्तुवक्ष्यामितत्सर्वंशृणुध्वंवसुधाधिपाः ३९ पशुवद्धातनंवामेदहनंवाकटाग्निना क्रियतांमूर्ध्निवोन्यस्तं
मयेदंसकलंपदं ४० एषतिष्ठतिगोविंदः [illegible] पूजितोस्माभिरच्युतः यस्यवस्त्वरतेबुद्धिर्मरणायसमाधवं ४१ कृष्णमाह्वयतामद्ययुद्धेचक्र
गदाधरं यावदस्यैवदेवस्यदेहंविशतुपातितः ४२ इतिसभापर्वणिशिशुपालवधे ॥ ७ ॥ ७ ॥ ७ ॥ ॥

न२

स्तं ज्ञात्वेकर्मय स्येत्येवत्येवंविधोपिक्षत्रियोपिन्नस्यंतं ब्रह्मविदसीत्यर्थः पक्षांतरेतुस्पष्टार्थएवग्रंथः ३२ ३३ एवंगर्हमाणि तं संघिनाशिशुपालेनस्कतोपिभीष्मःतस्यामि
लाषितंकेवलंपदंतदुक्तीनांतूष्णींनिंदापरत्वमाश्रित्यवैरमुद्घोतयन्नुवाच इच्छतांकिलेत्यादिना ३४ ३६ कटाग्निनाकक्षाग्निना ३७ कृष्णमितिदेहंविशत्वित्यनेन न राम०
स्तस्यशिशुपालीयंवैकुंठगत्यतनादिकंपूर्वहृत्ते विदितमस्तीतिदर्शितं अध्यायः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७१

उरुविक्रमः उरुर्महान्विश्वव्यापीविक्रमःपादविक्षेपोयस्यसशिशुपालोहरिणासहाभेदात १ तावत्रणांगच्छयावत्त्वांनिहन्मिनिश्चयेनप्राप्नोमिहंतेर्गत्यर्थत्वेनप्राप्य
र्थत्वात सघःकैवल्येप्सुंमांजरासंधमिवजितमात्रंमप्युंचेत्यर्थः सहितंसर्वपांडवैरितिपाण्डवानामपिविस्त्रंशात्वंदर्शयति २ अवध्याः अवधोमर्यादायासाधवःमर्यादा
परिपालकाः अमताः एषसेतुर्विधृतिरेषांलोकानामसंभेदायेतिपरमात्मनस्तावन्मर्यादाविधारकत्वंस्पष्टंतद्देशत्वात्पांडुवानामपीत्यर्थः अत्रहेतुमाह नृपतीनि
ति अराजा नास्तिरंजकोऽस्मादन्यइति अराजासतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतिएषह्येवानंदयातीत्यादिनापरमात्मनएववस्तुत्वंरंजकत्वंत्तेतः ३

वैशंपायनउवाच ततःश्रुत्वैवभीष्मस्यचेदिराडुरुविक्रमः युयुत्सुर्वासुदेवेनवासुदेवमुवाचह १ आह्वयेत्वांरणांगच्छमयासार्द्धंजना
र्दन यावदद्यनिहन्मित्वांसहितैःपांडवैःसह २ सहत्वयाहिमेवध्याःसर्वथाकृष्णपाण्डवाः नृपतीन्समतिक्रम्ययैरराजात्वमर्चितः ३ ये
त्वांदासमराजानंबाल्यादर्चंतिदुर्मतिं अनर्हमर्हवत्कृष्णवध्यास्तइतिमेमतिः ४ इत्युक्त्वाराजशार्दूलस्तस्थौगर्जन्नमर्षणः एवमुक्तेत
तःकृष्णोमृदुपूर्वमिदंवचः उवाचपार्थिवान्सर्वान्ससमक्षंचवीर्यवान ५ एषनःशत्रुरत्यंतंपार्थिवाःसात्वतीसुतः सात्वतानांनृशंसात्मा
नहितोनपकारिणां ६ प्राग्ज्योतिषपुरंयातानस्मान्ज्ञात्वानृशंसकृत अदहद्द्वारकामेषस्वस्रीयःसन्नराधिपाः ७ क्रीडतोभोजराजन्य
एषरैवतकेगिरौ हत्वाबद्ध्वाचतान्सर्वानुपायात्स्वपुरंपुरा ८ अश्वमेधेहयंमेध्यमुत्सृष्टंरक्षिभिर्वृतं पितुर्मेयज्ञविघ्नार्थमहरत्पापनिश्चयः
९

त्वांदासं त्वाअंदासमितिछेदः त्वात्वांअंदोवंधः अदिवंधनेधातुः तंअस्यतिक्षिपतीतिअंदासंवंधनाशकं बाल्यादारभ्येतिशेषः दुर्मतिं अनर्हं दुःस्थितां
मन्त्रिप्रवेषंअनर्हमित्यर्थः अर्हवत्सत्पवततेपिंवध्याः अत्रोपसर्गस्यभाखुरिमतेन अकारलोपः पूर्ववदर्थः ४ ५ एवंगूढाशयेनस्कृतोपिभगवानहृष्यर्थाभि
प्रायेणालोकदृष्ट्यातंहंतुवैरमाविष्करोति एषनःशत्रुरित्यादिना नहितःस्वपुत्रपेतिसमासः नैकधेत्यादिवत्तद्वेषीत्यर्थः ६ ९ ॥ ७ ॥ ७॥ ७ ॥

सुवीरात् देशविशेषात् इतोहस्तिनापुरात् गतां प्रस्थितां सुवीरात्प्रतिपन्नौचेतिपाठे प्रतिपन्नौ विवाहकाले बभ्रोर्यादवस्य १० दोषांतरमाह एषइति करूषार्थिकरू
षोदेशभेदः तद्राजार्थं मायाप्रतिछन्नः कपटेन तद्वेषं कृत्वेत्यर्थः वैशाली विशालापुरी तदधिपस्य कन्यां तानि पूर्वोक्तानि निबोधत १३ १७ मत्पूर्वां पित्रादिभिः पूर्वं प्रद

स० ७२

सौवीरान्प्रतियातांचबभ्रोरेषतपस्विनः भार्यामभ्यहरन्मोहादकामांतामितोगतां १० एषमायाप्रतिछन्नःकरूषार्थेतपस्विनीं जहारभ
द्रांवैकन्यांमातुलस्यनृशंसकृत ११ पितृष्वसुःकृते दुःखंसुमहन्मर्षयाम्यहं दिष्ट्याहीदंसर्वराज्ञांसन्निधावद्यवर्त्तते १२ पश्यंतिहिभ
वंतोद्यमय्यतीवव्यतिक्रमं कृतानितुपरोक्षंमेयानितानिनिबोधत १३ इमंत्वस्यनशक्ष्यामिक्षंतुमद्यव्यतिक्रमं अवलेपाद्वधार्ह
स्यसमग्रेराजमंडले १४ रुक्मिण्यामस्यमूढस्यप्रार्थनासीन्मुमूर्षतः नचतांप्राप्तवान्मूढःशूद्रोवेदश्रुतीमिव १५ वैशंपायनउवाच
एवमादिततःसर्वेसहितास्तेनराधिपाः वासुदेववचःश्रुत्वाचेदिराजंव्यगर्हयन् १६ तस्यतद्वचनंश्रुत्वाशिशुपालःप्रतापवान्
जहासस्वनवद्धासंवाक्यंचेदमुवाचह १७ मत्पूर्वांरुक्मिणींकृष्णसंसत्सुपरिकीर्तयन् विशेषतःपार्थिवेषुव्रीडांनकुरुषेकथं
१८ मन्यमानोहिकःसत्सुपुरुषःपरिकीर्तयेत् अन्यपूर्वांस्त्रियंजातुत्वदन्यो मधुसूदन १९ क्षमेवायदितेश्रद्धामावाकृ
ष्णममक्षम क्रुद्धाद्वापिप्रसन्नाद्वाकिंमेत्वत्तोभविष्यति २०

सभा० ७२

प्रतिश्रुतां १८ मन्यमानः स्वीकुर्वाणः १९ क्षमक्षमस्व श्रद्धा पितृष्वसुर्वचसिश्रवणानुषेयत्वबुद्धिः २० ॥ छ ॥ छ ॥ छ ॥

२३ याचतः इति पाठे याचनं याच्ञः तस्मात् प्रथमार्थे तसिः २४ याचितं मया दत्तं प्रतिज्ञातं तानि शतं अपराधानि वधयिष्यामि वधं प्रापयिष्यामि। एवं तातवध
शब्दात्तलट् २५ तेजो लिंगशरीरं अग्र्यं संसारानादितया ऽनादि २६ २७ तच्च भगवता स्वमहिमानं प्रकाशयता सर्वपापं दग्ध्वा विषयीकृतं तेन अद्भुतत्वं एतत् दृशो

तथाब्रुवत एवास्य भगवान्मधुसूदनः मनसाचिंतयच्चक्रं दैत्यवर्गनिषूदनं २१ एतस्मिन्नेव काले तु चक्रे हस्तगते सति उवाच भगवानुच्चै
र्वाक्यं वाक्यविशारदः २२ शृण्वंतु मे महीपाला येनैतत्क्षमितं मया अपराधशतं क्षाम्यं मातुरस्यैव याचने २३ दत्तं मया याचितं च त
द्वै पूर्णं हि पार्थिवाः अधुना मारयिष्यामि पश्यतां वो महीक्षितां २४ एवमुक्त्वा यदुश्रेष्ठश्चेदिराजस्य तत्क्षणात् व्यपाहरत शिरः
क्रुद्धश्चक्रेणामित्रकर्षणः २५ स पपात महाबाहुर्वज्राहत इवाचलः ततश्चेदिपतेर्देहात्तेजोग्र्यं ददृशुर्नृपाः २६ उत्पतंतं महाराज
गगनादिव भास्करं ततः कमलपत्राक्षं कृष्णं लोकनमस्कृतं ववंदे तत्तदा तेजो विवेश च नराधिप २७ तदद्भुतममन्यंत दृष्ट्वा सर्वे महीक्षि
तः यद्विवेश महाबाहुं तत्तेजः पुरुषोत्तमं २८ अनभ्रे प्रववर्ष द्यौः पपात ज्वलिताशनिः कृष्णेन निहते चैद्ये चचाल च वसुंधरा २९ ततः
केचिन्महीपाला नाब्रुवंस्तत्र किंचन अतीतवाक्पथे काले प्रेक्षमाणा जनार्दनं ३० हस्तैर्हस्ताग्रमपरे प्रत्यपिंषन्नमर्षिताः अपरे
दशनैरोष्ठानदशन्क्रोधमूर्छिताः ३१ रहश्च केचिद्वार्ष्णेयं प्रशशंसुर्नराधिपाः केचिदेव तु संरब्धा मध्यस्थास्त्वपरेऽभवन् ३२ प्र
हृष्टाः केशवं जग्मुः संस्तुवंतो महर्षयः ब्राह्मणाश्च महात्मानः पार्थिवाश्च महाबलाः शशंसुर्निर्वृताः सर्वे दृष्ट्वा कृष्णस्य विक्रमं ३३
पांडवस्त्वब्रवीद्भ्रातॄन्सत्कारेण महीपतिं दमघोषात्मजं वीरं संस्कारयत माचिरं तथा च कृतवंतस्ते भ्रातुर्वै शासनं तदा ३४

तं यद्विवेश महाबाहुं तत्तेजः पुरुषोत्तममित्यंतस्य शिशुपालवधस्य तात्पर्यं द्वेषादिनाप्यंते भगवत्स्मरणं तत्प्राप्तिहेतुरिति यथोक्तं श्रीमद्भागवते गोप्यः
कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः। संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं प्रभो इति शेषः २८ ३४ ॥ ५ ॥ ५ ॥ ५ ॥ ॥

कृसंज्ञानाद्भृति

चेदिनामधिपत्ये च पुत्रमस्य महीपतेः अभ्यषिंचत्तदा पार्थः सहैतैर्वसुधाधिपैः ३५ ततः स कुरुराजस्य क्रतुः सर्वसमृद्धिमान् पूनां प्रीतिकरो
स० ७३ राजन्संबभौ विपुलौजसः ३६ शांतविघ्नः सुखारंभः प्रभूतधनधान्यवान् अन्नवान्बहुभक्षश्च केशवेन सुरक्षितः ३७ समापयामास
च तं राजसूयं महाक्रतुं तं तु यज्ञं महाबाहुरासमाप्तेर्जनार्दनः ररक्ष भगवाञ्छौरिः शार्ङ्गचक्रगदाधरः ३८ ततस्त्ववभृथस्नातं धर्मात्मा
नं युधिष्ठिरं समस्तं पार्थिवं क्षत्रमुपागम्येदमब्रवीत् ३९ दिष्ट्या वर्द्धसि धर्मज्ञ साम्राज्यं प्राप्तवानसि आजमीढाजमीढानां यशः संवर्द्धितं
त्वया ४० कर्मणैतेन राजेंद्र धर्मश्च सुमहान्कृतः आपृच्छामो नरव्याघ्र सर्वकामैः सुपूजिताः ४१ स्वराष्ट्राणि गमिष्यामस्तदनुज्ञातु
मर्हसि श्रुत्वा तु वचनं राज्ञां धर्मराजो युधिष्ठिरः ४२ यथार्हं पूज्य नृपतीन्भ्रातॄन्सर्वानुवाच ह राजानः सर्व एवैते प्रीत्यास्मान्समुपाग
ताः ४३ प्रस्थिताः स्वानि राष्ट्राणि मामापृच्छ्य परंतपाः तेनुव्रजत भद्रं वो विषयांतं नृपोत्तमान् ४४ भ्रातुर्वचनमाज्ञाय पांडवा धर्मचा
रिणः यथार्हं नृपतीन्सर्वानेकैकं समनुव्रजन् ४५ विराटमन्वयात्तूर्णं धृष्टद्युम्नः प्रतापवान् धनंजयो यज्ञसेनं महात्मानं महारथं
४६ भीष्मं च धृतराष्ट्रं च भीमसेनो महावलः ४७ द्रोणं तु ससुतं वीरं सहदेवो युधांपतिः नकुलः सुवलं राजन्सहपुत्रं समन्वयात्
४८ द्रौपदेयाः ससौभद्राः पार्वतीयान्महारथान् अन्वगच्छंस्तथैवान्यान्क्षत्रियान्क्षत्रियर्षभ ४९ एवं सुपूजिताः सर्वे जग्मुर्विप्राः
सहस्रशः गतेषु पार्थिवेंद्रेषु सर्वेषु ब्राह्मणेषु च युधिष्ठिरमुवाचेदं वासुदेवः प्रतापवान् ५० आपृच्छे त्वां गमिष्यामि राम० ७३
द्वारकां कुरुनंदन राजसूयं क्रतुश्रेष्ठं दिष्ट्या त्वं प्राप्तवानसि ५१ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥

५६ सभाजयत प्रीणितवान ५७ ६१ संगृह्य निरुध्य ६२ ६३ त्वा त्वां संविदं समयं ६४ अनुगमनादिशिष्टाचारप्रदर्शको ध्यायशेषः स्पष्टार्थः ६५ ६६

तमुवाचैवमुक्तस्तु धर्मराजो जनार्दनं तवप्रसादाद्गोविंदप्राप्तः क्रतुवरो मया ५२ क्षत्रं समग्रमपि च त्वत्प्रसादाद्वशे स्थितं उपादाय
वलिं मुख्यं मामेव समुपस्थितं ५३ कथं त्वद्गमनार्थं मे वाणी वितरते नघ नह्यहं त्वामृते वीर रतिं प्राप्नोमि कर्हिचित ५४ अवश्यं चैव गं
तव्या भवता द्वारकापुरी एवमुक्तः स धर्मात्मा युधिष्ठिरसहायवान ५४ अभिगम्याब्रवीत्प्रीतः पृथां पृथुयशा हरिः साम्राज्यं समनु
प्राप्ताः पुत्रास्तेद्यपितृष्वसः ५५ सिद्धार्था वसुमंतश्च सा त्वं प्रीतिमवाप्नुहि अनुज्ञातस्त्वया चाहं द्वारकां गंतुमुत्सहे ५६ सुभद्रां द्रौप
दीं चैव सभाजयत केशवः निःक्रम्यांतःपुरात्तस्माद्युधिष्ठिरसहायवान ५७ स्नातश्च कृतजप्यश्च ब्राह्मणान्स्वस्ति वाच्य च ततो मेघ
वपुःप्रख्यं स्यंदनं च सुकल्पितं योजयित्वा महाबाहो दारुकः समुपस्थितः ५८ उपस्थितं रथं दृष्ट्वा तार्क्ष्यप्रवरकेतनं प्रदक्षिणमुपावृ
त्य समारुह्य महामनाः ५९ प्रययौ पुंडरीकाक्षस्ततो द्वारवतीं पुरीं ६० तं पद्भ्यामनुवव्राज धर्मराजो युधिष्ठिरः भ्रातृभिः सहितः श्रीमान
वासुदेवं महाबलं ६१ ततो मुहूर्तं संगृह्य स्यंदनप्रवरं हरिः अब्रवीत्पुंडरीकाक्षः कुंतीपुत्रं युधिष्ठिरं ६२ अप्रमत्तः स्थितो नित्यं प्रजाः
पाहि विशां पते पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः ६३ बांधवा[illegible]पजीवंतु सहस्राक्षमिवामराः कृत्वा परस्परेणैवं संविदं कृष्ण
पांडवौ ६४ अन्योन्यं समनुज्ञाप्य जग्मतुः स्वान्गृहान्प्रति गते द्वारवतीं कृष्णे सात्वतप्रवरे नृप ६५ एको दुर्योधनो राजा शकुनि
श्चापि सौबलः तस्यां सभायां दिव्यायामूषतुस्तौ नरर्षभौ ६६ इति सभापर्वणि शिशुपालवधः समाप्तः ॥ ७ ॥ ७ ॥

श्लो ३ शु १

इति भारतभावदीपे नैलकंठीये शिशुपालवधः समाप्तः ॥ ७ ॥ ७ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

माल्लेनए चिपेत्मन्तस्मा १

समाप्ते राजसूये तु क्रतुश्रेष्ठे सुदुर्लभे इत्यादेः सभायां रमणीयायां तस्यां ध्यायस्यता त्यर्थे कुलक्षयनिमित्तभूतस्य कापुरुषस्य मरणमेव श्रेय इति सर्वैः मरुषी

म २

स० ७४ वैशंपायन उवाच समाप्ते राजसूये तु क्रतुश्रेष्ठे सुदुर्लभे शिष्यैः परिवृतो व्यासः पुरस्तात्समपद्यत १ सोभ्ययादासनात्तूर्णं भ्रात
भिः परिवारितः पाद्येनासनदानेन पितामहमपूजयत २ अथोपविश्य भगवान्कांचने परमासने आस्यतामिति चोवाच धर्म
राजं युधिष्ठिरं ३ अथोपविष्टं राजानं भ्रातृभिः परिवारितं उवाच भगवान्व्यासः तत्तद्वाक्यविशारदः ४ दिष्ट्या वर्द्धसि कौंते
य साम्राज्यं प्राप्य दुर्लभं वर्द्धिताः कुरवः सर्वे त्वया कुरुकुलोद्वह ५ आपृच्छे त्वां गमिष्यामि पूजितोस्मि विशांपते एवमुक्तः स कृष्णे
न धर्मराजो युधिष्ठिरः ६ अभिवाद्योपसंगृह्य पितामहमथाब्रवीत युधिष्ठिर उवाच संशयो द्विपदां श्रेष्ठ ममोत्पन्नः सुदुर्ल
भः ७ तस्य नान्योस्ति वक्ता वै त्वामृते द्विजपुंगव उत्पातांस्त्रिविधान्प्राह नारदो भगवानृषिः ८ दिव्यांश्चैवांतरिक्षांश्च पार्थिवां
श्च पितामह अपि चैद्यस्य पतनाच्छन्नमौत्पातिकं महत ९ वैशंपायन उवाच राज्ञस्तु वचनं श्रुत्वा पराशरसुतः प्रभुः कृ
ष्णद्वैपायनो व्यास इदं वचनमब्रवीत १० त्रयोदश समा राजन्नुत्पातानां फलं महत सर्वक्षत्रविनाशाय भविष्यति विशांपते ११
त्वामेकं [illegible] कारणं कृत्वा कालेन भरतर्षभ समेतं पार्थिवं क्षत्रं क्षयं यास्यति भारत दुर्योधनापराधेन भीमार्जुनबलेन च
१२

त्याजीजिवितव्यमिति १ ८ दिव्याः अशनिपातादयः आंतरिक्षाः धूमकेत्वादयः पार्थिवाः भूकंपादयः ९ १० ११ १२ १२ ॥छ॥ राम० ७४

तुपं १

कपालिंकपालिनंस्वलु गिति न्त्रार्थेद्धितीया लोपेसति परमेव्योमन्निस्याँ दिकमात्रे शिष्यते विसर्केः स्थानिवत्वान्नलोपाभावः तस्यचापदांतस्यत्वादनुस्वारोपि

स्वप्नेद्रक्ष्यसिराजेंद्रक्षपांतेत्वंवृषध्वजं नीलकंठंभवंस्थाणुंकपालिंत्रिपुरांतकं १३ उग्रंरुद्रंपशुपतिंमहादेवमुमापतिं हरंशर्वंवृषंशूलिंपिना
किंकृत्तिवाससं १४ कैलासकूटप्रतिमंवृषभेवस्थितंशिवं निरीक्ष्यमाणंसततंपितृराजाश्रितांदिशं १५ एवमीदृशकंस्वप्नंदृष्ट्वामात्वंविशां
पते मातत्कृतेशुतेघ्ननुध्याहिकालोहिदुरतिक्रमः १६ स्वस्तितेस्तुगमिष्यामिकैलासंपर्वतंप्रति अप्रमत्तःस्थितोदांतःपृथिवींपरिपाल
य १७ वैशंपायनउवाच एवमुक्त्वासभगवानकैलासंपर्वतंययौ कृष्णद्वैपायनोव्यासःसहशिष्यैःश्रुतानुगैः १८ गतेपितामहेराजा
चिंताशोकसमन्वितः निःश्वसन्नुष्णमसकृत्तमेवार्थंविचिंतयन १९ कथंतुदैवंशक्येतपौरुषेणप्रबाधितुं अवश्यमेवभविताद्युक्तंपर
मर्षिणा २० ततोब्रवीन्महातेजासर्वान्भ्रातॄनयुधिष्ठिरः श्रुतंवैपुरुषव्याघ्रायन्मांद्वैपायनोब्रवीत २१ तदातद्वचनंश्रुत्वामरणे
निश्चितामतिः सर्वक्षत्रस्यनिधनेयद्यहंहेतुरीप्सितः २२ कालेननिर्मितस्तातकोममार्थोस्तिजीवता एवंब्रुवंतंराजानंफाल्गुनःप्रत्य
भाषत २३ माराजन्कश्मलंघोरंप्राविशोबुद्धिनाशनं संप्रधार्यमहाराजयत्क्षमंतत्समाचर २४ ततोब्रवीत्सत्यधृतिर्भ्रातॄन्स
र्वान्युधिष्ठिरः द्वैपायनस्यवचनंतत्रैवसमचिंतयन २५ अद्यप्रभृतिभद्रंवःप्रतिज्ञांमेनिबोधत त्रयोदशसमास्तातकोममार्थो
स्तिजीवता २६ नप्रवक्ष्यामिपरुषंभ्रातॄनन्यांश्चपार्थिवान स्थितोनिदेशेज्ञातीनांयोक्ष्येतत्समुदाहरन २७ एवंमेवर्तमानस्यस्व
सुतेष्वितरेषुच भेदोनभवितालोकेभेदमूलोहिविग्रहः २८ विग्रहंदूरतोरक्षन्प्रियाण्येवसमाचरे वाच्यतांनगमिष्यामिलोकेषु
मनुजर्षभाः २९ भ्रातुर्ज्येष्ठस्यवचनंपांडवाःसंनिशम्यतत तमेवसमवर्तंतधर्मराजहितेरताः ३० संसत्सुसमयंकृत्वाधर्म
राड्भ्रातृभिःसह पितॄंस्तर्पययथान्यायंदेवताश्चविशांपते ३१ ५५

भवतीतिमत्वर्थीयंप्रत्ययांतरंवाकस्यं एवमेत्रा विज्ञेयं १३ १४ १५ १६ १७ १८ ३० ३१

५१ ५१

३३ अध्यायः वसन्दुर्योधनस्तस्यामित्याद्यध्यायद्वयस्य तात्पर्यं पापिष्ठः परकल्याणं दृष्ट्वा मरणमिच्छति छलेन परलक्ष्मीं वाहर्तुमिच्छतीति निर्धारणाइति १ अभिप्र

स० ७५

कृतमांगलकल्याणो भ्रातृभिः परिवारितः गतेषु क्षत्रियेन्द्रेषु सर्वेषु भरतर्षभ ३२ युधिष्ठिरः सहामात्यः प्रविवेश पुरोत्तमं दुर्योधनो महा
राज शकुनिश्चापि सौबलः सभायां रमणीयायां तत्रैवासते नराधिप ३३ इति सभापर्वणि वैशंपायन उवाच वसन्दुर्योधनस्तस्यां सभायां पुरुष
र्षभ शनैर्ददर्श तां सर्वां सभां शकुनिना सह १ तस्यां दिव्यानभिप्रायान्ददर्श कुरुनन्दनः न दृष्टपूर्वा ये तेन नगरे नागसाह्वये २ स कदाचित्सभा
मध्ये धार्तराष्ट्रो महीपतिः स्फाटिकं स्थलमासाद्य जलमित्यभिशंकया ३ स्ववस्त्रोत्कर्षणं राजा कृतवान्बुद्धिमोहितः दुर्मना विमुखश्चै
व परिचक्राम तां सभां ततः स्थले निपतितो दुर्मना व्रीडितो नृपः ४ निश्वसन्विमुखश्चापि परिचक्राम तां सभां ततः स्फाटिकतोयां वै स्फा
टिकाम्बुजशोभितां ५ वापीं मत्वा स्थलमिव सवासाः प्रापतज्जले जले निपतितं दृष्ट्वा भीमसेनो महाबलः जहास जहसुश्चैव किंकराश्च सु
योधनं ७ वासांसि च शुभान्यस्मै प्रददू राजशासनात् तथागतं तु तं दृष्ट्वा भीमसेनो महाबलः ८ अर्जुनश्च यमौ चोभौ सर्वे ते प्राहसंस्त
दा नामर्षयत्ततस्तेषामवहासममर्षणः ९ आकारं रक्षमाणस्तु न स तान्समुदैक्षत पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलं १० आ
रुरोह ततः सर्वे जहसुश्च पुनर्जनाः द्वारं तु विहिताकारं स्फाटिकं प्रेक्ष्य भूमिपः प्रविशन्नाहतो मूर्ध्नि व्याघूर्णित इव स्थितः ११ तादृ
शं चापरं द्वारं स्फाटिकोरुकपाटकं विघट्टयन्कराभ्यां तु निःक्रम्याग्रे पपात ह १२ द्वारं तु वितताकारं समापेदे पुनश्च सः तद्वृत्तं चेति मत्वा
म॰ नो द्वारस्थानादुपारमत १३

न देवादीनां क्रीडनस्थानाद्यभिनयप्रदर्शकचित्राद्रिताना आशयविशेषान् नागसाह्वयेनागेन हस्तिना समानं नाम्निहस्तिनापुरे २ धृतमूलमुपोह्यातप एम०
तिसकदाचिदिति ३ १२ तद्वृत्तं तादृशं १३ ७५

विप्रलंभान्स्वंचनानि १४ १९ अनेकाग्रः विक्षिप्तचित्तः १९ २० कुतोमूलं कुत एतस्य दुःखस्य मूलमुत्पत्तिरित्यर्थः कुतोहेतोः मूलं स्वस्थानं प्रतिनिःश्वसनाच्छ्वसितीति वा २१

एवंप्रलंभान्विविधान्प्राप्य तत्र विशांपते पांडवैरभ्यनुज्ञातस्ततो दुर्योधनो नृपः १४ अप्रहृष्टेन मनसा राजसूये महाक्रतौ प्रेक्ष्य तामद्भु
तामृद्धिं जगाम गजसाह्वयं १५ पांडवश्रीप्रतप्तस्य ध्यायमानस्य गच्छतः दुर्योधनस्य नृपतेः पापा मतिरजायत १६ पार्थान्सुमन
सो दृष्ट्वा पार्थिवांश्च वशानुगान् कृत्स्नं चापि हितं लोकमाकुमारं कुरूद्वह १७ महिमानं परं चापि पांडवानां महात्मनां दुर्योधनो धा
र्तराष्ट्रो विवर्णः समपद्यत १८ स तु गच्छन्ननेकाग्रः सभामेकोन्वचिंतयत् श्रियं च तामनुपमां धर्मराजस्य धीमतः १९ प्रमत्तो धृ
तराष्ट्रस्य पुत्रो दुर्योधनस्तदा नाभ्यभाषत्सुबलजं भाषमाणं पुनः पुनः २० अनेकाग्रं तु तं दृष्ट्वा शकुनिः प्रत्यभाषत दुर्योधन कु
तोमूलं निःश्वसन्निव गच्छसि २१ दुर्योधन उवाच दृष्ट्वेमां पृथिवीं कृत्स्नां युधिष्ठिरवशानुगां जितामस्त्रप्रतापेन श्वेताश्वस्य महात्मनः
२२ तं च यज्ञं तथाभूतं दृष्ट्वा पार्थस्य मातुल यथा शक्रस्य देवेषु तथाभूतं महाद्युते २३ अमर्षेण तु संपूर्णो दह्यमानो दिवानिशं
शुचिशुक्रागमे काले शुष्ये तोयमिवाल्पकं २४ पश्य सात्वतमुख्येन शिशुपालो निपातितः न च तत्र पुमानासीत्कश्चित्तस्य पदानु

गः २५ तं ४

श्वेताश्वस्यार्जुनस्य २२ २३ शुचिशुक्रौ ज्येष्ठाषाढौ तयोरागमे ग्रीष्मर्तौ २४ पदानुगः प्रतीकारकर्ता २५

सभा०
७६

२६ अयुक्तमितिछेदः २७ ३२ सोहंनस्त्री पतिवशत्वात्सपत्न्यास्त्रीपिश्रियंसहते किंतुपुमानस्मीत्यर्थः नहियुद्धेनैवपांडवान्जेतुमिच्छेत्तत्राह नचाप्यस्त्रीअयुद्धेनादि
दहत्वबलहीनः तदपितंपाटयेत्तत्राहनपुमानिति परेषामिव अस्तुकष्टंअस्त्रबलंसाधयितुमसमर्थः नहिक्लीबोसीतिचेत्तत्राहनापुमानिति नस्त्रीतिपूर्वमेवोक्तम

दह्यमानाहिराजानः पांडवोत्थेनवह्निना क्षांतवंतोपराधंतेकोहितत्क्षंतुमर्हति २६ वासुदेवेनतत्कर्मयथायुक्तंमहत्कृतं सिद्धंचपांडुपुत्राणांप्र
तापेनमहात्मनां २७ तथाहिरत्नान्यादायविविधानिनृपानृपं उपातिष्ठंतकौंतेयंवैश्याइवकरप्रदाः २८ श्रियंतथागतांदृष्ट्वाज्वलंतीमिवपांडवे
वे अमर्षवशमापन्नोदह्यामिनतथोचितः २९ एवंसनिश्चयंकृत्वाततोवचनमब्रवीत् पुनर्गांधारनृपतिंदह्यमानइवाग्निना ३० वह्निमेवप्र
वेक्ष्यामिभक्षयिष्यामिवाविषं अपोवापिप्रवेक्ष्यामिनहिशक्ष्यामिजीवितुं ३१ कोहिनामपुमांल्लोकेमर्षयिष्यतिसत्ववान् सपत्नानृध्यतोदृष्ट्वाहानि
मात्मनएवच ३२ सोहंनस्त्रीनचाप्यस्त्रीनपुमान्नापुमानपि योहंतांमर्षयाम्यद्यतादृशींश्रियमागतां ३३ ईश्वरत्वंपृथिव्याश्चवसुमत्तांचतादृ
शीं यज्ञंचतादृशंदृष्ट्वामादृशःकोनसंज्वरेत् ३४ अशक्तश्चैकएवाहंतामाहर्तुंनृपश्रियं सहायांश्चनपश्यामितेनमृत्युंविचिंतये ३५ दैवमेव
परंमन्येपौरुषंचनिरर्थकं दृष्ट्वाकुंतीसुतेशुभ्रांश्रियंतामाहृतांतथा ३६ कृतोयत्नोमयापूर्वंविनाशेतस्यसौबल तच्चसर्वमतिक्रम्यसंवृद्धो
प्स्विवपंकजं ३७ तेनदैवंपरंमन्येपौरुषंचनिरर्थकं धार्तराष्ट्राश्चहीयंतेपार्थावर्द्धंतिनित्यशः ३८ सोहंश्रियंचतांदृष्ट्वासभांतांचतथावि
धां रक्षिभिश्चावहासंतंपरितप्येयथाग्निना ३९ समामभ्यनुजानीहिमातुलाद्यसुदुःखितं अमर्षंचसमाविष्टंधृतराष्ट्रेनिवेदय ४०
इतिसभापर्वणिदुर्योधनसंताप

तः अपुमानितिसनेनक्लीबएवग्राह्यः नापिस्वत्वंतंअसमर्थोस्मीत्यर्थः योहंशत्रुश्रियंसहिष्ये तस्मात्तदपहरणेकश्चित्कपटोपायोन्वेषणीयइतिभावः ३३ ३४ राम०
मृत्युंविचिंतयेइतिशकुनेः सामर्थ्यंज्ञानतात्तस्यक्लेशार्थसाधनेउद्योगंजनयितुमुक्तं ३५ ३९ अनुजानीहिमन्त्रमितिशेषः ४० अध्यायः ७६

१६ जुषस्वप्रीत्यासेवस्व १७ अप्रमादेनप्रमादरहितेनभ्रात्रादिनाशत्रुअतिरेकेण १८ १८ १८ १८ १८ १८ १८ १८

शकुनिरुवाच दुर्योधननतेमर्षः कार्यःप्रतियुधिष्ठिरं भागधेयानिहिस्वानिपांडवाभुंजतेसदा १ विधानंविविधाकारंपरंतेषांविधानतः अ
नेकैरभ्युपायैश्चत्वयानशकिताः पुरा २ आरब्धापिमहाराजपुनः पुनररिंदम किमुक्ताश्चनरव्याघ्राभागधेयपुरस्कृताः ३ तैर्लब्धाद्रौपदी
भार्याद्रुपदश्चसुतैःसह सहायः पृथिवीलाभेवासुदेवश्चवीर्यवान् ४ लब्धश्चानाभिभूतार्थैः पित्र्योंशः पृथिवीपते विवृद्धस्तेजसातेषांत
त्रकापरिदेवना ५ धनंजयेनगांडीवमक्षय्यौचमहेषुधी लब्धान्यस्त्राणिदिव्यानितर्पयित्वाहुताशनं ६ तेनकार्मुकमुख्येनबाहुवीर्येण
चात्मनः कृतावशेमहीपालास्तत्रकापरिदेवना ७ अग्निदाहान्मयंचापिमोक्षयित्वासदानवं सभांतांकारयामाससव्यसाचीपरंतपः
८ तेनचैवमयेनोक्ताः किंकरानामराक्षसाः वहंतितांसभांभीमास्तत्रकापरिदेवना ९ यच्चासहायतांराजन्नुक्तवानसिभारत तन्मिथ्या
भ्रातरोहीमेतवसर्वेवशानुगाः १० द्रोणस्तवमहेष्वासः सहपुत्रेणवीर्यवान् सूतपुत्रश्चराधेयोगौतमश्चमहारथः ११ अहंचसहसो
दर्यैः सौमदत्तिश्चपार्थिवः एतैस्त्वंसहितःसर्वैर्जयकृत्स्नांवसुंधरां १२ दुर्योधनउवाच त्वयाचसहितोराजन्नेतैश्चान्यैर्महारथैः ए
तानेवविजेष्यामियदित्वमनुमन्यसे १३ एतेषुविजितेष्वद्यभविष्यतिमहीमम सर्वेचपृथिवीपालाः सभासाचमहाधना १४ शकुनि
रुवाच धनंजयोवासुदेवोभीमसेनोयुधिष्ठिरः नकुलः सहदेवश्चद्रुपदश्चसहात्मजैः १५ नैतेयुधिपराजेतुंशक्यादेवगणैरपि महा
रथामहेष्वासाः कृतास्त्रायुद्धदुर्मदाः १६ अहंतुतद्विजानामिविजेतुंयेनशक्यते युधिष्ठिरंस्वयंराजंस्तन्निबोधजुषस्वच १७ दुर्यो
धनउवाच अप्रमादेनसुहृदामन्येषांचमहात्मनां यदिशक्योविजेतुंतेतन्ममाचक्ष्वमातुल १८ १८ १८

१९ देवनेघृते २० दीप्तांलक्ष्मीमंती २१ २४ अध्याय: ३ विवर्णः ईषद्वर्णोत्महीनवर्णः हरिणः पांडुः दीनः क्षीणरयः ४ ५ कुतोमूलंकिंमूलं कुतइतिप्रश्न

स० ८८

शकुनिरुवाच द्यूतप्रियश्चकौंतेयोनसजानातिदेवितुं समाहूतश्चराजेंद्रोनशक्ष्यतिनिवर्तितुं १९ देवनेकुशलश्चाहंनमेस्तिसदृशोभुवि
त्रिषुलोकेषुकौरव्यतंत्वंद्यूतेसमाह्वय २० तस्याक्षकुशलोराजन्नादास्येहमसंशयं राज्यंश्रियंचतांदीप्तांत्वदर्थंपुरुषर्षभ २१ इदंतुस
र्वंत्वंराज्ञेदुर्योधननिवेदय अनुज्ञातस्तुतेपित्राविजेष्यामिनसंशयः २४ दुर्योधनउवाच त्वमेवकुरुमुख्यायधृतराष्ट्रायसौबल निवेदय
यथान्यायंनाहंशक्ष्यनिवेदितुं २५ इतिसभापर्वणिदुर्योधनसंतापे वैशंपायनउवाच अनुभूयतुराज्ञस्तांराजसूयंमहाक्रतुं युधि
ष्ठिरस्यनृपतेर्गांधारीपुत्रसंयुतः १ प्रियकृन्मतमाज्ञायपूर्वंदुर्योधनस्यतत् प्रज्ञाचक्षुषमासीनंशकुनिःसौबलस्तदा २ दुर्योधनव
चःश्रुत्वाधृतराष्ट्रंजनाधिपं उपगम्यमहाप्राज्ञंशकुनिर्वाक्यमब्रवीत् शकुनिरुवाच दुर्योधनोमहाराजविवर्णोहरिणःकृशः दीन
श्चिंतापरश्चैवतंविद्धिमनुजाधिप ४ नवैपरीक्षसेसम्यगसह्यंशत्रुसंभवं ज्येष्ठपुत्रस्यहृच्छोकंकिमर्थंनाववुध्यसे ५ धृतराष्ट्र
उवाच दुर्योधनकुतोमूलंभृशमार्तोसिपुत्रक श्रोतव्यश्चेन्मयासोर्थोब्रूहिमेकुरुनंदन ६ अयंत्वांशकुनिःप्राहविवर्णोहरिणो
कृशः चिंतयंश्चनपश्यामिशोकस्यतवसंभवं ७ ऐश्वर्यंहिमहत्पुत्रत्वयिसर्वंप्रतिष्ठितं भ्रातरःसुहृदश्चैवनाचरंतितवाप्रियं ८
आच्छादयसिप्रावारानश्नासिपिशितौदनं आजानेयावहंत्यश्वाःकेनासिहरिणःकृशः ९ शयनानिमहार्हाणियोषितश्चमनो
रमाः गुणवंतिचवेश्मानिविहाराश्चयथासुखं १० देवानामिवतेसर्वंवाचिवद्धंनसंशयः सदीनइवदुर्धर्षकस्माच्छोचसिपुत्रक ११

सभा० ८८

मार्योतसिः १२ पिशितौदनंमांसमयमन्नं आजानेयाःजात्यश्वाः ९ विहाराःक्रीडास्थानानि १० वाचिवद्धं वाङ्मात्रसाध्यं ११ ११

१२ प्रकृतीः प्रजाः क्लेशान्मुमुक्षुर्मोचयितुमिच्छन्नेव पुरुषर्षभ उच्यते १३ त्वत्प्रकृतयो नितिः क्लेशएव संजीवनत्वात् आह यतः संतोषो हि ऐश्वर्ये अलंबुद्धिः श्रियं विद्यमानामपि
हंतीति संतुष्टस्य प्रजाः क्लेशं प्राप्नुवंतीत्यर्थः अभिमानं गर्वं अनुक्रोशो दया भयं स्वानिष्टदृष्टिः महत्पदमिति शेषः १४ १५ आध्मातः वर्द्धमानान् आत्मानमिति

दुर्योधनउवाच अश्नाम्याच्छादयेचाहं यथाकुपुरुषस्तथा अमर्षंधारयेचोग्रंनिनीषुः कालपर्ययं १२ अमर्षणाः स्वाः प्रकृ
तीरभिभूयपरेस्थिताः क्लेशान्मुमुक्षुः परजान्सवैपुरुषउच्यते १३ संतोषोवैश्रियंहंतिह्यभिमानंचभारत अनुक्रोशभयेचोभे
यैर्वृतोनाश्नुतेमहत् १४ नमांप्रीणातिमद्भुक्तंश्रियंदृष्ट्वायुधिष्ठिरे अतिज्वलंतींकौंतेयेविवर्णकरणीमम १५ सपत्नानृध्यतोत्मा
नंहीयमानंनिशाम्यच अदृश्यानपिकौंतेयास्थितान्प्रत्यक्षविलोकयत् १६ तस्मादहंविवर्णश्चदीनश्चहरिणःकृशः अष्टाशी
तिसहस्राणिस्नातकागृहमेधिनः त्रिंशद्दासीकएकैकोयान्बिभर्तियुधिष्ठिरः १७ दशान्यानिसहस्राणिनित्यंतत्रान्नमुत्त
मं भुंजतेरुक्मपात्रीभिर्युधिष्ठिरनिवेशने १८ कदलीमृगमोकानिकृष्णश्यामारुणानिच कांबोजःप्राहिणोत्तस्मैपरार्ध्या
नपिकंबलान् गजयोषिद्गवाश्वस्यशतशोथसहस्रशः १९

निष्ठेदः पूर्ववत्रूपमाद्यं निशाम्यविज्ञाय १६ अदृश्यामपिअवहितत्वात्कौंतेयस्थितांमनसाउद्यतांपश्यन्निवविवर्णोस्मीत्यर्थः १७ १८ कदलीमृगाहरिणाविशेषा
ः तेषांमोकानिअजिनानि तान्येवकृष्णश्यामारुणानिविचित्रवर्णानीत्यर्थः १९ १९ १९ १९

स० वाटाः क्षेत्रादिवृत्तयः तासां धानाश्च भिनत्ति वाटधानाः देशे ये भवंति ते इति व्यधिकरणो बहुव्रीहिः सस्यादिसंपन्नक्षेत्रादिवृत्तिमंत इत्यर्थः वाटो देवेनोत्तमो गौश्चेति धानाः कसंख्येयभ्रोक्ता धन्या
७८ के भिन्ने वाटिरीति विश्वः त्रिखर्वं खर्वत्रयसंख्यं २४ कमंडलूनिति दृद्वियं वास्तनदस्मि लोके यदृध्नीति खंजेय ब्बचमन्य रोदधिम धुप्रत्नं आपयश्च त्वमभिषेक द्रव्याणि वि

त्रिंशतं चोष्ट्रवामीनां शतानि विचरंत्युत राजन्बलिमादाय समेता हि न्रपक्षये २० एवंविधानि रत्नानि पार्थिवाः पृथिवी
पते आहरन्क्रतुमुख्येस्मिन्कुंतीपुत्राय भूरिशः २१ न क्वचिद्धि मया तादृक्दृष्टपूर्वो न च श्रुतः यादृग्धनागमो यज्ञे पांडुपुत्र
स्य धीमतः २२ अर्यं यं तं धनौघं तं दृष्ट्वाशत्रोरहं न्रप शर्म नैवाभिगच्छामि चिंतयानो विशांपते २३ ब्राह्मणा वाटधानाश्च
गोमंतः शतसंघशः त्रिखर्वं बलिमादाय द्वारि तिष्ठंति वारिताः २४ कमंडलूनुपादाय जातरूपमयाञ्छुभान् एतद्धनं स
मादाय प्रवेशं लेभिरे न च २५ यथैव मधु शक्राय धारयंत्यमरस्त्रियः तदस्मै कांस्यमाहार्षीद्वारुणं कलशोदधिः २६

विहितानि तत्र तेरेषामप्रदर्शनात् दृदृ कमंडलूनुपहृतपूर्णानिति द्रष्टव्यं २५ यथैवेति अमरस्त्रीमः तस्याः स्त्रियश्चौषधयः तदिदं मधुश्चास्मै कांस्यं कांस्यपात्रस्थं कलाः दा स०
र्षीत् अर्थात्सोमएव तथा वारुणं वरुणप्रेषितं दधिप्रसिद्धं कलशः स्वकलशो जलपूर्णो तात्समुद्रः आहार्षीत् दधिरिति पुंस्त्वं आर्षं लेखकप्रमादो वा अमेतु कलशो ७८
दधिः समुद्रः मधु अमृतं जलमित्यन्ये अमरस्त्रियोनघः वारुणं वरुणसंबंधीति व्याचक्षते २६

शैक्यं वस्त्रामयं पात्राधारभूतं शिक्यं कावडीति प्रसिद्धं तत्र स्थितं पात्रं शैक्यं एतेन सामुद्र्य आप उक्ताः अन्या अपि पुण्या आपो ऽभिषेकार्थमुक्ताः प्रदेशांतरे वापीकूपतडागेभ्यो
ह्रदेभ्यः सरसस्तथा चतुर्भ्यश्च समुद्रेभ्यः पल्वलादिभिः संधितः प्रयागादेवयजनाज्जलान्याहृत्य सर्वतः गंगा सरस्वती चैव नर्मदा च दृ वहन्ती एभ्यो जले समाहृत्य ते चाभिषि

शैक्यं तत्कांस्यसहस्रस्य वज्ररत्नविभूषितं शंखप्रवरमादाय वासुदेवो ऽभिषिक्तवान् २७ दृष्ट्वा च मम तत्सर्वं ज्वररूपमिवाभवत् गृहीत्वा तत्तु
गच्छंति समुद्रौ पूर्वदक्षिणौ २८ तथैव पश्चिमं यान्ति गृहीत्वा भरतर्षभ उत्तरं तु न गच्छन्ति विना तातपतत्रिणः २९ तत्र गत्वार्जुनो दं
ड्रमाजहारामितं धनं इदं चाद्भुतमत्रासीत्तन्मे निगदतः शृणु ३० पूर्णे शतसहस्रे तु विप्राणां परिविष्यतां स्थापितात्र संज्ञाभूच्छंखो
ध्मायति नित्यशः ३१ मुहुर्मुहुः प्रणदतस्तस्य शंखस्य भारत अनिशं शब्दमश्रौषं ततो रोमाणि मे ऽहृषन् ३२ पार्थिवैर्बहुभिः कीर्णमु
पस्थानं दिदृक्षुभिः अशोभत महाराज नक्षत्रैर्द्यौरिवामला ३३ सर्वरत्नान्युपादाय पार्थिवा वै जनेश्वर यज्ञे तस्य महाराज पांडुपुत्रस्य
धीमतः ३४ वैश्या इव महीपाला द्विजातिपरिवेशकाः न सा श्रीर्देवराजस्य यमस्य वरुणस्य च गुह्यकाधिपतेर्वापि या श्री राजन्यु
धिष्ठिरे ३५ तां दृष्ट्वा पांडुपुत्रस्य श्रियं परमिकामहं शांतिं न परिगच्छामि दह्यमानेन चेतसा ३६ ३६

षिचुर्द्विजा इति २७ २८ पतत्त्रिणः खेचरजातीयाः देवादयः तैरेवोत्तरसमुद्रजलमानीतमित्यर्थः अन्यथा चतुर्भ्यश्च समुद्रेभ्य इत्यनुपपन्नं स्यात् २९ ३० परि
वेश्यतां परिवेश्यमानानां संज्ञा संकेतः ३१ ३२ उपतिष्ठंत्यस्मिन्नित्युपस्थानं सभा उपाहृत्य स्थिता इति शेषः ३३ ३४ ३५ ३५

अक्षेषुपाशेषुअभिज्ञातः कुशलः हृदयज्ञः पातयिष्यमाणानामक्षाणांजयपराजयावहत्वाभिज्ञः पणज्ञः तदनुसारेणाक्षप्रयोगवित् विशेषज्ञः दिक्कालाद्या
नुकूल्याभिज्ञः ३८ द्यूतात्द्यूतहेतोः रणात्रणहेतोः ३९ कपटंअक्षाधिष्ठात्र्याःदेवतायावशीकरणं यद्वासर्वतश्चतुष्कोणतयाद्वादशधारेष्वक्षेषुषट्तला
निमंवेशितेषुत्रिषुत्रिषुदेवयित्रोर्नामनीलिख्यंते तत्रकपटंछन्नतः सुषिरमक्षंकलापरनामांकितमध्येशगर्भेगुडुइव्यसंश्लिष्टंकृत्वापातितस्याक्षस्यस्वनामे

शकुनिरुवाच योमेतांमतुलांलक्ष्मींदृष्टवानसिपांडवे तस्याः प्राप्तावुपायंमेशृणुसत्यपराक्रम ३७ अहमक्षेष्वभिज्ञातःपृ
थिव्यामपिभारत हृदयज्ञः पणज्ञश्चविशेषज्ञश्चदेवने ३८ द्यूतप्रियश्चकौंतेयोनचजानातिदेविंतु आहूतश्चैष्यतिव्यक्तं
द्यूतादपिरणादपि ३९ नियतंतंविजेष्यामिकृत्वातुकपटंविभो आनयामिसमृद्धिंतांदिव्यांचोपाह्वयस्वतं ४० वैशंपाय
नउवाच एवमुक्तः शकुनिनाराजादुर्योधनस्ततः धृतराष्ट्रमिदंवाक्यमपदांतरमब्रवीत् ४१ अयमुत्सहतेराजन्श्रिय
माहर्तुमक्षवित् द्यूतेनपांडुपुत्रस्यतदनुज्ञातुमर्हसि ४२ धृतराष्ट्रउवाच क्षत्तामंत्रीमहाप्राज्ञः स्थितोयस्यास्मिशासने
तेनसंगम्यवेत्स्यामिकार्यस्यास्यविनिश्चयं ४३ सहिधर्मंपुरस्कृत्यदीर्घदर्शीपरंहितं उभयोः पक्षयोर्युक्तंवक्ष्यत्यर्थविनिश्चयं
४४ दुर्योधनउवाच निवर्तयिष्यतित्वासौयदिक्षत्तासमेष्यति निवृत्तेत्वयिराजेंद्रमरिष्येहमसंशयं ४५ ॥ ॥ ॥

वोपरिभवति तदास्वस्यजयः परस्यनामाधस्थंतस्यपराजयइति ४० अपदांतरंअनुपदमेव ४१ ४२ ४४ त्वासौत्वांअसौ निवर्तयिष्यतित्वासा
विन्मोदः विवर्णिताचैवशशोकतोचेसंतस्यदुर्योधनविलापस्यतात्पर्यंपुण्यवतामीश्वरप्रसादलभ्यामृद्धिंदृष्ट्वापापिनांपरितापोभवतीति ४५ ४५ ४५

४८ रत्नैः संस्तीर्य रत्नस्त्वितां कृत्वा तक्ष्णः वर्द्धकिनः सर्वशः सर्वदेशीयान् ४९ ५३ व्यवसायं विनिश्चयं दिष्टं दैवं ५६ ५९ आपगेयं भीष्मं ६० अध्यायः ॥

सत्वं मयि मृते राजन् विदुरेण सुखी भव भोक्ष्यसे पृथिवीं कृत्स्नां किं मया त्वं करिष्यसि ४६ वैशंपायन उवाच आर्तवाक्यं तु तत्तस्य प्रणयो
क्तं निशम्य सः धृतराष्ट्रोऽब्रवीत्प्रेष्यान् दुर्योधनमते स्थितः ४७ स्थूणासहस्रैर्बृहतीं शतद्वारां सभां मम मनोरमां दर्शनीयामाशु कुर्वन्तु शि
ल्पिनः ४८ ततः संस्तीर्य रत्नैस्तामास्तरणानानाय्य सर्वशः सुकृतां सुप्रवेशां च निवेदयत मे शनैः ४९ दुर्योधनस्य शान्त्यर्थमिति निश्चि
त्य भूमिपः धृतराष्ट्रो महाराज प्राहिणोद्विदुराय वै ५० अपृष्ट्वा विदुरं ह्यस्य नासीत्कश्चिद्विनिश्चयः द्यूते दोषांश्च जानन् स पुत्रस्नेहा
दकृष्यत ५१ तच्छ्रुत्वा विदुरो धीमान् कलिद्वारमुपस्थितं विनाशमुखमुत्पन्नं धृतराष्ट्रमुपाद्रवत् ५२ सोऽभिगम्य महात्मानं भ्रा श्रीतात ५
तरमग्रजं मूर्ध्ना प्रणम्य चरणाविदं वचनमब्रवीत् ५३ विदुर उवाच नाभिनन्दामि ते राजन् व्यवसायमिमं प्रभो पुत्रैर्भेदो यथा न स्यात्
द्यूतहेतोस्तथा कुरु ५४ धृतराष्ट्र उवाच क्षत्तः पुत्रेषु पुत्रैर्मे कलहो न भविष्यति दिवि देवाः प्रसादं नः करिष्यन्ति न संशयः
५५ अशुभं वा शुभं वापि हितं वा यदि वाहितं प्रवर्ततां सुहृद्द्यूतं दिष्टमेतन्न संशयः ५६ मयि सन्निहिते द्रोणे भीष्मे त्वयि च भा
रत अनयो दैवविहितो न कथंचिद्भविष्यति ५७ गच्छ त्वं रथमास्थाय हयैर्वातसमैर्जवे खाण्डवप्रस्थमद्यैव समानय युधिष्ठिरं
५८ न वाच्यो व्यवसायो मे विदुरैतद्ब्रवीमि ते दैवमेव परं मन्ये येनैतदुपपद्यते ५९ इत्युक्तो विदुरो धीमान्नेदमस्तीति चिन्तयन्
आपगेयं महाप्राज्ञमभ्यगच्छत्सुदुःखितः ६० इति सभापर्वणि दुर्योधनसंतापे ॥

कथं व्यसनं प्रापत् सभास्ताराः सभासदः ८ १० भेदो वैरं ११ १५ संमूर्छितमिति यावद्विवृद्धं १६ १६ १६ १६

स०
८०

जनमेजय उवाच कथं समभवद्द्यूतं भ्रातॄणां तन्महात्ययं यत्र तद्व्यसनं प्राप्तं पांडवैर्मे पितामहैः १ के च तत्र सभास्तारा राजानो
ब्रह्मवित्तम के चैनमन्वमोदंत के चैनं प्रत्यषेधयन् २ विस्तरेणैतदिच्छामि कथ्यमानं त्वया द्विज मूलं ह्येतद्विनाशस्य पृथिव्या द्विज
सत्तम ३ सौतिरुवाच एवमुक्तस्तदा राज्ञा व्यासशिष्यः प्रतापवान् आचचक्षेऽथ यद्वृत्तं तत्सर्वं वेदतत्त्ववित् ४ वैशंपायन
उवाच शृणु मे विस्तरेणेमां कथां भरतसत्तम भूय एव महाराज यदि ते श्रवणे मतिः ५ विदुरस्य मतिं ज्ञात्वा धृतराष्ट्रोंबिकासुतः दुर्यो
धनमिदं वाक्यमुवाच विजने पुनः ६ अलं द्यूतेन गांधारे विदुरो न प्रशंसति न ह्यसौ सुमहाबुद्धिरहितं नो वदिष्यति ७ हितं हि परमं मन्ये वि
दुरो यत्प्रभाषते क्रियतां पुत्र तत्सर्वमेतन्मन्ये हितं तव ८ देवर्षिर्वासवगुरुर्देवराजाय धीमते यत्प्राह शास्त्रं भगवान्बृहस्पतिरुदारधीः त
द्वेद विदुरः सर्वं सरहस्यं महाकविः ९ स्थितश्च वचने तस्य सदाहमपि पुत्रक विदुरो वापि मेधावी कुरूणां प्रवरो मतः १० उद्धवो वा
महाबुद्धिर्वृष्णीनामर्चितो नृप तदलं पुत्र द्यूतेन द्यूते भेदो हि दृश्यते ११ भेदे विनाशः स्याद्राजन्तत्पुत्र परिवर्जय पित्रा मात्रा च पुत्रस्य
यद्वै कार्यं परं स्मृतं १२ प्राप्तस्त्वमसि तत्तात पितृपैतामहं पदं अधीतवान्कृती शास्त्रे लालितः सततं गृहे १३ भ्रातृज्येष्ठः स्थितो
राज्ये विंदसे किं न शोभनं पृथग्जनैरलभ्यं यद्भोजनाच्छादनं परं १४ तत्प्राप्तोऽसि महाबाहो कस्माच्छोचसि पुत्रक स्फीतं राष्ट्रं महाबाहो
पितृपैतामहं महत् १५ नित्यमाज्ञापयन्भासि दिवि देवेश्वरो यथा तस्य ते विदितप्रज्ञ शोकमूलमिदं कथं समुत्थितं दुःखकरं तन्मे स०
शंसितुमर्हसि १६ ॥ ॥ ८०

अमर्षं असहिष्णुतां १६ साधारणी विशेषरहिता १८ स्थिरः स्थावरः पाषाणतुल्यो म्रियते न विदीर्णो न भवामि १९ आवर्जिताः ह्रासवद्भागाः २० पर्युदस्ताः दूरक्षि
प्ताः २१ ज्येष्ठो वयोऽधिकः श्रेष्ठः प्रशस्यतमः युक्तो नियुक्तः २२ अर्घहारिणां बहुमूल्यवतां रत्नानां अग्र्यराजादितत्रत्यासूत्कृष्टवस्तूनां पुरः स्थितानां प्रान्तो पर्यन्तो

दुर्योधनउवाच अमाम्याछादयामीतिमपश्यमायपूरुषः नामर्षंकुरुतेयस्तुपुरुषः सोधमः स्मृतः १६ नमांप्रीणातिराजेंद्र
लक्ष्मीः साधारणी विभो ज्वलितामिवकौंतेयेश्रियंदृष्ट्वाचविव्यथे १८ सर्वांचपृथिवींचैवयुधिष्ठिरवशानुगां स्थिरोस्मियोहंजीवा
मिदुःखेनैतद्ब्रवीमिते १९ आवर्जिताइवाभांतिनिघ्नाश्चित्रककौकुराः कारस्करालोहजंघायुधिष्ठिरनिवेशने २० हिमवत्साग
रानूपाः सर्वेरत्नाकरास्तथा अंत्याः सर्वेपर्युदस्तायुधिष्ठिरनिवेशने २१ ज्येष्ठोयमितिमांमत्वाश्रेष्ठश्चेतिविशांपते युधिष्ठिरेणस
त्कृत्ययुक्तोरत्नपरिग्रहे २२ उपस्थितानांरत्नानांश्रेष्ठानामर्घहारिणां नादृश्यतपरः पारोनापरस्तत्रभारत २३ नमेहस्तः सम
भवत्वसुतत्प्रतिगृह्णतः अतिष्ठंतमयिश्रांतेगृह्यदूराहृतंवसु २४ कृतांबिंदुसरोरत्नैर्मयेनस्फाटिकच्छदां अपश्यन्नलिनींपूर्णा
मुदकस्येवभारत २५ वस्त्रमुत्कर्षतिमयिप्राहसत्सवृकोदरः शत्रोर्ऋद्धिविशेषेणविमूढंरत्नवर्जितं २६ तत्रस्मयदिशक्तः स्यां
पातयेयंवृकोदरं यदिकुर्यांसमारंभंभीमंहंतुंनराधिप २७ शिशुपालइवास्माकंगतिः स्यान्नात्रसंशयः सपत्नेनावहासोमेसमांद
हतिभारत २८ ॥

दृश्यत इयत्तावधारणं च वसुदानकर्तृणामप्यमित्यर्थः २३ समभवत् समर्थोऽनाभवत् अतिष्ठंत प्रतिग्राहकतंवंतः वसुन आहर्तारः वसुदातुं २४ स्फाटिकाः छदाद्रवच्छदाः
उपकंठस्थसोपानादयो यस्यास्तां बिंदुसरसः सकाशात् आहृतैः रत्नैः २५ २८ २८ २८ २८ २८

स० ८१

३१ प्रलंभं वंचनां ३२ ३६ अध्यायः पन्नगया १ फलतः संख्यापरिच्छिन्नः भूमितः देशभेदतो वा नाविदं मितिसंबंधः अपितन्यापि मुख्यतः वक्ष्यमाणं धनं प्रतिप

पुनश्च तादृशीमेव वापीं जलजशालिनीं मत्वा शिलासमां तोये पतितोस्मि नराधिप २९ तत्र मां प्राहसत्कृष्णः पार्थेन सह सुस्वरं द्रौप
दी च सह स्त्रीभिर्व्यथयंती मनो मम ३० क्लिन्नवस्त्रस्य तु जले किंकरा राजनोदिताः ददुर्वासांसि मेन्यानि तच्च दुःखं परं मम ३१ प्र
लंभं च शृणु चान्यद्वदतो मे नराधिप अद्वारेण विनिर्गच्छन्द्वारसंस्थानरूपिणा अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः ३२
तत्र मां यमजौ दूरादालोक्याभिहतं तदा बाहुभिः परिगृह्णीतां शोचंतौ सहितावुभौ ३३ उवाच सहदेवस्तु तत्र मां विस्मयन्निव इदं
द्वारमितो गच्छ राजन्निति पुनः पुनः ३४ भीमसेनेन तत्रोक्तो धृतराष्ट्रात्मजेति च संबोध्य प्रहसित्वा च इतो द्वारं नराधिप ३५
नामधेयानि रत्नानि पुरस्तान्न श्रुतानि मे यानि दृष्टानि मे तस्यां मनस्तपति तच्च मे ३६ इति सभापर्वणि दुर्योधनसंतापे दुर्यो
धन उवाच यन्मया पांडवेयानां दृष्टं तच्छृणु भारत आहृतं भूमिपालैर्हि वसु मुख्यं ततस्ततः १ नविंदे दृढमात्मानं दृष्ट्वाहं
तदरेर्धनं फलतो भूमितो वापि प्रतिपद्यस्व भारत २ ऐडान्वैलान्वार्षदंशान्जातरूपपरिष्कृतान् प्रावाराजिनमुख्यांश्च कां
बोजः प्रददौ बहून् ३ ३

द्यस्वेत्यर्थः यद्वा फलतो जातं वस्त्रादि भूमितो जातं हीरादि २ और्णान् मेषरोमजान् वैलान् बिलवासि मूषकादिरोमजान् वार्षदंशान् विडालरोमजान् जातरूपपरि
ष्कृतान् सुवर्णतंतुभिर्व्यूतान् हिंडुभिर्वा चित्रितान् और्णाः प्रावाराः अन्याप्यजिनानीति वा विभागः ३ ४ ॥ ॥

टी० ८१

त्रित्रिरिकल्माषान्त्रित्रिरिप(क्षि)वच्चित्रान् उष्ट्राः वाम्यः गर्दभाश्वसंकरजाः उभयेयपि पील्वादिनापुष्टिंगताः ४ गोवासनाः बलीवर्दपोषकाः क्षत्रादिरहितमतोब्राह्मणाः तथा दासनीयाः दास्यधीग्याः शूद्रादयः ५ ब्राह्मणाएववाताहशाः यथोक्तंमूर्खान्ब्राह्मणानप्रहरूस्यपुष्करस्यादुर्भावे यस्मैनैवंकृतेराजन्नग्रहीतंविशांपते कामंतंधार्मिकोराजा शूद्रकर्मणिकारयेदिति अस्मिन्पक्षेत्रिखर्वंत्रीणियाजनाध्यापनप्रतिग्रहाः खर्वाणिमुख्यानिधनलाभमूपफलहीनानियेषांतेत्रिखर्वाः विद्याधर्मनसत्कर्मशून्यत्वात्
प

अथ्यांस्त्रिशिरिकल्माषांस्त्रिशतंशुकनासिकान् उष्ट्रवामीस्त्रिशतंचपुष्टाः पीलुशमीगुदैः ४ गोवासनाब्राह्मणाश्चदासनीयाश्च
सर्वशः प्रीत्यर्थंतेमहाराजधर्मराज्ञोमहात्मनः ५ त्रिखर्वंबलिमादायद्वारितिष्ठंतिवारिताः ब्राह्मणावाटधानाश्चगोमन्तःशतसंघशः
६ कमंडलूनुपादायजातरूपमयान्शुभान् ७ एवंबलिंसमादायप्रवेशंलेभिरेनच शतंदासीसहस्राणांकार्पासिकनिवासिनां ८
श्यामास्तन्व्योदीर्घकेश्योहेमाभरणभूषिताः शूद्राविप्रोत्तमार्हाणिरांकवाण्यजिनानिच ९ बलिंचकृत्स्नमादायकार्पासिकनिवा
सिनः उपनिन्युर्महाराजहयान्गांधारदेशजान् १० इंद्रकृष्टैर्वर्तयंतिधान्यैर्येचनदीमुखैः समुद्रनिष्कुटेजाताः पारेसिंधुंचमा
नवाः ११ तेवैरामाःपारदाश्चआभीराःकितवैःसह विविधंबलिमादायरत्नानिविविधानिच १२ अजाविकंगोहिरण्यंखरो
ष्ट्रंफलजंमधु कंबलान्विविधांश्चैवद्वारितिष्ठंतिवारिताः १३

याजनादिहीनाश्चस्यर्थः तेः धर्कटसंज्ञैः प्रदेयोबलिस्त्रिखर्वबलिः तमिस्यर्थः वारिताइत्यनेनतेषांअसंमतहीनतार्दर्शिता ६ कार्पासिकोदेशविशेषः ७।८ मरुकच्छः देशः कांचनमयः सजलप्रदेशोयस्मिन्सतथा भरुभेन्नरिकांचने अथकच्छः स्यादनूपेदतिविश्वः १० समुद्रसमीपस्थनिष्कुटेस्वरोद्यानेसमुद्रनिष्कुटे इंद्रकृष्टैः।इंद्रेणैवाकृष्टैः नतुकर्षणादिक्लेशैरित्यकपत्नापेक्षैः वनधान्यैर्वृष्ट्यभावेतुनदीमुखैः नदीप्रभवैः ११ १२ फलजंमधुवृक्षादिजातीयं १३ ॥

१५ अश्मसारो हीरपद्मरागादिमणयः तन्मयं भाण्डं भूषणं भाण्डं भूषणमोचपीतिविश्वः त्सरुः खड्गमुष्टिः १६ कक्षाद्या देशप्राप्तभेदाः १७ नानावर्णान् ग्रासभानप्रमाणेन

स०
८२

प्राग्ज्योतिषाधिपः शूरो म्लेच्छानामधिपो बली यवनैः सहितो राजा भगदत्तो महारथः १४ आजानेयान्हयाञ्शीघ्रानादायानिलरंहस
ः बलिं च कृत्स्नमादाय द्वारि तिष्ठति वारितः १५ अश्मसारमयं भाण्डं शुद्धदन्तत्सरूनसीन् प्राग्ज्योतिषाधिपो दत्त्वा भगदत्तोऽव्रजत्तदा
१६ त्र्यक्षांल्ललाटाक्षान्नानादिग्भ्यः समागतान् औष्णीकानन्तवासांश्च रोमकान्पुरुषादकान् १७ एकपादांश्च तत्राहमप
श्यं द्वारि वारितान् राजानो बलिमादाय नानावर्णाननेकशः १८ कृष्णग्रीवान्महाकायान्रासभान्दूरपातिनः आजह्रुर्दशसाहस्रा
न्विनीतान्दिक्षु विश्रुतान् १९ प्रमाणरागसंपन्नान्वंक्षुतीरसमुद्भवान् बल्यर्थं ददतस्तस्मै हिरण्यं रजतं वसु २० दत्त्वा प्रवेशं प्राप्ता
स्ते युधिष्ठिरनिवेशने इन्द्रगोपकवर्णाभाञ्शुकवर्णान्मनोजवान् २१ तथैवेन्द्रायुधनिभान्संध्याभ्रसदृशानपि अनेकवर्णानारण्या
न्गृहीत्वाश्वान्महाजवान् २२ जातरूपमनर्घ्यं च ददुस्तस्यैकपादकाः चीनान्हूणाञ्शकानोड्रान्पर्वतान्तरवासिनः २३
वार्ष्णेयान्हारहूणांश्च कृष्णान्हैमवतांस्तथा नीपानूपानधिगतान्विविधान्द्वारवारितान् २४ बल्यर्थं ददतस्तस्य नानारूपाननेक
शः कृष्णग्रीवान्महाकायान्रासभाञ्शतपातिनः आहार्षुर्दशसाहस्रान्विनीतान्दिक्षु विश्रुतान् २५ प्रमाणरागस्पर्शाढ्यं
बाह्लीचीनसमुद्भवं और्णं च राङ्कवं चैव कीटजं पट्टजं तथा २६ कुटीकृतं तथैवात्र कमलाभं सहस्रशः श्लक्ष्णं वस्त्रमकार्पासमा
विकं मृदु चाजिनं २७ निशितांश्चैव दीर्घासीनृष्टिशक्तिपरश्वधान् अपरान्तसमुद्भूतांस्तथैव परशूञ्शितान् २८ ॥

सभापर्व ५८
एम०
८२

दैर्घ्यपुष्ट्यादिना रागेण रम्यवर्णेन च संपन्नान् आधिकान् २० २६ कुटीकृतं चित्रगुच्छाकारं कृतं स्यात्कुटीकं भद्रासं च मृदु चित्रगुच्छके इति विश्वः २७ अपरा

रसान्संवंतितवुंजादीनि गंधान्गंधवंतिमगरादीनि २९ ३३ वैयाघ्रंपरिवारितान्व्याघ्रचर्मणापरिवृतान् परिस्तोमान्रंजकंवलान्परिस्तोमःकुथोद्व

रसान्गंधांश्चविविधान्रत्नानिचसहस्रशः बलिंचकृत्स्नमादायद्वारितिष्ठंतिवारिताः २९ शकास्तुषाराःकंकाश्च
रोमशाःशृंगिणोनराः महागजान्दूरगमान्गणितानर्बुदान्हयान् ३० शतशश्चैवबहुशःसुवर्णंपद्मसंमितं ब
लिमादायविविधंद्वारितिष्ठंतिवारिताः ३१ आसनानिमहार्हाणियानानिशयनानिच मणिकांचनचित्राणिगजदं
तमयानिच ३२ कवचानिविचित्राणिशस्त्राणिविविधानिच रथांश्चविविधाकारान्जातरूपपरिष्कृतान् ३३
हयैर्विनीतैःसंपन्नान्वैयाघ्रपरिवारितान् विचित्रांश्चपरिस्तोमान्रत्नानिविविधानिच ३४ नाराचानर्धनाराचान्शस्त्रा
णिविविधानिच एतद्दत्त्वामहद्द्रव्यंपूर्वदेशाधिपानृपाः प्रविष्टायज्ञसदनंपांडवस्यमहात्मनः ३५ इतिसभापर्वणि
दुर्योधनसंतापे दुर्योधनउवाच दायंतुविविधंतस्मैशृणुमेगदतोनघ यज्ञार्थंराजभिर्दत्तंमहांतंधनसंचयं १
मेरुमंदरयोर्मध्येशैलोदामभितोनदीं येतेकीचकवेणूनांछायांरम्यामुपासते २ खसाएकासनाह्यर्हाःप्रदरादी
र्घवेणवः पारदाश्चकुलिंदाश्चतंगणाःपरतंगणाः ३ तद्वैपिपीलिकंनामउद्धृतंयत्पिपीलिकैः जातरूपंद्रोणा
मेयमहार्षुःपुंजशोनृपाः ४ कृष्णान्ललामांश्चमरान्शुक्लांश्चान्यान्शशिप्रभान् हिमवत्पुष्पजंचैवस्वादुक्षौद्रंत
थावहु ५

योरित्यमरः ३४ ३५ अध्यायः दायंकार्यदेयंधनं दायोदानेयौतकादिधनेइतिविश्वः १ ४ कृष्णानित्यादयोमणिभेदाः पाठांतरेहि
मजंहिमालयजं ५

लौहित्यंपर्वतं ८ ९ कालीयकस्य कृष्णागरोः १० ११ निचितंराशीकृतंपर्वतेभ्योविधूरि वर्चसंतेजस्वि अर्शश्राघव १२ १९ कृतकालाःकृ

स० ८३

उत्तरेभ्यःकुरुभ्यश्चाप्यपोढंमाल्यमंबुभिः उत्तरादपिकैलासादोषधीःसुमहाबलाः ६ पार्वतीयाबलिंचान्यमाहृत्य
प्रणताःस्थिताः अजातशत्रोर्नृपतेर्द्वारितिष्ठंतिवारिताः येपरार्द्धेहिमवतःसूर्योदयगिरौनृपाः कारूषेचसमुद्रां
तेलौहित्यमभितश्चये ८ फलमूलाशनायेचकिरताश्चर्मवाससः क्रूरशस्त्राःक्रूरकृतस्तांश्चपश्याम्यहंप्रभो ९
चंदनागुरुकाष्ठानांभारानकालीयकस्यच चर्म्मरत्नसुवर्णानांगंधानांचैवराशयः १० कैरातकानामयुतंदा
सीनांचविशांपते आहृत्यरमणीयार्थानद्दूरजानमृगपक्षिणः ११ निचितंपर्वपर्वतेभ्यश्चहिरण्यंभूरिवर्चसं
बलिंचकृत्स्नमादायद्वारितिष्ठंतिवारिताः १२ कैराताद्दरदार्दर्वाःशूरावैयमकास्तथा औदुंबरादुर्विभागाःपारदा
बाह्लिकैःसह १३ काश्मीराश्चकुमाराश्चघोरकाहंसकायनाः शिबित्रिगर्त्तयौधेयाराजन्यामद्रकेकयाः १४ अं
बष्ठाःकौकुरास्तार्क्ष्यावस्त्रपाःपह्लवैःसह वशातयश्चमौलेयाःसहक्षुद्रकमालवैः १५ पौंड्रिकाःकुक्कुराश्चैवशकाश्चै
वविशांपते अंगावंगाश्चपुंड्राश्चशाणवत्यागयास्तथा १६ सुजातयःश्रेणिमंतःश्रेयांसःशस्त्रधारिणः आहा
र्षुःक्षत्रियावित्तंशतशोजातशत्रवे १७ वंगाःकलिंगामगधास्ताम्रलिप्ताःसपुंड्रकाः दौवालिकाःसागरकाःपत्रोर्णाः
शैशवास्तथा १८ कर्णप्रावरणाश्चैवबहवस्तत्रभारत तत्रस्थाद्वारपालैस्तेप्रोच्यंतेराजशासनात कृतकालाः राम० ८३
सुबलयस्ततोद्वारमवाप्स्यथ १९

नम्रत्वावाः कृतद्वाराइतिपाठेद्वारंप्रतीहारेरोसत्वं १९ श्रीकृष्णायनमः ॥ ॥ छ ॥ छ ॥ ७ ॥ ७ ॥

ईषादंतान् जांगलरंड हल्यदंतान् हेमकक्षाः सुवर्णावरत्नाः २० २४ कृताः दशभेदास्तेषां २५ २८ संयहसेनेन दत्तानीति शेषः २९

प्रा१

ईषादंतान् हेमकक्षान् पद्मवर्णान् कुथावृतान् शैलाभान्नित्यमत्तांश्चाप्यभितः काम्यकंसरः २० दत्वैके कोदशांतान् कुंजरान्कव
चावृतान् क्षमावंतः कुलीनाश्च द्वारेण प्रविशंस्तथा २१ एतेचान्येच बहवो गणादिग्भ्यः समागताः अन्यैश्चोपाहृतान्यत्र
रत्नानीह महात्मभिः २२ राजाचित्ररथोनाम गांधर्वो वासवानुगः शतानिचत्वार्यददद्धयानां वातरंहसां २३ तुंबुरु
स्तु प्रमुदितो गंधर्वो वाजिनां शतं आम्रपत्रसवर्णानामददद्धेममालिनां २४ कृती राजाच कौरव्य शूकराणां विशांपते
अददद्गजरत्नानां शतानिसुबहून्यथ २५ विराटेन तु मत्स्येन बल्यर्थं हेममालिनां कुंजराणां सहस्रे द्वे मत्तानां समु
पाहृते २६ पांशुराष्ट्राद्वसुदानो राजा षड्विंशतिंगजान् अश्वानांच सहस्रे द्वे राजन्कांचनमालिनां २७ जवसत्वो
पपन्नानां वयस्थानां नराधिप बलिंच कृत्स्नमादाय पांडवेभ्यो न्यवेदयत् २८ यज्ञसेनेन दासीनां सहस्राणि चतुर्दश
दासानामयुतं चैव सदाराणां विशांपते २९ अददद्गजरत्नानां शतानिसुबहूनिच गजयुक्तान्महाराज रथान्षड्विं
शतिं तथा ३० राज्यंच कृत्स्नं पार्थेभ्यो यज्ञार्थं वै निवेदितं वासुदेवोपि वार्ष्णेयो मानं कुर्वन्किरीटिनः ३१ अदद
द्गजमुख्यानां सहस्राणि चतुर्दश आत्माहि कृष्णः पार्थस्य कृष्णस्यात्मा धनंजयः ३२ यद्ब्रूयादर्जुनः कृष्णं सर्वं कु
र्यादसंशयं कृष्णो धनंजयस्यार्थे स्वर्गलोकमपि त्यजेत् ३३ तथैव सर्वं कृष्णार्थे प्राणानपि परित्यजेत् सुरभींश्चं
दनरसान् हेमकुंभसमास्थितान् ३४ मलयाद्दर्दुराच्चैव चंदनागुरुसंचयान् मणिरत्नानि भास्वंति कांचनं सूक्ष्म
वस्त्रकं ३५

स मुद्रसारं मुक्ताफलादि ३६ कुथान् कशिकंबलान् ३७ ४० १ पर्यस्तइव प्रदेशो पिलंगीभूतदूव ३ पग्राहान् उपहारान् ४१ ४३ प्र

सा०स०
२५

चोलपांड्यावपिद्वारं नलेभाते ह्युपस्थितौ समुद्रसारं वैडूर्यं मुक्तासंघांस्तथैवच ३६ शतशश्चकुथांस्तत्रसिं
हलाः समुपाहरन् संवृतामणिचीरैस्तु श्यामास्ताम्रांतलोचनाः ३७ तान्गृहीत्वानरास्तत्रद्वारितिष्ठंतिवारिताः
प्रीत्यर्थं ब्राह्मणाश्चैववत्कृत्रियाश्चविनिर्जिताः ३८ उपाजह्रुर्विशश्चैवशूद्राःशुश्रूषवस्तथा प्रीत्याचबहुमानाच्चाप्युपा
गच्छन्युधिष्ठिरं ३९ सर्वेम्लेच्छाःसर्ववर्णाः आदिमध्यान्तजास्तथा नानादेशसमुत्थैश्चनानाजातिभिरेवच ४० प
र्यस्तइवलोकोयंयुधिष्ठिरनिवेशने उच्चावचानुपग्राहान्राजभिःप्रापितान्बहून् ४१ शत्रूणांपश्यतोविप्रान्मुमू
र्षामेव्यजायत भृत्यास्तुयेपांडवानांतांस्तेवक्ष्यामिपार्थिव ४२ येषामामंचपक्वंचसंविधत्तेयुधिष्ठिरः अयुतंत्री
णिपद्मानिगजारोहाःससादिनः ४३ रथानामर्बुदंचापिपादाताबहवस्तथा प्रमीयमाणमामंचपच्यमानंतथैवच
४४ विसृज्यमानंचान्यत्रपुण्याहस्वनएवच नाभुक्तवंतंनापीनंनालंकृतमसत्कृतं ४५ अपश्यंसर्ववर्णानांयुधिष्ठि
रनिवेशने अष्टाशीतिसहस्राणिशतसाहस्रास्नातकागृहमेधिनः ४६ त्रिंशद्दासीकएकैकोयान्बिभर्तियुधिष्ठिरः
सुप्रीताःपरितुष्टाश्चतेह्याशंसंत्यरिक्षयं ४७ दशान्यानिसहस्राणियतीनामूर्ध्वरेतसां भुंजतेरुक्मपात्रीभिर्यु
धिष्ठिरनिवेशने ४८ अभुक्तंभुक्तवद्वापिसर्वमाकुब्जवामनं अभुंजानायाज्ञसेनीप्रत्यवैक्षद्विशांपते ४९ द्वौ
करौनप्रयच्छेतांकुंतीपुत्रायभारत सांबंधिकेनपांचालाःसख्येनांधकवृष्णयः ५० इतिसभापर्वणिदुर्योधनसं सा० २५
तापे

मीयमाणांखार्यादिनामानेनगण्यमानं आमंअपक्वं ४४ ४५ ४६ ४७ ४८ ४९ ५० अध्यायः ॥

आर्याः क्ष १ ह्रीनिषेवाः लज्जावंतः ह्रीनिषेधा इति पाठे ह्रीरेवाकार्यान्निषेधिका येषां ते २ ५ अनुकर्षरथाधःस्थितदारु अश्वान् शकयान हेमनद्धान्
धनपूर्णान् अनडुहः कर्षस्तुषे चक्रे शकटव्यवहारयोरिति विश्वः ६ ८ उपासंगं निषंगं सुत्सरुं खोमनमुष्टिं असिं खड्गं शैक्यं शिक्यधन्ये पात्रे ९ १४ वाहनं

दुर्योधन उवाच आर्याः क्षत्रियैवै राजानः सत्यसंधा महाव्रताः पर्याप्तविद्या वक्तारो वेदांतावभृथप्लुताः १ धृतिमंतो ह्रीनिषेधा
धर्म्मात्मानो यशस्विनः मूर्द्धाभिषिक्तास्ते चैनं राजानः पर्युपासते २ दक्षिणार्थं समानीता राजभिः कांस्यदोहनाः आरण्या बहु
साहस्रा अपश्यं तत्र तत्र गाः ३ आजह्रुस्तत्र सत्कृत्य स्वयमुद्यम्य भारत अभिषेकार्थमव्यग्रा भांडमुच्चावचं नृपाः ४ वाह्लीको
रथमाहार्षीज्जांबूनदविभूषितं सुदक्षिणस्तं युयुजे श्वेतैः कांबोजजैर्हयैः सुनीथः प्रीतिमांश्चैव ह्यनुकर्षं महाबलः ध्वजं चेदि
पतिश्चैवमाहार्षीत्स्वयमुद्यतं ६ दाक्षिणात्यः सन्नहनं स्रगुष्णीषे च मागधः वसुदानो महेष्वासो गजेंद्रं षष्टिहायनं ७ मत्स्यस्त्वक्षान्
नवावध्नादेकलव्य उपानहौ आवंत्यस्त्वभिषेकार्थमापो बहुविधास्तथा ८ चेकितान उपासंगं धनुः काश्य उपाहरत् असिं रुक्म
त्सरुं शल्यः शैक्यं कांचनभूषणं ९ अभ्यषिंचत्ततो धौम्यो व्यासश्च सुमहातपाः नारदं वै पुरस्कृत्य देवलं चासितं मुनिं १० प्रीति
मंत उपातिष्ठन्नभिषेकं महर्षयः जामदग्न्येन सहितास्तथान्ये वेदपारगाः ११ अभिजग्मुर्महात्मानो मंत्रवद्भूरिदक्षिणं म
हेंद्रमिव देवेंद्रं दिवि सप्तर्षयो यथा १२ अधारयच्छत्रमस्य सात्यकिः सत्यविक्रमः धनंजयश्च व्यजने भीमसे
नश्च पांडवः १३ चामरे चापि शुद्धे द्वे यमौ जगृहतुस्तथा उपागृह्णाद्यमिंद्राय पुराकल्पे प्रजापतिः १४ तमस्मै शंखमा
हार्षीद्वारुणं कलशोदधिः शैक्यं निष्कसहस्रेण सुकृतं विश्वकर्म्मणा १५ तेनाभिषिक्तः कृष्णेन तत्र मे कश्मलोऽभवत् १६

शंखं कलशोदधिः समुद्रः निष्कसमुद्रः निष्कसहस्रेण स्ववर्णेन सुकृतं अलिप्तं शांखं १५ कश्मलो मूर्च्छा १६ ॥ छ ॥ छ ॥ छ ॥

१९ मांचविसंज्ञंदृष्ट्वा २० २४ युगांतापरार्थंअंधेनविधात्रानद्धंसंबद्धंअतएवविपर्यस्तं २५ २६ अध्यायः ४६ १ अनुत्पन्नंपरकप रानभिहतं

गच्छतिपूर्वादपरंसमुद्रंचापिदक्षिणं उत्तरंतुनगच्छंतिविनातातपतत्रिभिः १७ तत्रस्मदध्मुःशतशःशंखान्मंगलकारकान् प्रणा
स० दंतेसमाध्मातास्ततोरोमाणिमेहृषन् १८ प्रापतन्भूमिपालाश्चयेतुहीनास्तेजसा धृष्टद्युम्नःपांडवाश्चसात्यकिःकेशवोष्टमः
८५ १९ सत्वस्थावीर्यसंपन्नाह्यन्योन्यप्रियदर्शनाः विसंज्ञान्भूमिपान्दृष्ट्वामांचतेप्राहसंस्तदा २० ततःप्रहृष्टोबीभत्सुःप्रा
दाद्धेमविषाणिनां शतान्यनडुहांपंचद्विजमुख्येषुभारत २१ नरंतिदेवोनाभागोयौवनाश्वोमनुर्नच नचराजापृथुर्वैन्यो
नचाप्यासीद्भगीरथः २२ ययातिर्नहुषोवापियथाराजायुधिष्ठिरः यथातिमात्रंकौंतेयःश्रिया परमयायुतः
२३ राजसूयमवाप्यैवंहरिश्चंद्रइवप्रभुः एतांदृष्ट्वाश्रियंपार्थेहरिश्चंद्रेयथाविभो २४ कथंतुजीवितंश्रेयोममपश्यसि
भारत अंधेनेवयुगंनद्धंविपर्यस्तंनराधिप २५ कनीयांसोविवर्धंतेज्येष्ठाहीयंतएवच २५ एवंदृष्ट्वानाभिविंदामिशर्मसं
मीक्ष्यमाणोपिकुरुप्रवीर तेनाहमेवंकृशतांगतश्चविवर्णतांचैवसशोकतांच २६ इतिसभापर्वणिदुर्योधनसंतापे ४
धृतराष्ट्रउवाच त्वंज्येष्ठोज्येष्ठतनयःपुत्रमापांडवान्द्विष द्वेष्टाह्यसुखमादत्तेयथैवनिधनंतथा १ अनुत्पन्नंस
मार्थेनोतुल्यमित्रंयुधिष्ठिरं अद्विषंतंकथंद्विष्यात्त्वादृशोभरतर्षभ २ तुल्याभिजनवीर्यश्चकथंभ्रातुःश्रियंनृप पुत्र
कामयसेमोहान्मैवंभूःशाम्यमाशुच ३ अथयज्ञविभूतिंतांकांक्षसेभरतर्षभ ऋत्विजस्तवतन्वंतुसप्ततंतुंमहाध्वरे ४
फ२ स१

समानार्थंतुल्यधनं तुल्यमित्रंतन्मित्राद्रोहिणां अद्विषंतंचत्वामपीतिशेषः २ ३ सप्तगायत्र्यादीनिछंदांसितैस्तंतवद्यस्यसप्ततंतुस्तं ४ म० ८५

१० अंतर्वेद्यामिति ११ अध्यायः पस्य कार्यादिकं कहापोहकौशलं प्रज्ञा १ नविनेरिवेत्यत्रानंतं द्वितीयो विकल्पः २ आहरिष्यंति राजानस्त
थापि विपुलं धनमित्युक्तं तत्राह भविष्यामीति कृत्स्नमिदानीमेवानुच्छेद्यं अर्थघृते न शत्रुश्री हरणरूपं प्रयोजनं तत भविष्यत्काले किं वदसि ३ ननु विदुरो
तेपि ५

आहरिष्यंति राजानस्तथापि विपुलं धनं प्रीत्या च [illegible] बहुमानाच्च रत्नान्याभरणानि च ५ अनार्याचरितं तात परस्वस्पृहणं
भृशं स्वसंतुष्टः स्वधर्मस्थो यः स वै सुखमेधते ६ अव्यापारः परार्थेषु नित्योद्योगः स्वकर्मसु रक्षणं समुपात्तानामेतद्वैभवलक्षणं
७ विपत्तिष्वव्यथो दक्षो नित्यमुत्थानवान्नरः अप्रमत्तो विनीतात्मा नित्यं भद्राणि पश्यति ८ बाहू निवैतान्माछेत्सीः पांडु
पुत्रास्तथैव ते भ्रातॄणां तद्धनार्थं वै मित्रद्रोहं च मा कुरु ९ पांडोः सुतान्मा द्विषस्त्वं राजंस्तथैव ते भ्रातृधनं समग्रं मित्रद्रोहे
तात महानधर्मः महापितामहा ये तवैतेषां १० अंतर्वेद्यां ददद्वित्तं कामाननुभवन्प्रियान् क्रीडन्स्त्रीभिर्निरातंकः प्रशाम्य भ
रतर्षभ ११ इति सभापर्वणि दुर्योधनसंतापे दुर्योधन उवाच यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः न स जानाति
शास्त्रार्थं दर्वी सूपरसानिव १ जानन्वै मोहयसि मां नावि नौरिव संयता स्वार्थे किं नावधानं ते उताहो द्वेक्षि मां भवान्
२ न संतीमे धार्तराष्ट्रा येषां त्वमनुशासिता भविष्यमर्थमाख्यासि सर्वदा कृत्यमात्मनः ३ परनेयोऽग्रणीर्यस्य स मा
र्गान्प्रतिमुह्यति पंथानमनुगच्छेयुः कथं तस्य पदानुगाः ४ राजन्परिणतप्रज्ञो वृद्धसेवी जितेंद्रियः प्रतिपन्नान्स्वका
र्येषु संमोहयसि नो भृशं ५

घृतं न मन्यते इत्याशंक्याह परनेय इति अस्माकमग्रणीस्त्वं विदुर शिक्षयितासि यो मामरिरित्यर्थः ४ जानन्नेवाहं न वक्ष्यामीति चेत्तत्राह राजन्निति मोहमे
व ददासि न तु हितं वदसीत्यर्थः ५

धिष्ठितः ३

प्रशाम्यभरतर्षभेतित्व दुक्तोतिह्यनिरूपोधर्मोबुभूषूणामस्माकंनेषइत्याह लोकेत्याहालोकेत्यादिना ६ ९ १ ननुविप्रियंकर्त्ताशत्रुर्नेवपांडवास्तथासंतीत्याशंका
स० ८६ ह शत्रुरिति १० १३ ब्राह्मणांसत्यासिनं १० १४ साधारणीतुल्याहृत्तिर्जीविकाएकाभिषत्वमित्यर्थः १५ १७ मातेरोविषत्तुच्चिकरीमाभूत सत्ववतांबुद्धिमतां
नयोनीतिःस्थितः अयंनयःधीमद्भिःशिरसावोढव्य इत्यर्थः १८ जन्महाद्धिमिवजन्मप्रभृतिजीवदेहादेर्याहृद्धिःस्याभाविकीतामिवएधनेवर्द्धते सद्योत्र्प्रर्थानांह

८२

लोकहत्ताद्राजहत्तमन्यदाहबृहस्पतिः तस्माद्राज्ञाप्रयत्नेनस्वार्थश्चिंत्यःसदैवहि ६ क्षत्रियस्यमहाराजजयेहत्तिःसमाहिता सवैधर्म
स्त्वधर्म्मोवास्वेहत्तौकापरीक्षणा ७ प्रकालयेद्दिशःसर्वाःप्रतोदेनेवसारथिः प्रत्यमित्रश्रियंदीप्तांजिघृक्षुर्भरतर्षभ ८ प्रछन्नोवाप्रका
शोवायोगोयोरिंप्रवाधते तद्वैशस्त्रंशस्त्रविदांनशस्त्रंछेदनंस्मृतं ९ शत्रुश्चैवहिमित्रंचनलेख्यंनचमातृका योवैसंतापयतितं
सशत्रुःप्रोच्यतेनृप १० असंतोषःश्रियोमूलंतस्मात्तंकामयाम्यहं समुछ्रायेयतमानःसराजन्परमोनयः ११ ममत्वंहिनकर्त्त
व्यमैश्वर्येवाधनेपिवा पूर्वावाप्तंहरंत्यन्येराजधर्महितंविदुः १२ अद्रोहसमयंकृत्वाचिछेदनमुचेःशिरः शक्रःसाभिमतातस्य
रिपोहत्तिःसनातनी १३ द्वावेतौग्रसतेभूमिःसर्पोबिलशयानिव राजानंचाविरोद्धारंब्राह्मणंचाप्रवासिनं १४ नास्तिवैजातितः
शत्रुःपुरुषस्यविशांपते येनसाधारणीहत्तिःसशत्रुर्नेतरोजनः १५ शत्रुपक्षंसमध्यंतयोमोहात्समुपेक्षते व्याधिराप्यायि
तइवतस्यमूलंछिनत्तिसः १६ अल्पोपियोरिरत्यर्थंवर्द्धमानःपराक्रमैः वल्मीकोमूलजइवग्रसतेहक्षमंतिकात् १७ आ
जमीढरिपोर्लक्ष्मीर्मातेरोचिष्टभारत एषभारःसत्ववतांनयःशिरसिधिष्ठितः १८ जन्मबृद्धिमिवार्थानांयोवृद्धिमभिकांक्षते
एधतेज्ञातिषुसवैसद्योवृद्धिर्हिविक्रमः १९ नाप्राप्यपांडवैश्वर्यंसंशयोमेभविष्यति अवाप्स्येवाश्रियंतांहिशेष्येवानिहतो
युधि २० एतादृशस्यकिंमेद्यजीवितेनविशांपते वर्द्धंतेपांडवानित्यंवयंत्वस्थिरबुद्धयः २१ इतिसभापर्वणि १० ॥ छ सभा० ८६

द्धिर्योनसःसद्योवृद्धिःविक्रमान प्राप्येति पांडवैश्वर्यंअप्राप्यअनवाप्य अहत्वेतियावत संशयोवितर्कःनभविष्यति नाभविष्यतावितर्कोमे
वाहअवाप्स्येइति पांडवैश्वर्यदृष्ट्वाइदंहत्तंध्यंवामयामन्तव्यंवेत्येववितर्कोजातइत्यर्थः २० अस्थिराहृद्धिरहितानाहृद्धिः संपत्येषां २१ अध्यायः १०

यांत्वं १ २ ग्लहान्पणान् ३ आस्फुरं अक्षविन्यासपातनादिस्थानं ४ ७ नारभेतेतिपरबुद्धिर्विना शाम्यतीति भावः ८ भयं भयशंकाहेतुं द्यूतादिकं परि
हरन् ९ कल्पःसमर्थः॥ १० विकारं एतर्ताविस्थाच्युतिं अनायसं अलोहजं ११ अनर्थं द्यूतात्मकमनर्थहेतुं संग्रथनं गुंफनं १२ पुराणोनंतोद्विलिं

शकुनिरुवाच यांत्वमेतां श्रियं दृष्ट्वा पांडुपुत्रे युधिष्ठिरे तप्यसे तां हरिष्यामि द्यूतेनजयतां वर १ आहूयतां परं राजन् कुंतीपुत्रो
युधिष्ठिरः आगत्वा संशयमहमयुद्ध्वा च चमूमुखे २ अक्षान्क्षिपन्नक्षतः सन्विद्वानविदुषो जयेत् ग्लहान्धनूंषि मे
विद्धि शरानक्षांश्च भारत ३ अक्षाणां हृदयं मे ज्यां रथं विद्धि ममास्फुरं ४ दुर्योधन उवाच अयमुत्सहते राजन् श्रि
यमाहर्तुमक्षवि[illegible]त् द्यूतेन पांडुपुत्रेभ्यस्तत् तुभ्यं तात मर्हसि ५ धृतराष्ट्र उवाच स्थितोस्मि शासने [illegible] भ्रातुर्वि
दुरस्य महात्मनः तेन संगम्य वेत्स्यामि कार्यस्यास्य विनिश्चयं ६ दुर्योधन उवाच व्यपनेष्यति ते बुद्धिं विदुरो मुक्तसंश
यः पांडवानां हिते युक्तो न तथा मम कौरव ७ नारभेत्परसामर्थ्यात् पुरुषः कार्यमात्मनः मतिसाम्यं द्वयोर्नास्ति कार्येषु
कुरुनंदन ८ भयं परिहरन्मंद आत्मानं परिपालयन् वर्षासु क्लिन्नकटवत्तिष्ठन्नेवावसीदति ९ न व्याधयो नापि
यमः प्राप्तुं श्रेयः प्रतीक्षते यावदेव भवेत्कल्पस्तावच्छ्रेयः समाचरेत् १० धृतराष्ट्र उवाच सर्वथा पुत्र बलिभिर्वि
ग्रहो मे न रोचते वैरं विकारं सृजति तद्धि शस्त्रमनायसं ११ अनर्थमर्थं मन्यसे राजपुत्र संग्रंथनं कलहस्याति पा
ति तद्वै प्रवृत्तं तु यथा कथंचित् सृजेदसीन्निशितान्सायकांश्च १२ द्यूते पुराणैर्व्यवहारः प्रणीतस्तत्रात्ययो नास्ति न
संप्रहारः तद्रोचतां शकुनेर्वाक्यमद्य सभां क्षिप्रं त्वमिहाज्ञापयस्व १३ स्वर्गद्वारं दीव्यतां नो विशिष्टं तद्वर्तिनां चापि
तथैव युक्तं भवेदेवं ह्यात्मना तुल्यमेव दुरोदरं पांडवैस्त्वं कुरुष्व १४
व्यवहारः प्रवृत्तिः प्रणीतः अनुष्ठितः अत्ययो नाशः संप्रहारो युद्धं १३ स्वर्गद्वारं स्वर्गद्वारं शत्रूणामभिभवः धनलाभश्चेत्युभयं तेन वसोनवधनेन यद्वा दिद्वारा

प२

उपाक्रम्य संस्मृत्य माविमवि तं ऐश्वर्यं कर्तुंशीलमस्येति मा विनं श्रेयस्करमित्यर्थः १५ इयं ज्ञातं बुद्धिविघातयोगेन बुद्धिः ऊहापोहकौशलं विघा
शास्त्राध्ययनं देवमहानं वा १६ परमं प्रतीतादधिकं दुस्तरं यत्नशतेनाप्यपरिहार्यं १७ क्रोशमात्रं आयतां दीर्घां क्रोशमात्रायतां स्फाटिकामिति शेष

स० ८७

धृतराष्ट्र उवाच वाक्यं न मे रोचते पक्षयोक्तं पुत्रेप्रियं तत्क्रियतां नरेन्द्र पश्चात्तत्त्पस्यसे तदुपक्रम्य वाक्यं न हीदृशं भाविवचो हि धर्म्यं
१५ इयं ह्येतद्विदुरे गौवसर्वाविपश्चितां बुद्धिविघातयोगेन तदेवैतद्वशमभ्युपैति महद्भयं क्षत्रियजीवघाति १६ वैशंपाय
न उवाच एवमुक्त्वा धृतराष्ट्रो मनीषी दैवं मत्वा परमं दुस्तरं च शशासोच्चैः पुरुषान्पुत्रवाक्ये स्थितो सौ राजा दैवसंमूढचेताः
१७ सहस्रस्तंभां हेमवैदूर्यचित्रां शतद्वारां तोरणस्फाटिकाख्यां सभामग्र्यां क्रोशमात्रायतां मे तद्विस्तारामाशु कुर्वन्तु युक्ताः
१८ श्रुत्वा तस्य त्वरिता निर्विशंकाः प्राज्ञा दक्षास्तां तदा चक्रुराशु सर्वद्रव्याण्युपजह्रुः सभायां सहस्रशः शिल्पिनश्चैव युक्ताः
१९ कालेनाल्पेनाथ निष्ठां गतां तां सभां रम्यां बहुरत्नां विचित्रां चित्रैर्हैमैरासनैरभ्युपेतामाचख्युस्ते तस्य राज्ञः प्रतीताः
२० ततो विद्वान्विदुरं मंत्रिमुख्यमुवाचेदं धृतराष्ट्रो नरेन्द्रः युधिष्ठिरं राजपुत्रं च गत्वा मद्वाक्येन क्षिप्रमिहानयस्व २१
सभेयं मे बहुरत्ना विचित्रा शय्यासनैरुपपन्ना महार्हैः सा दृश्यतां भ्रातृभिः सार्द्धमेत्य सुहृद्द्यूतं वर्ततामत्र चेति २२
इति सभापर्वणि द्यूते

एम० ८७

तद्विकारां क्रोशमात्रविस्तारां युक्ताः सन्नद्धाः १८ निष्ठां निष्पन्नत्वं हैमैरास्तरैरितिपाठे स्तनिर्मितैः कशिपुभिः १९ २० २१ २२ अध्यायः ९२

२ प्रैषंआज्ञावचनं द्यूतकृतेद्यूतनिमित्तं ३ दिष्टस्यदैवस्यवशेधात्राख्यापवित्राऽस्मिंतपीमिणप्रयोजकेनइदंजगच्चेष्टति तथाचश्रुतिःएषह्येवासा
धुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषउएवासाधुकर्मकारयतितंयमधोनिनीषतइतिपूर्वकर्मापेक्षईशएवसतिअसतिवामार्गेप्रवर्त्तयतीतिश्रुते

वैशंपायनउवाच मतमाज्ञायपुत्रस्यधृतराष्ट्रोनराधिपः मत्वाचदुस्तरंदैवमेतद्राजंश्चकारह १ अन्यायेनतथोक्तस्तुवि
दुरोविदुषांवरः नाभ्यनंदद्वचोभ्रातुर्वचनंचेदमब्रवीत् २ विदुरउवाच नाभिनंदेनृपतेप्रैषमेतं मैवंकृथाःकुलनाशाद्बि
भेमि पुत्रैर्भिन्नैःकलहस्तेध्रुवंस्यादेतच्छंकेद्यूतकृतेनरेंद्र ३ धृतराष्ट्रउवाच नेहक्षत्तःकलहस्तप्स्यतेमांनचेद्दैवंप्रति
लोमंभविष्यत् धात्रातुदिष्टस्यवशेकिलेदंसर्वंजगच्चेष्टतिनस्वतंत्रं ४ तदद्यविदुरप्राप्यराजानंममशासनात् क्षिप्रमा
नयदुर्धर्षंकुंतीपुत्रंयुधिष्ठिरं ५ इतिसभापर्वणिद्यूते वैशंपायनउवाच ततःप्रायाद्विदुरोऽश्वैरुदारैर्महाजवैर्बलिभिःसा
धुदांतैः बलान्नियुक्तोधृतराष्ट्रेणराज्ञामनीषिणांपांडवानांसकाशं १ सोऽभिपत्यतदध्वानमासाद्यनृपतेःपुरं प्रविवेश
महाबुद्धिःपूज्यमानोद्विजातिभिः २ सराजगृहमासाद्यकुबेरभवनोपमं अभ्यागच्छतधर्मात्माधर्मपुत्रंयुधिष्ठिरं ३
तंवैराजासत्यधृतिर्महात्माअजातशत्रुर्विदुरंयथावत् पूजापूर्वंप्रतिगृह्याजमीढस्ततोऽपृच्छद्धृतराष्ट्रंसपुत्रं ४ युधिष्ठि
रउवाच विज्ञायतेतेमनसोऽप्रहर्षःकच्चित्क्षत्तःकुशलेनागतोऽसि कच्चित्पुत्राःस्थविरस्यानुलोमावशानुगाश्चापिविशो
थकच्चित् ५

र्थः तिष्ठतीतिपाठेकार्यंअनुतिष्ठतीत्यर्थः ४ ५ अध्यायः ततः तत्पुरमितिसंबंधः १ द्विजातिभिस्त्रैवर्णिकैः २ ३ तंप्रतिधृतराष्ट्रंअपृच्छत ४
कुशलेनअस्मत्कुशलहेतोः ५

स० ५८

अ २

आत्मरतिः स्वस्योत्कर्ष एव रतिर्यस्य न तु धर्ममत्वीकृते । इति भावः दृढात्मेति पाठे कठिनचित्तः ६ अव्ययं धनादेशविनाशं ७ रम्यतां क्रीडा क्रियतां ८ दुरोदराः द्यूत
काराः कितवान् धूर्तान् कपटिन इति यावत् स्पागतः इति हेतोः जुषस्व रोचय ९ बुध्यमानः अस्मे जायां परिभिशं तपस्यपस्या गधछेदनेवाज्य १० रुः पिता माता

विदुर उवाच राजा महात्मा कुशली सपुत्र आस्ते व्हतो ज्ञातिभिरिंद्रकल्पः प्रीतो राजन् पुत्रगणैर्विनीतो विशोक एवात्मरतिर्दृ
ढात्मा ६ इदं तु त्वां कुरुराजोऽभ्युवाच पूर्वं पृष्ट्वा कुशलं चाव्ययं च इयं सभा त्वत्सभातुल्यरूपा भ्रातॄणां ते पश्य तामेत्य पुत्र ७
समागम्य भ्रातृभिः पार्थ तस्यां सुहृद्द्यूतं क्रियतां रम्यतां च प्रीयामहे भवतां संगमेन समागताः कुरवश्चापि सर्वे ८ दुरोदरा वि
हिता ये तु तत्र महात्मना धृतराष्ट्रेण राज्ञा तान् द्रक्ष्यसे कितवान् संनिविष्टानित्यागतोऽहं नृपते तज्जुषस्व ९ युधिष्ठिर उवाच
द्यूते क्षत्तः कलहो विद्यते नः को वै द्यूतं रोचते बुध्यमानः किं भवान्मन्यसे युक्तरूपं भवद्वाक्ये सर्व एव स्थिताः स्म १० ॥ ७ ॥

भ्रातरः एनमाऊर्नेजानीमो न यता वह्नमेत मितिश्रुत्युक्तान् द्यूतदोषान् जानन् अक्षैः पाशो यस्य वैदनेतु द्यौ अगधतगां ईल्हतवान्वाजी वेगावान् अक्षैर्दीव्येरतिय एम०
स्यबुद्धिः रुत्यन्त्रासस घए वपराभ्यतः इत्यर्थः तथापि आज्ञागुरूणां स्वविचारणीयेति न्यायेन न तत्त्वदुक्तमवश्यमनुतिष्ठे यमित्याहः किंवेति सर्वैवयंपांडवाः १० ५८

द्यूते कृते इहलोकहानिः गुर्वाज्ञोल्लंघने परलोकहानिः अतः श्रेयः आमुष्मिकं हितं गुर्वाज्ञापालनप्रशस्ततरं इत्यर्थः ११ शतशः शतेन धनेन असंख्या
तेनेत्यर्थः संनिपत्य संगम्य १२ अति अनतिक्रम्य मर्यादां देवितुं शीलमस्य सः अतिदेवी पुष्कदेहगाद्यादिक्रममपि पणीकरिष्यतीत्यर्थः कृतहस्तः पथ्ये अक्ष
पातने कुशलः यतो मताक्षः ज्ञाताक्षतत्वः पक्षे अतिदेवी कृतहस्तः इत्येवं पदद्वेवी राज्ञी द्रौपदी तस्यां कृतो व्यापारितो हस्तो येन तेन तद्‌इति लाघवं तः दुर्योधनाद्याः ना

विदुर उवाच जानाम्यहं द्यूतमनर्थमूलं कृतश्च यत्नोस्य मया निवारणे राजा च मां प्राहिणोत्त्वत्सकाशं श्रुत्वा विद्वन् श्रेय इहाचर
स्व ११ युधिष्ठिर उवाच केतत्रान्ये कितवा दीव्यमाना विना राज्ञो धृतराष्ट्रस्य पुत्रैः पृच्छामि त्वां विदुर ब्रूहि नस्तान् येर्दीव्यामः शतशः
सन्निपत्य १२ विदुर उवाच गांधारराजः शकुनिर्विशांपते राजातिदेवी कृतहस्तो मताक्षः विविंशतिश्चित्रसेनश्च राजा सत्यव्रतः पु
रुमित्रो जयश्च १३ युधिष्ठिर उवाच महाभयाः कितवाः सन्निविष्टा मायोपधा देवितारोत्र संति धात्रा तु दिष्टस्य वशे किलेदं
सर्वं जगत्तिष्ठति न स्वतंत्रं १४ नाहं राज्ञो धृतराष्ट्रस्य शासनान्न गंतुमिच्छामि कवे दुरोदरं इष्टो हि पुत्रस्य पिता सदैव तदस्मि कर्त्ता वि
दुर यथा मां यथा १५ न चाकामः शकुनिना देविताहं न चेन्मां जिष्णुराह्वयिता सभायां आहूतोहं न निवर्त्ते कदाचित्तदाहितं शाश्व
तं वै व्रतं मे १६

तप्यतिक्रांतः अतिदेवी कृतहस्तः ते द्रौपदीं हर्त्तुमिवेच्छंति अपंडघूतेन हरिष्यतीत्यर्थः १३ महाभयाः महद्भयं येभ्यस्ते मायोपधाः कपटपुरस्कारशीलाः
१४ दुरोदरं द्यूतं दुरोदरो द्यूतकारे पणे द्यूते दुरोदरमिति विश्वः १५ न निवर्त्ते निकृत्तं मां परे कृपणोपमिति वदंतीति भावः १६ श्रीकृष्णाय नमः ॥

प्रायात्रिकं प्रस्थानसाधनरथादिसहितायां प्रयात्रायां तत्संबंध्युपयुक्तं सर्वं प्रायात्रिकं शकटवाह्यादि सगणः भ्रात्रादिगणयुक्तः सानुयात्रः सर्वसेवकयुक्तः आदि
अस्त्रीशीलमस्यतत आदिकृतां तमुखं कृत्वा विधाय १७ न तु जानंतोपि कुलक्षयावहार्थं द्यूताय कुतो निर्गता इत्यत आह दैवमिति दैवं प्राक्तनं कर्म धातुः तदनु पदे

स० ८९

वैशंपायन उवाच एवमुक्त्वा विदुरं धर्मराजः प्रायात्रिकं सर्वमाज्ञाप्य तूर्णं प्रायाच्छ्वोभूते सगणः सानुयात्रः सह स्त्रीभिर्द्रौपदीमादिकृ
त्वा १७ दैवं हि प्रज्ञां मुष्णाति चक्षुस्तेज इवापतत् धातुश्च वशमन्वेति पाशैरिव नरः सितः १८ इत्युक्त्वा प्रययौ राजा सह क्षत्त्रा युधिष्ठिरः
अमृष्यमाणस्तस्याथ समाह्वानमरिंदमः १९ बाह्लीकेन रथं यत्तमास्थाय परवीरहा परिच्छन्नो ययौ पार्थो भ्रातृभिः सह पांडव २०
राजश्रिया दीप्यमानो ययौ ब्रह्मपुरःसरः धृतराष्ट्रेण चाहूतः कालेन समयेन च २१ स हास्तिनपुरं गत्वा धृतराष्ट्रगृहं ययौ समि
याय च धर्मात्मा धृतराष्ट्रेण पांडवः २२ तथा भीष्मेण द्रोणेन कर्णेन च कृपेण च समियाय यथान्यायं द्रौणिना च विभुः सह
२३ समेत्य च महाबाहुः सोमदत्तेन चैव ह दुर्योधनेन शल्येन सौबलेन च वीर्यवान् २४ ये चान्ये तत्र राजानः पूर्वमेव समागताः
दुःशासनेन वीरेण सर्वैर्भ्रातृभिरेव च २५ जयद्रथेन च तथा कुरुभिश्चापि सर्वशः ततः सर्वैर्महाबाहुर्भ्रातृभिः परिवारितः २६
प्रविवेश गृहं राज्ञो धृतराष्ट्रस्य धीमतः ददर्श तत्र गांधारीं देवीं पतिमनुव्रतां २६ स्नुषाभिः संवृतां शश्वत्ताराभिरिव रोहि
णीं अभिवाद्य स गांधारीं तया च प्रतिनंदितः ददर्श पितरं वृद्धं प्रज्ञाचक्षुषमीश्वरं २९ ॥ ७ ॥ ७ ॥ ८५

रोधेन प्रवर्तिपितुः सितः बद्धः १८ क्षत्त्रा विदुरेण १९ परिच्छन्नः परिवृतः भ्रातृभिः तैः सह परिच्छिन्न इति पाठे अन्यपरिवारः २० ब्रह्मपुरः ब्राह्म भा० ८९
णपुरःसरः कालस्य समयेन संकेतेन अमुकस्मिन्दिने आगंतव्यमित्येवंरूपेण २१ समियाय धृतराष्ट्रेण सह संगतः तेन परिष्वक्त इत्यर्थः २२ २८ ददर्श
पितरं धृतराष्ट्रं प्रति पुनरागत इत्यर्थः २९

एवमन्येपिचक्रुरित्याहराह्नेति राज्ञाधृतराष्ट्रेण ३० ३२ प्रमनसः संजातचित्ताः ३३ संविदंमिथःकथां व्यायामःश्रमःपूर्वोयेषां तानिप्रतिकर्मकेशप्रसाधनादि

राज्ञामर्ध्यस्नुषाघ्राताश्ते च कौरवनंदनाः चत्वारःपांडवाः राजन्भीमसेनपुरोगमाः ३० ततोहर्षःसमभवत्कौरवाणांविशांपते तान्दृष्ट्वापुरुषव्याघ्रान्पांडवांश्रियदर्शनात् ३१ विविशुस्तेभ्यनुज्ञातारत्नवंतिगृहाणिच ददृशुश्चोपयातांस्तान्द्रौपदीप्रमुखाःस्त्रियः ३२ याज्ञसेन्याःपरामृद्धिंदृष्ट्वाप्रज्वलितामिव स्नुषास्ताधृतराष्ट्रस्यनातिप्रमनसोभवन् ३३ ततस्तेपुरुषव्याघ्रागत्वास्त्रीभिस्तुसंविदं कृत्वाव्यायामपूर्वाणिकृत्वानिप्रतिकर्मच ३४ ततःकृताह्निकाःसर्वेदिव्यचंदनभूषिताः कल्याणमनसश्चैवब्राह्मणान्स्वस्तिवाच्यच मनोज्ञमशनंभुक्त्वाविविशुःशरणान्यथ ३५ उपगीयमानानारीभिरस्वपन्कुरुपुंगवाः अनंतरंचतत्प्राप्यप्रीत्याःपरपुरंजयाः ३६ जगामतेषांसारात्रिःपुण्यारतिविहारिणां स्तूयमानाश्चविश्रांताःकालेनिद्रामथात्यजन् ३७ सुखोषितास्तेरजनींप्रातःसर्वेकृताह्निकाः सभांरम्यांप्रविविशुःकितवैरभिनंदिताः ३८ इतिसभापर्वणिद्यूते

परिष्कारं ३४ ३५ रतिविहारिणांस्त्रीसंगेनक्रीडतां ३७ ३८ सभायांद्यूतेऽध्यायः ॥ ७ ॥ ७ ॥ ७ ॥ः॥ ७ ॥

स॰ ५९ प्रविश्य १ संमेयानां यथार्हं आशीर्नत्यादिना संगतिं कुर्वाणाः स्पर्द्धानि स्पर्द्धाकराणि पणानां स्पृहणीयानीति यावत् २ ३ उपस्तीर्णा आस्फुरणे नाक्षपातनवासमा उपरिस्तीर्णा कृतरक्षणाः कृतसंकेताः उप्यापातयित्वा ४ निकृतिः वंचनं देवनं द्यूतं पापं पापहेतुः अपतो न च नीतिः द्यूते सत्यं नास्तीत्यर्थः ५ निकृतौ शाठ्ये एवं शाठ्येन संख्यां सम्यक् कृत्वा न जयपराजयव्यवहारविवेकं ६ निकृतौ छले परेण क्रियमाणे विधिज्ञः द्यूतेतिकर्तव्यताभिज्ञः यश्च महामतिः जया

वैशंपायन उवाच प्रविश्य तां सभां पार्था युधिष्ठिरपुरोगमाः समेत्य पार्थिवान्सर्वान्पूजार्हानभिपूज्य च १ यथावयः समेयाना उपविष्टा यथार्हतः आसनेषु विचित्रेषु स्पर्द्ध्यास्तरणवत्सु च २ तेषु तत्रोपविष्टेषु सर्वेष्वथ नृपेषु च शकुनिः सौबलस्तत्र युधिष्ठिरमभाषत ३ शकुनिरुवाच उपास्तीर्णा सभा राजन्सर्वे त्वयि कृतक्षणाः अक्षानुप्त्वा देवनस्य समयोस्तु युधिष्ठिर ४ युधिष्ठिर उवाच निकृतिर्देवनं पापं न क्षात्रोत्र पराक्रमः न च नीतिर्ध्रुवा राजन्किं त्वं द्यूतं प्रशंससि ५ नहि मानं प्रशंसंति निकृतौ कितवस्य हि शकुने मैव नो जैषीरमार्गेणान्नृशंसवत् ६ शकुनिरुवाच यो वेत्ति संख्यां निकृतौ विधिज्ञश्चेष्टास्वखिन्नः कितवोक्षजासु महामतिर्यश्च जानाति द्यूतं स वै सर्वं सहते प्रक्रियासु ७ अक्षग्लहः सोभिभवेत्परं नस्तेनैव दोषो भवतीह पार्थ दीव्यामहे पार्थिव मा विशंकां कुरुष्व पाणं च चिरं च मा कृथाः ८ ॥ ५९ ॥ ५९ ॥ ५९ ॥

व१ सर्वे२

वहं परांस्कृत्वा पराजयावहं चिकित्सति यः द्यूतं जानाति स च प्रक्रियासु द्यूतक्रियासु सर्वं कर्तुं सहते ७ यत्तु देवनं पापमित्युक्तं तत्राह अक्षग्लह इति पाशाधीनो ग्लहः पणो जयपराजयरूपो व्यवहारः सः प्रतिकूलश्चेत् नः युष्माकं अस्माकं च दीव्यतां मध्ये परं अभिभवेत् तेनैव अक्षग्लहेनैव दोषः पराभवाख्यो भवति न तत्र लेश्यापाकपटं कर्तुं शक्यं दैवाधीनत्वादक्षपातस्येत्यर्थः पाणं पणानीयं द्रव्यं च कुरुष्व वचनेन प्रत्यक्षेण वा पणः क्रियतामित्यर्थः ८ ॥ ५९ ॥ ५९ ॥ सभा॰ ५९

अयंअसितःयःलोकद्वाराणिस्वर्गापवर्गप्रापकाणिकर्महानादीनिप्राप्यतितेषुसंचरतिसोऽयंएवमाहेतिसंबंधः ९ द्विविधंदेवनं अदैन्यं तत्राद्यंनिंदित्वा
ऽपरंप्रशंसतिइदंवाऽइति १० म्लेच्छंतिअपशब्दंकुर्वंतिभाषाभिःगीर्भिः माययाकपटेननचरंतिनकर्मकुर्वन्तिवाचादेहेनचकौटिल्यंनकुर्वंतीतिभावः। अतएव
वजिह्मंअकुटिलंअशंकंछलपुरुषहीनं ११ ब्राह्मणार्थायब्राह्मणप्रयोजनाय शिक्षितुंविद्यामुपादातुंयतामहेयेनवित्तेन [illegible] तद्वित्तंअपहर्तुंमाति

युधिष्ठिरउवाच एवमाख्यायमसितोदेवलोमुनिसत्तमः इमानिलोकद्वाराणियोवैसंचरतेसदा ९ इदंवैदेवनंपापंनिकृ
त्याकितवैःसहधर्मेणतुजयोयुद्धेतत्परंनतुदेवनं १० नार्याम्लेच्छंतिभाषाभिर्माययानचरंत्युत अजिह्ममशठंयुद्धमे
तत्सत्पुरुषव्रतं ११ वयंतुशक्तितोविप्रान्रक्षितुंप्रयतामहे तद्वित्तंमातिदेवीर्मांजेषीःशकुनेपरान् १२ निकृत्याकाम
येनाहंसुखान्युतधनानिवा कितवस्याप्यनिकृतेर्वृत्तमेतन्नशस्यते १३ शकुनिरुवाच श्रोत्रियःश्रोत्रियमुतनिकृत्यैव
युधिष्ठिर विद्वानविदुषोऽभ्येतिनाहुस्तांनिकृतिंजनाः १४

देवीःसर्वस्वस्यपणीकरणेनअतिघूतंमाकृथाः १२ नन्वद्यपातावधीनोजयस्तवापिसमानइत्याशंक्याहनिकृत्येति निकृत्यानीचकर्म्मणा इहकितवस्यएतद्वृ
त्तं वृत्तिर्नःनपूज्यते।सतांनप्रशस्यमित्यर्थः।निकृत्याजीगीषायोग्येननीचकर्मणा वहुनिमेअकृताकर्त्रीनियुद्धेत्वेनसंत्वेनप्रच्छेइतिमंत्रवर्णात्युद्धेनवादे
नवाजिगीषानीचमेवकर्मतथापिजनाःव्यावहारिकाःलोकास्तांजिगीषयाशत्रुंप्रतिगतिनिकृतिंनीचकर्मत्वेननाहुः।श्रुतेर्विरक्तविषयत्वादित्यर्थः अकृता
कर्तुमयोग्यानिकर्त्राणिकर्तव्यानिभविष्यंति तान्येवाकर्तृत्वेनएकेनयुद्धेत्वेनसंप्रच्छेइतिश्रुत्यर्थः १३ १४ ॥ ७ ॥ ७ ॥ ७ ॥

स० ८१

दार्घ्यातिकस्मात्कस्मात्अक्षैरिति १६ एवंतं निकृतिंछलं मन्यसेतर्हि श्रोत्रियोश्रोत्रियंइव विद्यावतोमन्त्रोपराभवभीतस्त्वंद्यू ताद्विनिवर्त्तस्वेत्यर्थः १७ विधि :कारएपितां ऽतपमि दिष्टेदैवं १८ प्रतिपणाश्चकोन्योस्ति प्रतिपणाःपणप्रतिभूःतवात्यधनत्वात्मनुष्योधनिकःकोन्योदेवितास्तीतिभावः परास्त्रैवहि

अक्षैर्हिशिक्षितोभ्येतिनिकृत्यैवयुधिष्ठिरः विद्वानविदुषोभ्येतिनाहुस्तांनिकृतिंजनाः १५ अकृतास्त्रंकृतास्त्रश्चदुर्बलंबलव
त्तरः एवंकर्मसुसर्वेषुनिकृत्यैवयुधिष्ठिर १६ एवंत्वंमामिहाभ्येत्यनिकृतिंयदिमन्यसे देवनाद्विनिवर्तस्वयदितेविद्यतेभयम्
१७ युधिष्ठिरउवाच आहूतोननिवर्त्तेयमितिमेव्रतमाहितम् विधिश्चबलवान्राजन्दिष्टस्यास्मिवशेस्थितः १८ अस्मि
न्समागमेकेनदेवनंमेभविष्यति प्रतिपाणश्चकोन्योस्तिततोद्यूतंप्रवर्त्ततां १९ दुर्योधनउवाच अहंदातास्मिरत्नानांध
नानांचविशांपते मदर्थेदेविताचायंशकुनिर्मातुलोमम २० युधिष्ठिरउवाच अन्येनान्यस्यवैद्यूतंविषमंप्रतिभातिमे
एतद्विद्वन्नुपादत्स्वकाममेवंप्रवर्त्ततां २१

पम० ८१

कोन्यस्तइतिपाठेप्रपणाःपणानकर्ताकोन्यस्त्वत्पामत्युमुखेइतिशेषः नवमपासदेविदुमनर्हत्वादितिभावः १९ २० २१ ॥छ॥ छ ॥ छ ॥

उपोह्यमाने उपस्थाप्यमाने १ ६ प्रतिपाणः एतत्तुल्यमौल्यं द्यूतार्थं स्थापितं वस्तु ७ दुरोदरं पणं मत्सरः अर्थेषु तव पणस्थापितेषु हीनमौल्यत्वादिदोष

वैशंपायन उवाच उपोह्यमाने द्यूते तु राजानः सर्व एव ते धृतराष्ट्रं पुरस्कृत्य विविशुस्तां सभां ततः १ भीष्मो द्रोणः कृप
श्चैव विदुरश्च महामतिः नातिप्रीतेन मनसा तेन्ववर्त्तत भारत २ ते द्वंद्वशः पृथक् चैव सिंहग्रीवा महौजसः सिंहासना
नि भूरीणि विचित्राणि च भेजिरे ३ शुशुभे सा सभा राजन् राजभिस्तैः समागतैः देवैरिव महाभागैः समवेतैस्त्रिविष्टपं ४
सर्वे वेदविदः शूराः सर्वे भास्वरमूर्त्तयः प्रावर्त्तत महाराज सुहृद्द्यूतमनंतरं ५ युधिष्ठिर उवाच अयं बहुधनो राजन् साग
रावर्त्तसंभवः मणिर्हारोत्तरः श्रीमान् कनकोत्तमभूषणः ६ एतद्राजन्मम धनं प्रतिपाणोस्ति कस्तव येन मां त्वं महारा
ज धनेन प्रतिदीव्यसे ७ दुर्योधन उवाच संति मे मणयश्चैव धनानि सुबहूनि च मत्सरश्च न मेर्थेषु जयस्वैनं दुरोदरं ८ वैशंपा
यन उवाच ततो जग्राह शकुनिस्तानक्षानक्षतत्ववित् जितमित्येव शकुनिर्युधिष्ठिरमभाषत ९ इति सभापर्वणि द्यूते यु
धिष्ठिर उवाच मत्तः कैतवकेनैव यज्जितोस्मि दुरोदरे शकुने हंत दीव्यामो ग्लहमानाः परस्परं १० ॥ छ ॥ छ ॥

युद्धिः ८ ९ अध्यायः मत्तः कैतवकेन कितवेषु विदितेन कपटेन अरीहणादित्वात्कुन् मत्तः गर्वितः १ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥

साष्टपलशतं सुवर्णानां निष्कः भांडिनो मंजूषाः कुंडिनामिति पाठे कुंडिनः पात्रविशेषाः परिताः हिरण्यं धनं जातरूपं अकुप्यं सुवर्णरौप्यात्म २ ३ सहस्रसमि
तः सहस्रसंख्यतुल्यः वैयाघ्रः व्याघ्रचर्मावनद्धः सुचक्रोपस्कर इति पाठे स्वस्य चक्रं समुदायः तत्र उपस्कर उल्लासादिना शत्रुप्रतिकारे यत्नो येन सः किंकिणीनां क्षुद्रघंटि

स॰ ६२

संति निष्कसहस्रस्य कुंडिन्यो भरिताः शुभाः कोषो हिरण्यमक्षय्यं जातरूपमनेकशः २ एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया वै
शंपायन उवाच कौरवाणां कुलकरं ज्येष्ठं पांडवमच्युत इत्युक्तः शकुनिः प्राह जितमित्येव तं नृपं ३ युधिष्ठिर उवाच अयं सह
स्रसमितो वैयाघ्रः सुप्रतिष्ठितः सुचक्रोपस्करः श्रीमान किंकिणीजालमंडितः ४ संह्रादनो राजरथो य इहास्मानुपावहत
जैत्रो रथवरः पुण्यो मेघसागरनिःस्वनः ५ अष्टौ यं कुमुदच्छायाः सदश्वा राष्ट्रसंमताः वहंति येन दिश्यंते सदृशां तः चरणो
र्मही एतद्राजन्धनं मह्यं तेन दीव्याम्यहं त्वया ६ वैशंपायन उवाच एवं श्रुत्वा व्यवसितो निकृतिं समुपाश्रितः जितमित्ये
व शकुनिर्युधिष्ठिरमभाषत ७

कानां जालेन संवृतः ४ उपावहत आनीतवान ५ कुररः पक्षिविशेषः तेन तुल्यप्रभाः कुररच्छायाः कुररच्छायाः कुमुदच्छाया इति पाठांतरं एषां पदात
भूमौ न्यस्तात भूमिमुपस्पृशन भूचरः न मुच्येत अतिदूरस्थोपि भूचरः एषां पादाक्रांत एव भवतीत्यर्थः येन मुच्यंते पदा भूमिमुपस्पृशमिति पाठे उपस्पृ
शन्निति एकत्वमार्षं भूचराः येन मुच्यंते अतिक्रम्यंते इत्यर्थः ६ ७

हेमभद्रिकाः हेममयाः भद्रिकाः मांगलिकालंकाराः मंगलसूत्रादयो यासां ताः कंबवः शंखवलयानि निष्को वक्षोभूषणं ८ चतुष्षष्टिषु कलासु विशारदा
कलानां मानितु श्रीमद्भागवतदशमस्कंधटीकायां श्रीधरस्वामिभिर्दर्शितानि ९ स्नातकादीनां अनुसेवां पादप्रक्षालनादिरूपां सेवामनुपश्चात् चरंति प
रिचरंति सामगीतिः प्रीत्युत्पादनं वा १० ११ प्रावारवसनाः पट्टांवराच्छादनाः [illegible] १२ १४ नागाः गजाः हेमकक्षाः गजरज्जवः कृतापीडाः

युधिष्ठिर उवाच शतं दासीसहस्राणि तरुण्यो हेमभद्रिकाः कंबुकेयूरधारिण्यो निष्ककंठ्यः स्वलंकृताः ८ महार्हमाल्या
भरणाः सुवस्त्राश्चंदनोक्षिताः मणीन्हेम च बिभ्रत्यः सर्वा वै सूक्ष्मवाससः अनुसेवां चरंतीमाः कुशला नृत्तसामसु स्नातका
नाममात्यानां राज्ञां च मम शासनात् एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया १० वैशंपायन उवाच एतच्छ्रुत्वा व्यवसितो
निकृतिं समुपाश्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत ११ युधिष्ठिर उवाच एतावंति च दासानां सहस्राण्युत संति
मे प्रदक्षिणानुलोमाश्च प्रावारवसनाः सदा १२ प्राज्ञा मेधाविनो दांता युवानो मृष्टकुंडलाः पात्रीहस्ता दिवारात्रमतिथी
न्भोजयंत्युत १३ एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया वैशंपायन उवाच एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः
जितमित्येव शकुनिर्युधिष्ठिरमभाषत १४ युधिष्ठिर उवाच सहस्रसंख्या नागा मे मत्तास्तिष्ठंति सौबल हेमकक्षाः कृतापी
नो यमौ चोभौ भृशं कौतूहलान्विताः १० तस्मिन्नुपरते शब्दे भीमसेनोऽब्रवीदिदं प्रगृह्य रुचिरं दिव्यं भुजं चंदनचर्चितं ११ भीमसेन उवा
च यद्येष गुरुरस्माकं धर्मराजो महामनाः न प्रभुः स्यात्कुलस्यास्य न वयं मर्षयेमहि १२ ईशो नः पुण्यतपसां प्राणानामपि
चेश्वरः मन्यते जितमात्मानं यद्येष विजिता वयं १३

ष्यतीति तेन च सर्वेषामस्माकं दुःखं भविष्यतीत्यभिप्रायः ७ ८ साचि तिर्यक् ९ ११ यद्ययं नः कुलस्य प्रभुर्न स्यात्तर्हि न मर्षयेमहि यतो यं प्रभुस्ततो मर्षयामहे इत्य
र्थः १२ ईश इति अजित मिति छेदः द्रौपदीपणात्प्रागिति शेषः यद्ययमात्मानमपराजितं मन्यते तर्हि वयं पूर्वमेव भवद्भिर्जिताः संतः इदानीं विजितान्द्रौपद्यर्थे
मिथ्यावादेन सुतरां जिताः स्म इत्यर्थः अतो द्रौपदी न दासभावमापन्नेति भावः १३ ६१

नत्वजिते नापित्वयाकिंस्यात्तत्राहनहीत्यादि २४ २५ पाशसितःपाशबद्धः २६ तलासि भिन्नपेरावद्धैः २७ २८ ॥ अध्यायः त्रयःकिलेमेसधनाःसमायांभी
ष्मःक्षत्ताकौरवाणांगुरुश्च येत्वामित्रंदुष्टतमंवदंतिवांछंतिसद्धिंनचविद्विपंतीति श्लोकःप्रथमःत्रयःकिलेमेअधनाइतिद्वितीयः सधनाःसमर्थाःधर्म्मोल्लोघिनेइ
त्यर्थः वृद्धिस्वामिनःमूलच्छेदं नचविद्विपंति पापकरणेव्याकुलाश्चनभवंति १ दासस्यपत्नीहीनेश्वरीदासधनंचसर्वंहीनेश्वरंसतभद्रेकल्याणभाजितयो

स० १०९

नहिमुच्येतमेजीवनपदामहिमुपस्यशत मन्त्रंधर्म्मोपरामष्यपांचाल्यमुर्द्धजानिमान २४ यस्यपक्षेघ्यापतोत्तत्तौमुजौमेपरिघाउव
नैतयोरंतरंप्राप्यमुच्येतापिशतक्रतुः २५ धर्म्मपाशसितस्त्वेवंनाधिगच्छामिसंकटं गौरवेणनिरुद्धश्चनिग्रहात्दर्ज्जुनस्यच २६ ४
मेराजनिसघस्तसिंहःक्षुद्रमृगानिव धार्तराष्ट्राणिमान्यायान्निष्पिषेपंतलातिभिः २७ वैशंपायनउवाच तमुवाचतदाभीष्मोद्रो
णोविदुरएवच क्षम्यतामिदमित्येवंसर्वसंभाव्यतेत्वयि २८ इतिसभापर्वणिघृते कर्णउवाच त्रयःकिलेतेसधनाःसमायांभीष्मः
क्षत्ताकौरवाणांगुरुश्च येत्वामिनंदुष्टतमंवदंतिवांछंतिसद्धिंनचविद्विपंति १ त्रयःकिलेमेह्यधनाभवंतिदासःशिष्यश्चास्वतंत्राच
नारी दासस्यपत्नीत्वधनस्यभद्रेहीनेश्वरासधनंचसर्वं २ प्रविश्यराजःपरिवारंभजस्वतत्तेकार्यंशिष्टमादिश्यतेत्र ईशास्तुस
वैतवराजपुत्रिभवंतिवैधार्तराष्ट्रानपार्थाः ३

८२

रीश्वरेद्युपमपितत्तस्यसनीयमित्यर्थःतथाचसमृतिःत्रयएवाधनालोकेभार्यादासस्तथासुतःयत्तेसमधिगछंतियस्येतेतस्यतद्धनमिति ततथाचराजजयेनै
वतस्यत्वयिजितेवनडतत्रअजितेनजितेनवापराजितेतिविमर्शःसंभवतीतिभावः २ परिवारंदासान्भजस्वपादसंवाहनादिनासेवस्व ३ ॥ ७ ॥ ७ ॥

स० १०९

अन्यमितिपतिजयेनात्मजयं नमन्यसेचेत्पतिकालेरत्यर्थं अन्यंपतिंवृणीष्वापतिषुकामचारिणीषुयेषंवर्त्तनंलोके स्त्रीणामवाच्यं दास्येतत्तद्विदितंप्रसिद्धं अतःपरमितप
तिकाद्दारभावात्तनेनपतिकंदास्यमेवतवास्त्वितिभावः ४ नैवसंतिअस्मद्दासाःपांडवाअस्माभिः प्रत्याख्यातास्त्वेतत्त्वांनैवभोक्तुंसमर्थाभवेयुरितिभावः ५ प्रयोजनमितिपत्रुमां

अन्यंवृणीष्वपतिमास्तुभाविनियस्माद्दास्यंनलभसिदेवनेन अवाच्यावैपतिषुकामवृत्तिर्नित्यंदास्येविदितंतत्रवास्तु ४ पराजितोनकुलोभीम
सेनोयुधिष्ठिरःसहदेवार्जुनौच दासीभूतात्वंहियैयाज्ञसेनिपराजितास्तेपतयोनसंति ५ प्रयोजनंचात्मनिकिंनुमन्यतेपराक्रमंपौरुषंचैवपार्थः
पांचाल्यस्यद्रुपदस्यात्मजामिमांसभामध्येयोतिदेवीतग्लहेषु ६ वैशंपायनउवाच तदैवश्रुत्वाभीमसेनोत्यमर्षीभृशंनिशश्वासतदार्तरूपः
राजानुगोधर्मपाशानुबद्धोदहन्निवैनंक्रोधसंरक्तदृष्टिः ७ भीमउवाच नाहंकुप्येसूतपुत्रस्यराजन्नेतत्सत्यंदासभावंप्रविष्टाः किंविद्विषोवैमा
मेवंव्याहरेयुर्नादेवीस्त्वंयद्यनयानरेंद्र ८ वैशंपायनउवाच भीमसेनवचःश्रुत्वाराजादुर्योधनस्तदा युधिष्ठिरमुवाचेदंतूष्णींभूतमचेतनं ९
भीमार्जुनौयमौचैवस्थितौतेनृपशासने प्रश्नंब्रूहिचकृष्णांत्वमजितांयदिमन्यसे १० एवमुक्त्वातुकौंतेयमपोह्यवसनंस्वकं स्मयन्निवैक्ष्यपां प ६
चालीमैश्वर्यमदमोहितः ११ कदलीदंडसदृशंसर्वलक्षणसंयुतं गजहस्तप्रतीकाशंवज्रप्रतिमगौरवं १२ अभ्युत्स्मयित्वाराधेयंभीममा
धर्षयन्निव द्रौपद्याःप्रेक्षमाणायाःसव्यमूरुमदर्शयत् १३ भीमसेनस्तमालोक्यनेत्रेउत्फाल्यलोहिते प्रोवाचराजमध्येतंसभांविश्रावयन्नि
व १४ पितृभिःसहसालोक्यमास्मगच्छेद्वृकोदरः यद्येतमूरुंगदयानभिंद्यांतेमहाहवे १५ क्रुद्धस्यतस्यसर्वेभ्यःस्रोतोभ्यःपावकार्चिषः वृ
क्षस्येवविनिश्चेरुःकोटरेभ्यःप्रदह्यतः १६ विदुरउवाच परंभयंपश्यतभीमसेनाद्बुध्यध्वंपार्थिवाःप्रातिपेयाः दैवेरितोनूनमयंपुरस्तात्परो
नयोभरतेषूदपादि १७ अतिद्यूतंकृतमिदंधार्त्तराष्ट्रायस्मात्स्त्रियंविवदध्वंसभायां योगक्षेमौनश्यतोवःसमग्रौपापान्मंत्रान्कुरवोमंत्र
यंति १८ इमंधर्मंकुरवोजानताशुध्वस्तेधर्मेपरिषत्संप्रदुष्येत १९

यदेवीतसजन्मनिप्रयोजनंजन्मसाफल्यंकिंनमन्यतेजउपितुमन्यतएव एवंपराक्रमादावपियोज्यं एषदासधर्मःभर्त्तुरुत्कर्षवर्णनं ६ १० अपोह्यअपकृष्य ११
१२ अभ्युत्स्मयित्वाप्रोत्साह्य १३ १४ उदपादिउत्पन्नः १७ अतिद्यूतंपणितद्रव्यमर्यादामतिक्रांतं योगोलब्धेनराज्यादिनासंबंधस्तस्यक्षेमंकल्याणं प
रिषत्सभासंप्रदुष्येत धर्मातिक्रमादितिशेषः १९

तंसहृदि २ ग्ली ली

कितवोयुधिष्ठिरः अपराजितात्मासन्सर्वंचेतअग्लहीष्यत पणीकृतवानभविष्यत्तर्हिसामवदासीस्यादेवेतिभावः पण्यपेनधनेनाशोदीव्यतिजितत्सत्तोपथानि
धनंअभासजितंधनंजितंपर्थः यस्पैतेतस्पतद्धनमितिस्मृतिस्तदासभावेर्जितंधनंस्वामिगामीस्यात्हनतततःप्राक्तनमपीति १९ मापयातमागछत अग्निहोत्रे

जुह्व ३

इमांचेत्सर्वंकितवोग्लहीष्यदीशोभविष्यदपराजितात्मा स्वमेवयथैतर्हिजितंधनंस्यादेवंमन्येपस्पदीव्यत्पनीशः १९ गांधारराजस्यवचोनि
शम्पधर्मादस्मात्कुरवोमापयात २० दुर्योधनउवाच भीमस्यवाक्येतद्वदेवार्जुनस्यस्थितोहंवेपमयोश्चैवमेव युधिष्ठिरंतेप्रवदंत्वनीशमथो
दास्यान्मोक्षसेयाज्ञसेनि २१ अर्जुनउवाच ईशोराजापूर्वमासीद्ग्लहेनःकुंतीसुतोधर्मराजोमहात्मा ईशस्त्वयंकस्यपराजितात्मातज्जानीध्वं
कुरवःसर्वएव २२ वैशंपायनउवाच ततोराज्ञोधृतराष्ट्रस्यगेहेगोमायुरुच्चैर्व्याहरदग्निहोत्रे तंरासभाःप्रत्यभाषंतराजन्समंततःपक्षिणश्चै
वरौद्राः २३ तंवैशब्दंविदुरस्तत्ववेदीशुश्राव घोरंसुबलात्मजाच भीष्मोद्रोणोगौतमश्चापिविद्वान्स्वस्तिस्वस्तीत्यपिचैवाहुरुच्चैः २४ ततो
गांधारीविदुरश्चापिविद्वांस्तमुत्पातंघोरमालक्ष्यराज्ञे निवेदयामासतुरार्तवत्तदाततोराजावाक्यमिदंबभाषे २५ धृतराष्ट्रउवाच हतोसिदुर्यो
धनमंदबुद्धेपस्त्वंसभायांकुरुपुंगवानां स्त्रियंसमाभाषसिदुर्विनीतविशेषतोद्रौपदींधर्मपत्नीं २६ एवमुक्त्वाधृतराष्ट्रोमनीषीहितान्वेषी
बांधवानामपायात् कृष्णांपांचालीमब्रवीत्सांत्वपूर्वंविमृश्यैतत्प्रज्ञयातत्त्वबुद्धिः २७ धृतराष्ट्रउवाच वरंवृणीष्वपांचालिमत्तोयदभिवांछ
सि वधूनांहिविशिष्टामेत्वंधर्मपरमासती २८ द्रौपद्युवाच ददासिचेद्वरंमह्यंवृणोमिभरतर्षभ सर्वधर्मानुगःश्रीमानदासोस्तुयुधिष्ठिरः
२९ मनस्विनमजानंतोमैवंब्रूयुःकुमारकाः एषवैदासपुत्रोहिप्रतिविंध्यंममात्मजं ३० राजपुत्रःपुराभूत्वायथानान्यःपुमान्क्वचित राजभिर्ला
लितस्यास्यनयुक्तादासपुत्रता ३१

गृह्याग्निसमीपे २० २३ सुबलात्मजागांधारी २४ २९ प्रतिविंध्यंयुधिष्ठिरसुतं ३० ३१ ॥ छ ॥ छ ॥

स्ववशान् अपराधीनान् ३३ ३४ वरं आदातुं नोत्सहे यतो ऽनर्हा ३५ अनर्हत्वमेवाह एकमिति ३६ पापीयांसः दासभावेन नीचाः वेत्स्यंति लप्स्यंति विदलाभे इ
त्यस्य रूपं ३७ अध्यायः यान १ २ अप्लवे नौकाहीने अप्रतिष्ठे अगाधे अंभसी वांभसि विपत्समुद्रे ३ ४ ज्योतींषि लोकप्रकाशकानि अपत्यं कर्म विद्या चेति

धृतराष्ट्र उवाच एवं भवतु कल्याणि यथा त्वमभिभाषसे द्वितीयं ते वरं भद्रे ददामि वरयस्व ह ३२ मनो हि मे वितरति नैकं त्वं वरमर्हसि द्रौपद्यु
वाच सरथौ सधनुष्कौ च भीमसेनधनंजयौ यमौ च वरये राजन्नदासान्स्ववशानहं ३३ धृतराष्ट्र उवाच तथास्तु ते महाभागे यथा त्वं नंदिनी
च्छसि तृतीयं वरयास्मत्तो नासि द्वाभ्यां सुसंस्तुता त्वं हि सर्वस्नुषाणां मे श्रेयसी धर्मचारिणी ३४ द्रौपद्युवाच लोभो धर्मस्य नाशाय भगवन्ना
हमुत्सहे अनर्हा वरमादातुं तृतीयं राजसत्तम ३५ एकमाहुर्वैश्यवरं द्वौ तु क्षत्रस्त्रियो वरौ त्रयस्तु राज्ञो राजेंद्र ब्राह्मणस्य शतं वराः ३६ पा
पीयांस इमे भूत्वा संतीर्णाः पतयो मम वेत्स्यंति चैव भद्राणि राजन्पुण्येन कर्मणा ३७ इति सभापर्वणि द्यूते कर्ण उवाच यानः श्रुता मनु
ष्येषु स्त्रियो रूपेण संमताः तासामेतादृशं कर्म न कस्याश्चन शुश्रुमः १ क्रोधाविष्टेषु पार्थेषु धार्तराष्ट्रेषु चाप्यति द्रौपदी पांडुपुत्राणां
कृष्णा शांतिरिहाभवत् २ अप्लवेंभसि मग्नानामप्रतिष्ठे निमज्जतां पांचाली पांडुपुत्राणां नौरेषा पारगाभवत् ३ वैशंपायन उवाच त
द्वै श्रुत्वा भीमसेनः कुरुमध्ये त्यमर्षणः स्त्रीगतिः पांडुपुत्राणामित्युवाच सुदुर्मनाः ४ भीम उवाच त्रीणि ज्योतींषि पुरुष इति वै देवलो ऽब्रवीत्
अपत्यं कर्म विद्या च यतः सृष्टाः प्रजास्ततः ५

प्रजाः १

यतः यस्माद्धेतोस्ततः ज्योतिस्त्रयोः स्थावरजंगमाः सृष्टाः अयं भावः कर्मोपात्तिप्राप्यं लोकद्वयं अपत्यप्राप्यश्चायं लोकः तथा च श्रुतिः सोयं लोकः पुत्रेणैव जय्यो नान्ये
न कर्मणा पितृलोको विद्यया देवलोक इति विद्या उपासना पितृलोकः स्वर्गः देवलोको ब्रह्मलोकः ५ ॥ ६७ ॥ ७२ ॥ ६२ ॥ ॥

म भि १ स्य २

मरणांतरमेतान्येवक्रूराणीत्युपकर्षं कुर्वतीत्याह अमेध्ये अशुचौ ६ तन्नइति नः दाराणामिति संमितिः संबंधः तत्परकीयं अपत्यादिकं ज्योतिः अस्मदीयानां दारा णामर्शनाद्भिहते अभितः सर्वतः हतं तेहातमस्माभिरित्यर्थः अभिहतमिति पाठे स्रोहाडू गतादित्यर्थः पः संसदि परद्वारान स्पृशन्त्रपते स विविक्के ऽव स्वपारदारि कः स्यादेवेति भावः एवं सर्वानतिं निंदित्वा कार्पण्योमुद्दिश्याह धनंजयेति तथा च अभिमद्य जं परेरभिमद्येः स्योयरेभ्योजातमपत्यं किं तु स्यात संकरजत्वान्नीचकर्मकृदेवस्यात

न

अमेध्येवैगतप्राणेशून्ये ज्ञातिभिर्हते देहेत्रितयमेवैतत्पुरुषस्योपयुज्यते ६ तन्नोज्योतिरभिहतं दाराणामभिमर्शनात धनंजयकथंस्वित्स्या दपत्यमिति शिष्यवत ७ अर्जुनउवाच नचैवोक्तानचानुक्ताहीनतः परुषागिरः भारतप्रतिजल्पंति सदातूत्तमपूरुषाः ८ स्मरंतिसुकृता न्येवनवैराणि कृतान्यपि सन्तःप्रतिविजानंतोलब्ध्वाप्रत्ययमात्मनः ९ भीमउवाच इहैवैतांस्तुरान्सर्वान्हनिशत्रून्समागतान अथवानिष्कम्य राजेंद्रसमूलांस्तान्कृन्धिभारत १० किंनोविवदितेनेहकिमुक्तेनचभारत अद्यैवैतान्निहन्मीह प्रशाधिपृथिवीमिमां ११ इत्युक्त्वाभीम सेनस्तुकनिष्ठैर्भ्रातृभिःसह मृगमध्येयथासिंहोमुहुर्मुहुरुदैक्षत १२ सांत्वमानोवीक्षमाणःपार्थेनाक्लिष्टकर्मणा खिद्यत्येवमहाबाहुरं तर्दाहेनवीर्यवान १३ क्रुद्धस्यतस्यस्रोतोभ्यःकर्णादिभ्योनराधिप सधूमःसस्फुलिंगार्चिःपावकःसमजायत १४ ॥ ७ ॥ ७ ॥

र्दुहु २

जानं २

सृतबीजाद्धीरोत्पत्तेरसंभवात कंसवत्करोणोपि असुरबीजोद्भवक्रूरकर्मकरत्वादिति भावः ७ हीनतः हीनतः हीनैः प्रतिजल्पंति प्रत्युत्तरयंति ८ प्रतिविजानंतः स्वत स्यप्रतीकारं तेः लब्धसंभावनाः प्राप्तपूजाः ९ इहैवैतांस्त्वरान्सर्वानातुरान्त्वरया त्वरया त्वरतेः क्षिपित्वर त्वरेत्युपधायाऊठ एतांस्त्वरानिति पपाठः निष्क्र म्य इतः स्थानादिति शेषः समूलान कोशदुर्गादिसहितान १० विवदितेन विवादेन ११ १३ स्रोतोभ्यः निर्गममार्गेभ्यः १४ ॥ ७ ॥ ७ ॥ एम० १११

श्री

१५ जोषं तूष्णीं सुखं उपविश्य १६ १७ अध्यायः राजन् १ अरिष्टं निर्विघ्नं २ ५ यत इति शांतिरेव बुद्धेः फलमित्यर्थः अदारुणि काष्ठभिन्ने पाषाणादौ मदु
रेव बाध्यत इत्यर्थः ५ बाधने पि सतां क्षन्तमाह स्मेति ६ संत इति प्रत्युपकाराशया उपकारं न कुर्वंतीत्यर्थः ७ अधनमध्यमोत्तमानां कलहप्रसंगे वृत्तमाह संवादे इ

भ्रुकुटीकृतदुःप्रेक्ष्यमभवत्तस्य तन्मुखं युगांतकाले संप्राप्ते कृतांतस्येव रूपिणः १५ युधिष्ठिरस्तमावार्य बाहुना बाहुशालिनं मैवमित्य
ब्रवीच्चैनं जोषमास्वेति भारत १६ निवार्य च महाबाहुं कोपसंरक्तलोचनं पितरं समुपातिष्ठद्धृतराष्ट्रं कृतांजलिः १७ इति सभापर्व
णि द्यूते युधिष्ठिर उवाच राजन्किं करवामस्ते प्रशाध्यस्मांस्त्वमीश्वरः नित्यं हि स्थातुमिच्छामस्तव भारत शासने १ धृतराष्ट्र उ
वाच अजातशत्रो भद्रं ते अरिष्टं स्वस्ति गच्छत अनुज्ञाताः सहधनाः स्वराज्यमनुशासत २ इदं चैवावबोद्धव्यं वृद्धस्य मम शा
सनं मया निगदितं सर्वं पथ्यं निःश्रेयसं परं ३ वेत्थ त्वं तात धर्माणां गतिं सूक्ष्मां युधिष्ठिर विनीतोसि महाप्राज्ञ वृद्धानां पर्युपासिता
४ यतो बुद्धिस्ततः शांतिः प्रशमं गच्छ भारत नादारुणि पतेच्छस्त्रं दारुण्येतन्निपात्यते ५ न वैराण्यभिजानंति गुणान्पश्यंति नागुणा
न् विरोधं नाधिगच्छंति ये त उत्तमपूरुषाः ६ स्मरंति सुकृतान्येव न वैराणि कृतान्यपि संतः परार्थं कुर्वाणा नावेक्षंते प्रतिक्रियां
७ संवादे परुषाण्याहुर्युधिष्ठिर नराधमाः प्रत्याहुर्मध्यमास्त्वेतानुक्ताः परुषमुत्तरं ८ नचोक्ता नैव चानुक्ता स्त्वहिताः परुषा गि
रः प्रतिजल्पंति वै धीराः सदा तूत्तमपूरुषाः ९

ति ८ दुर्वचोभिरुक्ताः अनुक्ता वा संतः अहिताः दुःखकर्त्र्यः यतः परुषाः मर्मच्छिदस्तादृशीर्गिरः ९ ॥ छ ॥ ॥ छ ॥ छ ॥ ॥

संत इति आत्मौपम्येन परस्यापि दुःखं मा भूदिति ज्ञानं तत इत्यर्थः १० भ्रातृभिर्दुर्योधनादिभिः १६ सर्वं समयं कृत्वा तद्दुक्तं पणं तथैवास्त्विति प्रतिज्ञाय १७ १८ इति
नैलकंठीये सभापर्वभावदीपे द्यूतं समाप्तं॥ ॥ अनुज्ञा १ धृतराष्ट्रेणायथाप्रतिज्ञं स्वदृष्टं तेपि पुरुषकाराद्बलवत्तरं दैवं कौरवानां सर्वं भूपन्हुपरहेतौ अनुद्यूते प्रावर्त्त

स० ११२ स्मरंति सुकृतान्येव न वैराणि कृतान्यपि संतः प्रतिविजानंतो लब्ध्वा प्रत्ययमात्मनः १० असंभिन्नार्थमर्यादाः साधवः प्रियदर्शनाः तथाच
रितमार्येण त्वयास्मिन्सत्समागमे ११ दुर्योधनस्य पारुष्यं तत्तात हृदि मा कृथाः मातरं चैव गांधारीं मां च त्वं गुणकांक्षया १२ उपस्थितं
वृद्धमंधं पितरं पश्य भारत प्रेक्षापूर्वं मया द्यूतमिदमासीदुपेक्षितं १३ मित्राणि द्रष्टुकामेन पुत्राणां च बलाबलं अशोच्याः कुरवो राजन्
येषां त्वमनुशासिता १४ मंत्री च विदुरो धीमान्सर्वशास्त्रविशारदः त्वयि धर्मोर्जुने धैर्यं भीमसेने पराक्रमः १५ श्रद्धा च गुरुशुश्रूषा यम
योः पुरुषाग्र्ययोः अजातशत्रो भद्रं ते खांडवप्रस्थमाविशत् भ्रातृभिस्तेस्तु सौभ्रात्रं धर्मे ते धीयतां मनः १६ वैशंपायन उवाच इत्युक्तो
भरतश्रेष्ठ धर्मराजो युधिष्ठिरः कृत्वार्यसमयं सर्वं प्रतस्थे भ्रातृभिः सह १७ ते रथान्मेघसंकाशानास्थाय सह कृष्णया प्रययुर्हृष्टमन
सः इंद्रप्रस्थं पुरोत्तमं १८ इति सभापर्वणि द्यूतं समाप्तं जनमेजय उवाच अनुज्ञातांस्तान्विदित्वा सरत्नधनसंचयान् पांडवान्धा
र्तराष्ट्राणां कथमासीन्मनस्तदा १ वैशंपायन उवाच अनुज्ञातांस्तान्विदित्वा धृतराष्ट्रेण धीमता राजन्दुःशासनः क्षिप्रं जगाम भ्रातरं
प्रति २ दुर्योधनं समासाद्य सामात्यं भरतर्षभ दुःखार्तो भरतश्रेष्ठ इदं वचनमब्रवीत् ३ ॥ छ ॥ छ ॥ छ ॥
श्री १

यदित्याह अनुज्ञातानिति २ भरतश्रेष्ठः भरतस्य दुर्योधनस्य ह्रस्वा श्रेष्ठः प्रशस्यतमो दुःशासनः ३ ३ ३ ॥ छ ॥ छ ॥ छ ॥ छ ॥ सभा० ११२

स्थविरो वृद्ध इति साधिक्षेपमुक्तं शत्रुसात् शत्रुवशं गमयत आगमयत प्रापितवान् ४ पांडवान् प्रतिप्रतिकर्तुं ५ ६ त्वपाइत्थं किं न श्रुतमिति काक्षा नज्ञो योजना अपि
तु श्रुतमेव ७ पुरा युद्धात् युद्धमकृत्वेत्यर्थः बलात् युद्धं न वा ये अहितं कुर्वंति ते निहंतव्या इति योजना तान् ८ पाण्डवान् परिहास्यति निर्वक्ष्यति ९ १० ११ परमेषु

दुःशासन उवाच दुःखेनैतत्समानीतं स्थविरो नाशयत्यसौ शत्रुसाद्गमयत् द्रव्यं तद्बुध्यध्वं महारथाः ४ अथ दुर्योधनः कर्णः श
कुनिश्चापि सौबलः मिथः संगम्य सहिताः पांडवान् प्रतिमानिनः ५ वैचित्रवीर्यं राजानं धृतराष्ट्रं मनीषिणं अभिगम्य त्वरायुक्ताः श्ल
क्ष्णां वचनमब्रुवन् ६ दुर्योधन उवाच न त्वयेदं श्रुतं राजन् यज्जगाद बृहस्पतिः शक्रस्य नीतिं प्रवदन् विद्वान् देवपुरोहितः ७ स
र्वोपायैर्नियंतव्याः शत्रवः शत्रुसूदन पुरा युद्धाद्बलाद्वापि प्रकुर्वंति तवाहितं ८ ते वयं पांडवधनैः सर्वान्संपूज्य पार्थिवान् यदि तान्
योधयिष्यामः किं वै नः परिहास्यति ९ अहीनाशीविषान्क्रुद्धान्नाशाय समुपस्थितान् कृत्वा कंठे च पृष्ठे च कः समुत्स्रष्टुमर्हति १०
आत्तशस्त्रा रथगताः कुपितास्तात पांडवाः निःशेषं वः करिष्यंति क्रुद्धा ह्याशीविषा इव ११ संनद्धो ह्यर्जुनो याति विधृत्य परमेषु
धी गांडीवं मुहुरादत्ते निःश्वसंश्च निरीक्षते १२ गदां गुर्वीं समुद्यम्य त्वरितश्च वृकोदरः स्वरथं योजयित्वाशु निर्यात इति नः श्रुतं १३
नकुलः खड्गमादाय चर्म चाप्यष्टचंद्रवत् सहदेवश्च राजा च चक्रुराकारमिंगितैः १४ ते त्वास्थाय रथान्सर्वे बहुशस्त्रपरिच्छदान् अ
भिघ्नंतो रथव्रातान् सेनायोगाय निर्ययुः १५ न क्षंस्यंते तथास्माभिर्जातु विप्रकृता हि ते द्रौपद्याश्च परिक्लेशं कस्तेषां क्षंतुमर्हति
१६

धी श्रेष्ठौ निषंगौ १२ १३ आकारं अभिप्रायं इंगितैश्चेष्टितैः चक्रुः आविश्चक्रुः कृत्विक्षेपः स्वरूपं १४ सेनायोगाय सैन्यमेलनाय १५ न क्षंस्यंते न
क्षमां करिष्यंते जातु कदाचित् विप्रकृताः विकारं प्रापिताः तेषां मध्ये १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वसवत्   पुत्रो

१८ सजनेनसमानजनेनअज्ञाताः १९ सविद्यांस्त्रद्भवशीकरणविद्यासहितां २२ २३ सारवत् व्या ध्वगतान् गतान २४ वैश्यापुत्रस्तु २५ २६ अका

स० ११३ पुनर्दीव्याममद्यंतेवनवासायपांडवैः एवमेतान्वशेकर्तुंशक्ष्यामःपुरुषर्षभ १७ तेवाद्वादशवर्षाणिवयंवाद्यूतनिर्जिताः प्रवि
शेममहारण्यमजिनैःप्रतिवासिताः १८ त्रयोदशंचसजनेअज्ञाताःप्रतिवत्सरं ज्ञाताश्चपुनरन्यानिवनेवर्षाणिद्वादश
१९ निवसेमवयंतेवातथाद्यूतंप्रवर्त्ततां अक्षानुप्त्वापुनर्द्यूतमिदंकुर्वंतुपांडवाः २० एतत्कृत्यतमंराजन्नस्माकंभरतर्षभ अ
यंहिशकुनिर्वेदसविद्यामक्षसंपदं २१ दृढमूलावयंराज्येमित्राणिपरिगृह्यच सारवद्विपुलंसैन्यंसत्कृत्यचदुरासदं २२ तेचत्रयो
दशवर्षं पारयिष्यंतिचेद्व्रतं जेष्यामस्तान्नृपंराजन्रोचतांतेपरंतप २३ धृतराष्ट्रउवाच तूर्णंप्रत्यानयस्वैतान्कामंव्यध्वगतान
पि आगच्छंतुपुनर्द्यूतमिदंकुर्वंतुपांडवाः २४ वैशंपायनउवाच ततोद्रोणःसोमदत्तोबाल्हीकश्चैवगौतमः विदुरोद्रोणपुत्र
श्चवैश्यापुत्रश्चवीर्यवान् २५ भूरिश्रवाःशांतनवोविकर्णश्चमहारथः माद्यूतमित्यभाषंतशामोस्त्विति चसर्वशः २६ अकामा
नांचसर्वेषांसुहृदामर्थदर्शिनां अकरोत्पांडवाह्वानंधृतराष्ट्रःसुतप्रियः २७ इतिसभापर्वणि वैशंपायनउवाच अथाब्र
वीन्महाराजधृतराष्ट्रंजनेश्वरं पुत्रहार्दाद्धर्मयुक्तागांधारीशोककर्शिता १ जातेदुर्योधनेक्षत्तामहामतिरभाषत नीयतांप
रलोकायसाध्वयंकुलपांसनः २ नदञ्जातमात्रोहिगोमायुरिवभारत अंतोनूनंकुलस्यास्यतन्निबोधतभारत ३ मातिमज्जीः
स्वदोषेणमहाप्सुत्वंहिभारत बालानामविशिष्टानांमामतिंछत्तिवैप्रभो ४ माकुलस्यक्षयेघोरेकारणंत्वंभविष्यसि बद्धंसेतुं
कोनुभिंद्याद्धमेच्छांतंचपावकं ५
मानांद्यूतमनिच्छतां २८ अध्यायः अथाब्र १ मतिंमाभिमंस्थाः अभिमतांमाकुरु ४ धमेत्उद्दीपयेत ५ छ॥ छ॥ छ॥ ॥ स० ११३

तन्नेत्राः त्वमेव नेतायेषां ते तन्नेत्राः दीर्णाः त्वत्तोभिन्नमर्यादाः संतः प्रहासिषुः जीवितत्यागेनेतिशेषः ८ ९ मा प्रमादीः अनवहितोमाभूः १० मदुपेक्षां मूढधुसमाहिता

शमे स्थितान्कोनुपार्थान्कोपयेद्भरतर्षभ स्मरंतंत्वामाजमीढंस्मारयिष्याम्यहंपुनः ६ शास्त्रंनशास्तिदुर्बुद्धिंश्रेयसेचेतरायच नवै
वृद्धोबालमतिर्भवेद्राजन्कथंचन ७ त्वन्नेत्राःसंतुतेपुत्राःमात्वांराजन्प्रहासिषुः तस्माद्यंमहच्चनात्यज्यतांकुलपांसनः ८ तथाते
नकृतंराजन्पुत्रस्नेहान्नराधिप तस्यप्राप्तंफलंविद्धिकुलांतकरणाययत् ९ शमेनधर्मेणपरस्यबुद्ध्या जातावुद्धिर्यास्तुतेमाप्रती
या प्रध्वंसिनीक्रूरसमाहिताश्रीर्मृदुप्रौढागच्छतिपुत्रपौत्रान् १० अथाब्रवीन्महाराजोगांधारींधर्मदर्शिनीं अंतःकामंकुलस्याम्तु
नशक्नोमिनिवारितुं ११ यथेच्छसितथैवास्तुप्रत्यागच्छंतुपांडवाः पुनर्द्यूतंचकुर्वंतुमामकाःपांडवैःसह १२ इतिसभापर्वणि वैशंपा
यनउवाच ततोव्यध्वगतंपार्थंप्रातिकामीयुधिष्ठिरं उवाचवचनाद्राज्ञोधृतराष्ट्रस्यधीमतः १ उपास्तीर्णासभाराजन्नक्षानुप्त्वायुधिष्ठि
र एहिपांडवदीव्येतिपितात्वाहेतिभारत २ युधिष्ठिरउवाच धातुर्नियोगाद्भूतानिप्राप्नुवंतिशुभाशुभं ननिवृत्तिस्तयोरस्तिदेवि
तव्यंपुनर्यदि ३ अक्षद्यूतेसमाह्वानंनियोगात्स्थविरस्यच जानन्नपिक्षयकरंनातिक्रमितुमुत्सहे ४ वैशंपायनउवाच असं
भवेहेममयस्यजन्तोस्तथापिरामोलुलुभेमृगाय प्रायःसमासन्नपराभवानांधियोविपर्यस्ततराभवंति ५ इतिब्रुवन्निववृतेभ्रात
भिःसहपांडवः जानंश्चशकुनेर्मायांपार्थोद्यूतमियात्पुनः ६ विविशुस्तेसभांतातपुनमहारथाः व्यथयंतिसचेतांसिसुहृदांभरत
र्षभाः ७

सतीप्रौढागम्यत्वा १० अंतोनाशःकामंयथेष्टं ११ १२ अध्यायः ततोव्यध्वेतिअसंभवेइतिधृतराष्ट्रसुहृदिश्यपत्नकं ५ ६ ७ ॥ ७ ॥ ७ ॥

यथोपजोषं यथासुखं ८ पूजितं दृष्टं ९ १४ व्यवसायेन निश्चयेन १५ संवेगात् अतिशयात् १६ एतं दुर्योधनं हे भरतर्षभ धृतराष्ट्र १७ क्रियाकार्येण पदोषान्वितम्

स॰ ११४

यथोपजोषमासीनाः पुनर्द्यूतप्रवर्त्तये सर्वलोकविनाशाय दैवेनोपनिपीडिताः ८ शकुनिरुवाच अमुं च स्थविरोपद्योषणं सरितमेवतत् महाधनं ग्लहं त्वेकं शृणु मे भरतर्षभ ९ वयं वा द्वादशाब्दानि युष्माभिर्द्यूतनिर्जिताः प्रविशेम महारण्यं रौरवाजिनवाससः १०
त्रयोदशं च सजने अज्ञाताः परिवत्सरं ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश ११ अस्माभिर्निर्जिता यूयं वने द्वादशवत्सरान् वसध्वं कृष्णया सार्द्धमजिनैः प्रतिवासिताः १२ त्रयोदशं च सजने अज्ञाताः परिवत्सरं ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश १३ त्रयोदशे च निर्वृत्ते पुनरेव यथोचितं स्वराज्यं प्रतिपत्तव्यमितरैरथवेतरैः १४ अनेन व्यवसायेन सहास्माभिर्युधिष्ठिर अक्षानुप्त्वा पुनर्द्यूतमेहि दीव्यस्व भारत १५ अथ सभ्याः सभामध्ये समुच्छ्रितकरास्तदा ऊचुरुद्विग्नमनसः संवेगात्सर्व एव हि १६ सभ्या ऊचुः अहो धिग्बान्धवा नैनं बोधयंति महद्भयं बुद्ध्या बोध्यं न बुध्येदयं वै भरतर्षभ १७ वैशंपायन उवाच जनप्रवादान्सुबहूञ्छृण्वन्नपि नराधिपः क्रियाच धर्मसंयोगात्पार्थो द्यूतमियात्पुनः १८ जानन्नपि महाबुद्धिः पुनर्द्यूतमवर्तयत् अप्यासन्नो विनाशः स्यात्कुरूणामिति चिंतयन् १९
युधिष्ठिर उवाच कथं वै मद्विधो राजा स्वधर्ममनुपालयन् आहूतो विनिवर्त्तेत दीव्यामि शकुने त्वया २० शकुनिरुवाच गवाश्वं बहुधेनूकमपर्यंतमजाविकं गजाः कोशो हिरण्यं च दासीदासाश्च सर्वशः २१ एक नो ग्लह एवैको वनवासाय पांडवाः यूयं वयं वा विजिता वसेम वनमाश्रिताः २२

उ॰ अ॰ ४ पा॰ ३

ज इति लज्जया धर्मसंयोगात् तीर्थाघट्टनजात १८ २० गजाश्वादिकं बहुधेनूकं बहुदोग्ध्रीकं पणीकृतमिति शेषः २१ २२ ॥ छ ॥ छ ॥ छ ॥ सभा॰ ११४

समस्येकस्यपराजयाद्वाहस्यइति २३ समुत्क्षेपेणएकेनैवचनेनाक्षक्षेपेण सकृद्यूतमात्रेणेत्यर्थः प्रतिजग्राहतंग्लहंअंगीचकार ततःसौबलोग्लहंजग्राह पाशंपा
तितवान् २५ अनुद्यूतसमाप्तं ततः परा इति अजिनग्रहणंतत्संज्ञातयेषांदीक्षिताः १ ३ पांडोः स्त्रियोपांडवो । अदुःखंतरस्सुं तान्स्त्रीभोग्यानिति कृतवेषरूपस्थानि
पांडवेयाः समैः सर्वैर्मार्गैः अस्थलैः अगतभिरतिसंकीर्णत्वात् स्थलहीनैः संप्रयाताः अस्मात्प्रतीतिरोषः सर्वदेवाअनुकूलाइत्यर्थः गुणैश्चीमत्त्वादिभिः ज्येष्ठाः

एवंनोग्लहएवैकोवनवासायपांडवाः एवंवयंवाविजितावसेमवनमाश्रिताः २३ त्रयोदशंचवैवर्षमज्ञाताः सजनेतथा अनेनव्यवसायेननरी
व्याघ्रपुरुषर्षभाः २४ समुत्क्षेपेणैवैकेनवनवासायभारत प्रतिजग्राहतंपार्थोग्लहंजग्राहसौबलः जितमित्येवशकुनिर्युधिष्ठिरमभाषत २५
इतिसभापर्वणिअनुद्यूतसमाप्तं वैशंपायनउवाच ततःपराजिताःपार्थावनवासायदीक्षिताः अजिनान्युत्तरीयाणिजगृहुश्चयथाक्रमं
१ अजिनैःसंवृतान्दृष्ट्वाहृतराज्यानरिंदमान् प्रस्थितान्वनवासायततोदुःशासनोऽब्रवीत् २ प्रवृत्तंधार्तराष्ट्रस्यचक्रंराज्ञोमहात्मनः पराजि
ताःपांडवेयाविपत्तिंपरमांगताः ३ अद्यदेवाःसंप्रयाताःसमैर्वर्त्मभिरस्थलैः गुणज्येष्ठास्तथाश्रेष्ठाभूयांसोयद्वयंपरैः ४
नरकंपातिताःपार्थादीर्घकालमनंतकं सुखाच्चहीनाराज्याच्चविनष्टाःशाश्वतीःसमाः ५ धनेनमत्तायेतेस्मधार्तराष्ट्रान्प्रहा
सिषुः तेनिर्जिताहृतधनावनमेष्यंतिपांडवाः ६ चित्रान्सन्नाहानवमुंचंतुचैषांवासांसिदिव्यानिचभानुमंति विवास्यंतांरुरुचर्माणि
सर्वेयथाग्लहंसौबलस्याभ्युपेताः ७ नसंतिलोकेषुपुमांसईदृशाइत्येवयेभावितबुद्धयःसदा ज्ञास्यंतितेत्मानमिमेद्यपांडवाविपर्ययेषंढ
तिलाइवाफलाः ८

तथाज्येष्ठाः वयसा अतएवश्रेयांसः प्रशस्यतराः ४ ५ महासिषुः सभायांदुर्योधनंजलेपतितंदृष्ट्वाहासंकृतवंतः ६ सन्नाहान् उष्णीषकवच कवच करिवं
धादीन् भानुमंतिसुवर्णतंतुमयत्वाद्दीप्तिमंति विवास्यंतांपरिधाप्यंतां रुरुः कृष्णमृगः ७ ईदृशाः अस्मत्सदृशाः अफलाः निर्वीर्याः ८ ॥ ॥

स० ११५

इदंचेतियत्सत्येतिच्छेदः यदिदंइदंरौरवंवासः आहितेषुयज्ञेषुयोग्यंवस्त्रंआमनामानितान्नियतंनामानीतियास्कः ईदृशानांदीक्षितानामिवपांडवानांस्यात्तेनचतद्वत्प श्यत । यद्वत्अदीक्षितानांकेवलंजीर्णोनामाजिनानीतियोजना । अदीक्षायामपिदीक्षितवासांसिवसानाः केवलंकवरंस्यंतरस्यार्थः ९ यज्ञसेनोद्रुपदः १० सूक्ष्मप्रा

इदंहिवासोयदिवेदृशानांमनस्विनांकौरवमाभवेद्वः अदीक्षितानामजिनानियद्वद्बलीयसांपश्यतपांडवानां ९ महाप्राज्ञः सोम
किर्यज्ञसेनः कन्यांपांचालींपांडवेभ्यः प्रदाय अकार्षीत्सुकृतंनेहकिंचित्क्लीबाः पार्थाः पतयोयाज्ञसेन्याः १० सूक्ष्मप्रावारानजि
नोत्तरीयान्दृष्ट्वारण्येनिर्धनानप्रतिष्ठान् कांत्वंप्रीतिंलप्स्यसेयाज्ञसेनिपतिंवृणीष्वेहयमन्यमिच्छसि ११ एतेहिसर्वेकुरवः समेताः
क्षांतादांताः सुद्रविणोपपन्ना एषांवृणीष्वैकतमंपतित्वेनत्वांनयेत्कालविपर्ययोयं १२ यथाफलाः षंढतिलायथाचर्ममयामृगा
: तथैवपांडवाः सर्वेयथाकाकयवाअपि १३ किंपांडवांस्त्वंपतितानुपास्सेमोघःश्रमः षंढतिलानुपास्य एवंनृशंसः परुषाणि । शं
पार्थानश्रावयद्धृतराष्ट्रस्यपुत्रः १४ तद्वैश्रुत्वाभीमसेनोत्यमर्षीनिर्भर्त्स्योच्चैः सन्निगृह्यैवरोषात् उवाचैनंसहसैवोपगम्यसिं
होयथाहैमवतः शृगालं १५ भीमसेनउवाच क्रूरपापजनैर्जुष्टमकृतार्थंप्रभाषसे गांधारविद्ययाहित्वंराजमध्येविकत्थसे १६
यथातुदसिमर्माणिवाक्शरैरिहनोभृशं तथास्मारयितातेहंकृंतन्मर्माणिसंयुगे १७ येचत्वामनुवर्त्तंतेक्रोधलोभवशानुगाः
गोप्तारः सानुबंधांस्तान्नेष्यामियमसादनं १८ ॥ ॥

चारान्तुच्छपरिधानीयवस्त्रान् अप्रतिष्ठान्हृतस्थानान् ११ कालविपर्ययः क्लेशकालः त्वांननयेन्नकर्षेत् नत्वयेदित्यपिपाठः १२ काकयवानिस्तंडुलत टी०
राधान्य १३ १५ गांधारस्यशकुनेर्विद्यया नतुबाहुबलेनेतिभावः १६ स्मारयितास्मारयिष्यामि १७ सानुबंधान्सपुत्रबांधवान् १८ ॥ ११५

अजिनैर्विवासितं आच्छादितं तावन्मात्रयासंपन्नासहराज्यात्तवहिष्कृतं धर्मेणानिवद्धो + निरुद्धो मार्गोगौरिथुमर्हनारं भोयस्यतं मधुपर्केगौर्गौरितित्रिर्निवेदितायाः गौः वधः उत्स
र्गश्चद्रष्टः तत्समानमात् अन्नकदूपायातिथ्येनिवेदिताः मां उवपशवउत्सृष्टाः तेपुनर्वयमत्नुमुखाअनुज्ञाइतिउत्सृष्टमात्रास्ववेगेनपलायंतेपुनरस्मानयंमावधिष्टेतितेषांप
रिहासेनव्याकुलीकरणाय—— नेराद्धानंक्षिपतेगौर्गौरिति मत्तुभयात्पशुवत्प्राणभयात्पलायंतइतिपांडवानांकातरत्वसूचकोयमुपहासः अस्योत्तरंइशापर्वरीति

वैशंपायनउवाच एवंब्रुवाणमजिनैः प्रवासितंदुःशासनस्तं दुःशासनस्तं परिनृत्यतिस्म मध्येकुरूणांधर्मनिबद्धमार्गंगौर्गौरितिस्माह्वय
न्मुक्तलज्जः भीमसेनउवाच नृशंसपुरुषंवक्तुंदुःशासनत्वया निकृत्याहिधनंलब्ध्वाकोविकत्थितुमर्हति १० मैवस्मसुकृतांल्लोका
न्गच्छेत्पार्थोवृकोदरः यदिवक्षोहितेभित्वानपिवेच्छोणितंरणे धार्तराष्ट्रान्रणेहत्वामिषतांसर्वधन्विनां शमंगंतास्मिनचिरात्सत्यमेतद्ब्रु
वीमिते ११ वैशंपायनउवाच तस्यराजासिंहगतेः सखेलंदुर्योधनोभीमसेनस्यहर्षात् गतिंस्वगत्यानुचकारमंदोनिर्गच्छतांपांडवानां
सभायाः १३ नैतावताकृतमित्यब्रवीत्तंवृकोदरः परिवृत्यार्धकायः शीघ्रंहित्वानिहतंसानुबंधंसंस्मार्याहंप्रतिवक्ष्यामिमूढ १४

गौरिति
भीमसेनोवक्ष्यति येस्मान्पूर्वंप्रनृत्संतिपुनर्गौरितिगौरिति तान्वयंप्रतिनृत्स्यामः पुनर्गौरिति उत्सृष्टान्पशूनिवाभीषयितुमाह्वयंतोयेस्मान्पूर्वंप्रनृत्संतितानेवयुद्धेवि
द्राविताऽन्हत्वानृत्स्यामइतिवाक्यार्थः ९ ११ मिषतांपश्यतां १२ १३ प्रतिवक्ष्यामिअस्यपरिहासस्योत्तरमितिशेषः १४ १४

स॰
११६

आत्मनिचिन्ते १५ १८ परुषस्यकर्कशस्य १९ व्यवसितंकीर्तितं (द्वि) दुष्टाः दृक्ष्यामः २० २१ प्रहारऊर्जितंकंप्रवक्तारंकुबुद्धेः २२ ॥ ॥

एतत्समीक्ष्यात्मनिचावमानंनियम्यमन्युंबलवान्समानी राजानुगः संसदिकौरवाणांविनिःश्वसन्वाक्यमुवाचभीमः २५ भीम
उवाच अहंदुर्योधनंहन्ताकर्णंहन्ताधनंजयः शकुनिंचाक्षकितवंसहदेवोहनिष्यति २६ इदंचभूयोवक्ष्यामिसभामध्येबृहद्वचः
सत्यंदेवाः करिष्यंतियन्नोयुद्धंभविष्यति २७ सुयोधनमिमंपापंहन्तास्मिगदयायुधि शिरः पादेननचास्याहमधिष्ठास्यामिभूत
ले २८ वाक्यशूरस्यचैवास्यपरुषस्यदुरात्मनः दुःशासनस्यरुधिरंपातास्मिमृगराडिव २९ अर्जुनउवाच नैववाचाव्यवसितं
भीमविज्ञायतेसतां इतश्चतुर्दशेवर्षेद्रष्टारोयद्भविष्यति ३० भीमसेनउवाच दुर्योधनस्यकर्णस्यशकुनेश्चदुरात्मनः दुःशासनचतुर्था
नांभूमिः पास्यतिशोणितं ३१ अर्जुनउवाच असूयितारंद्रष्टारंप्रवक्तारंविकत्थनं भीमसेननियोगात्तेहंताहंकर्णमाहवे ३२ अ
र्जुनः प्रतिजानीतेभीमस्यप्रियकाम्यया कर्णंकर्णानुगांश्चैवरणेहन्तास्मिपत्रिभिः ३३ येचान्येप्रतियोत्स्यंतिबुद्धिमोहेनमांनृपाः
तांश्चसर्वानहंबाणैर्नेतास्मियमसादनं ३४ चलेद्धिहिमवान्स्थानान्निःप्रभःस्याद्दिवाकरः शैत्यंसोमात्प्रणश्येन्मत्सत्यंचचलेद्यदि
३५ नप्रदास्यतिचेद्राज्यमितोवर्षेचतुर्दशे दुर्योधनोभिसत्कृत्यसत्यमेतद्भविष्यति ३६ वैशंपायनउवाच इत्युक्तवतिपार्थेतु
श्रीमान्माद्रवतीसुतः प्रगृह्यविपुलंबाहुंसहदेवः प्रतापवान् ३७ सौबलस्यवधंप्रेप्सुरिदंवचनमब्रवीत् क्रोधसंरक्तनयनोनि
श्वसन्निवपन्नगः ३८ सहदेवउवाच अक्षान्यान्मन्यसेमूढगांधाराणांयशोहर नैतेक्षानिशितबाणास्त्वयैतेसमरेवृताः
३९ यथाचैवोक्तवान्भीमस्त्वामुद्दिश्यसबांधवं कर्ताहंकर्मणस्तस्यकुरुकार्याणिसर्वशः ४० ॥ ॥

राम॰
११६

अध्यायः स्वं १ २ दृष्टास्मिद्रक्ष्यामि ३ आसन्नाः नष्टाः ४ ५ अगदंस्त्वारोग्यं ६ ८ ममममतिनितिशेषः ९ १० १६

व४

हंतास्मितरसायुद्धेत्वामेवहसंबाधवं यदिस्थास्यसिसंग्रामेक्षत्रधर्मेणसौबल ४१ सहदेववचः श्रुत्वानकुलोपिविशांपते दर्शनीयतमोनृणा
मिदंवचनमब्रवीत् २ सुतेयंयज्ञसेनस्यद्यूतेस्मिन्धृतराष्ट्रजैः यैर्वाचः श्राविताः रूक्षाः स्थितैर्दुर्योधनप्रिये ३ तान्धार्तराष्ट्रान्दुर्वृत्तान्
मुमूर्षून्कालनोदितान् गमयिष्यामिभूयिष्ठानहंवैवस्वतक्षयं ४ निदेशाद्धर्मराजस्यद्रौपद्याः पदवीचरन् निर्धार्तराष्ट्रांपृथिवींकर्तास्मि
नचिरादिव ५ वैशंपायनउवाच एवंतेपुरुषव्याघ्राः सर्वेव्यायतबाहवः प्रतिज्ञाबहुलाः कृत्वाधृतराष्ट्रमुपागमन् ६ इतिसभापर्वणिवन
७५ प्रवेशे युधिष्ठिरउवाच आमंत्रयामिभरतांस्तथावृद्धंपितामहं राजानंसोमदत्तंचमहाराजंचबाह्लिकं १ द्रोणंकृपंनृपांश्चा
न्यानश्वत्थामानमेवच विदुरंधृतराष्ट्रंचधार्तराष्ट्रांश्चसर्वशः २ युयुत्सुंसंजयंचैवतथैवान्यान्सभासदः सर्वानामंत्र्यगच्छामिद्रष्टास्मिपुनरेत्य
वः ३ वैशंपायनउवाच नचेकिंचिदूचुस्तेह्रियासन्नायुधिष्ठिरं मनोभिरेवकल्याणंदध्युस्तेतस्यधीमतः ४ विदुरउवाच आर्याप्थथा
राजपुत्रीनारण्यंगंतुमर्हति सुकुमारीचवृद्धाचनित्यंचैवसुखोचिता ५ इहवत्स्यतिकल्याणीसत्कृताममवेश्मनि इतिपार्थाविजानी
ध्वमगदंवोस्तुसर्वशः ६ पांडवाऊचुः तथेत्युक्त्वाब्रुवन्सर्वेयथानोवदसेनघ त्वंपितृव्यः पितृसमोवयंचत्वत्परायणाः ७ यथाज्ञा
पयसेविद्वंस्त्वंहिनः परमोगुरुः यच्चान्यदपिकर्तव्यंतद्विधत्स्वमहामते ८ विदुरउवाच युधिष्ठिरविजानीहिममेदंभरतर्षभ नाधर्मेणजि
तः कश्चिद्व्यथतेवैपराजये ९ त्वंवैधर्मंविजानीषेयुद्धेजेताधनंजयः हंतारीणांभीमसेनोनकुलस्त्वर्थसंग्रहे १० ॥

॥ ॥ ॥ ॥ ॥ ॥

स० ११८

समाधिः मनःस्वास्थ्यकरः १३ १६ माहासीः मात्मज सांपराये परलोकविषये विधारणो नियमने १८ विसर्गे दाने संयमे वशीकरणे आत्मप्रदानं सर्वहितार्थे शरीरादेर्पणं

संयन्तासहदेवस्तेधौम्योब्रह्मविदुत्तमः धर्मार्थकुशलश्चैवज्ञेयद्रौधर्मचारिणी ११ अन्योन्यस्यप्रियाःसर्वेतथैवप्रियदर्शनाः परैरभेद्याःसंतुष्टा
कोवोनस्पृहयेदिह १२ एषवैसर्वकल्याणः समाधिस्तवभारत नैनंशत्रुर्विषहतेशक्रेणापिसमोप्युत १३ हिमवत्यनुशिष्टोसिमेरुसावर्णि
नापुरा द्वैपायनेनकृष्णेननगरेवारणावते १४ भृगुतुंगेचरामेणदृषद्वत्यांचशंभुना अश्रौषीरसितस्यापिमहर्षेरंजनंप्रति १५ कल्माषीती
रसंस्थस्यगतस्त्वंशिष्यतांभृगोः द्रष्टासदानारदस्तेधौम्यस्तेयंपुरोहितः १६ माहासीःसांपरायेत्वंबुद्धिंतामृषिपूजितां पुरूरवसमैलंत्वंबु
द्ध्याजयसिपांडव १७ शक्त्याजयसिराज्ञोन्यानृषीन्धर्मोपसेवया इंद्रंविजयसेशौर्याद्धर्मंकोपविधारणात् १८ त्यागेनधनदंदेवंवरुणंसं
यमेनच आत्मप्रदानेसौम्यत्वमद्भ्यश्चैवोपजीवनं १९ भूमेः क्षमाचतेजश्चसमग्रंसूर्यमंडलात् वायोर्बलंविद्धिसत्वं भूतेभ्यश्चात्मसं
भवं २० अगदंवोस्तुभद्रंवोद्रक्ष्यामिपुनरागतान् आपद्धर्मार्थकृच्छ्रेषुसर्वकार्येषुवापुनः २१ यथावत्प्रतिपद्येथाः कालेकाले
युधिष्ठिर आपृष्टोसीहकौंतेयस्वस्तिप्राप्नुहिभारत २२ कृतार्थंस्वस्तिमंतंत्वांद्रक्ष्यामः पुनरागतं नहिवोवृजिनंकिंचिद्वेदकश्चित्पु
राकृत २३ वैशंपायनउवाच एवमुक्तस्तथेत्युक्त्वापांडवः सत्यविक्रमः भीष्मद्रोणौनमस्कृत्याप्रातिष्ठतयुधिष्ठिरः २४ इति
सभापर्वणि ७६ ॥ ॥

राम० ११८

णां उपजीवनं जीवनहेतुत्वं ऐंद्रे इति लोकपालगुणान् पंच महत्गुणांश्च सर्वसंपत्तिहेतून् जयादीन् प्राप्नुहीत्यर्थः १९ अध्यायः ॥ ॥ ॥ ॥

भवेति १
ततः से १५ अरिष्टंनिर्विघ्नं मदनुध्यानबृंहिता स्त्रीगुणैरनपाविव्रतेनयुक्तापिमातर्गुणेनवात्सल्येनापिवर्द्धिताभर्त्सुभक्तिस्नेहंवर्तीभावः ६ ८ शोणितानोक्षक

वैशंपायनउवाच तस्मिन्संप्रस्थितेकृष्णापृथांप्राप्ययशस्विनी आपृछ्छद्भृशदुःखार्त्तायाश्चान्यास्तत्रयोषितः १ यथार्हंवंदनाश्लेषान्कृ
त्वागंतुमियेषसा ततोनिनादः सुमहान्पांडवांतःपुरेभवत् २ कुंतीचभृशसंतप्ताद्रौपदींप्रेक्ष्यगछ्छतीं शोकविह्वलयावाचाकृछ्छ्रा
द्वचनमब्रवीत् ३ वत्सेशोकोनतेकार्य्यः प्राप्येदंव्यसनंमहत् स्त्रीधर्माणामभिज्ञासिशीलाचारवतीतथा ४ नत्वांसंदेष्टुमर्हामिभ
र्तॄन्प्रतिशुचिस्मिते साध्वीगुणसमापन्नाभूषितंतेकुलद्वयं ५ सभाग्याः कुरवश्चेमेयेनदग्धास्त्वयानघे अरिष्टंव्रजपंथानंमदनुध्या
नबृंहिता ६ भाविन्यर्थेहिसत्स्त्रीणांवैक्लव्यंनोपजायते गुरुधर्माभिगुप्ताचश्रेयः क्षिप्रमवाप्स्यसि ७ सहदेवश्चमेपुत्रः सदावेक्ष्यो
वनेवसन् यथेदंव्यसनंप्राप्यनायंसीदेन्महामतिः तथेत्युक्त्वातुसादेवीस्रवन्नेत्रजलाविला शोणितासिक्तवसनामुक्तकेशीवि
निर्ययौ ९ तांक्रोशंतीं पृथादुःखादनुवव्राजगछ्छतीं अथापश्यत्सुतान्सर्वान्हृताभरणवाससः १० रुरुचर्मावृततनून्ह्रि
याकिंचिदवाङ्मुखान् परैः परीतान्संहृष्टैः सुहृद्भिश्चानुशोचितान् तदवस्थान्सुतान्सर्वानुपसृत्यातिवत्सला स्वजमानावदच्छोका
त्तत्तद्विलपतीबहु १२ कुंत्युवाच कथंसद्धर्मचारित्रान्वृत्तस्थितिविभूषितान् अक्षुद्रान्दृढभक्तांश्चदैवतेज्यापरान्सदा १४
व्यसनंवः समभ्यागात्कोयंविधिविपर्ययः कस्यापध्यानजंचेदंमागः पश्यामिवोधिया १५ ॥ ॥ ॥

वसनारजस्वला ९ १० स्वजमानाश्चालिंगमाना १२ १२ १३ १४ अपध्यानजंक्रोधजं १५ १५ १५ १५

म०
११८

अस्मद्विनाकृताः संपद्विहीनाः मद्वीतिपाठेपिसएवार्थः १६ १७ शतश्रृंगात् १८ पुत्राधिंपुत्रविषयामनः पीडां १९ २० अभिसंधिताकृता मद्वामम २१ मोपुत्र
काः वः युष्मानननविहास्ये २२ अमुंदेहमेप्राणाधारणेनअतवतिविनाशवतिप्रमादतः पांडोरिवममांतः किंत्वविहितः २३ २४ अनादिनिधनमितिद्वारकावा

स्मातुमन्त्राप्यदेषियंयाहंयुष्मानजीवनं दुःखाध्यासमुंजोत्सर्थपुत्रानपुत्रेमेगुरौः १६ कथंवत्सपथदुर्गेपुवनेस्मद्विनाकृताः वीर्यस
त्ववेलात्साहतेजोभिरकृशाः कृशाः १७ यदितेदेवमत्तासंवनेवासोहिवोध्रुवं शतश्रृंगात्मनेतेपांडोनागमिष्यंगजाह्वये १८ धर्मवः।
पितरंमन्येतपोमेधान्वितंतथा यः पुत्राधिमसंप्राप्यस्वर्गेछामकरोत्प्रियां १९ धर्माचातींद्रियज्ञानामिमांप्रांज्ञापरांगतिं मन्येतुमाद्रींध
र्मज्ञांकल्याणींसर्वथैववत् २० रत्यामसाचगत्ताचयपाहमभिसंधिता जीवितप्रियतांमह्यंधिग्मांसंक्लेशभागिनीं २१ पुत्रकाम्जहा
म्यघहछलध्यानप्रियानसतः मासाहंयास्मामिहिवनंहाकृष्णेकिंजहासिमां २२ अंतवत्सुमनुष्येषुधात्राकिंतुप्रमादतः ममांतो
नैवविहितस्तेनायुर्नजहातिमां २३ हाकृष्णद्वारकावासिनक्वासिसंकर्षणानुज कस्मान्नत्रायसेदुःखान्मांचेमांश्चनरोत्तमान् २४
अनादिनिधनंयेत्वामनुध्यायंतिवेनराः तांस्त्वपासीत्ययंवादः सगतोव्यर्थतांकथं २५ इमेसद्धर्ममाहात्म्ययशोवीर्यानुव
र्तिनः नार्हंतिव्यसनंभोक्तुंनन्वेषांक्रियतांदया २६ सेयंनीत्यर्थवित्सुभीष्मद्रोणकृपादिषु स्थितेषुकुलनाथेषुकथमापदु
पागता हापांडोहामहाराजक्वासिकिंसमुपेक्षसे २९

सिनिश्याधिमतिउत्पन्नेनाशयोनिराकरणं अनुपाधौकारणोपाधौवानयोरप्रसक्तेः अतएवउत्पन्नौचतुर्भुजंरूपमेववसुदेवेनदृष्टं। यत्तुशरीरंवासुदेवस्यरामस्यच राम०
महात्मनः अर्जुनोदाहयामासपुरुषैराप्रकारिमिरितिशरीरदाहवचनंतदनुसन्धिवचनविरोधाद्विरोभावमात्राभिप्रायं २५ २५ २५ ११८

३२ हेतुभिः दैवप्राबल्यादिप्रतिपादकैर्वचनैः ३३ ३६ अनेकाग्रः आकुलचित्तः अध्यायः तमागतं १ २ शंसकथय ३ ७ ७ ७

पुत्रान्विवास्यतः साधूनरिभिर्द्यूतनिर्जितान् सहदेवनिवर्त्तस्वननुत्वमसिमेप्रियः ३० शरीरस्यपिमोऽयमामांत्याक्षीः कुपुत्रवत् प्र
जेतुभ्रातरस्तेमीयदिसत्याभिसंधिनः मम्परित्राराजधर्म्ममिहैवलभवाप्नुहि ३१ वैशंपायनउवाच एवंविलपतींकुंतीमभिवाद्यप्र
णम्यच पांडवाविगतानंदावनायैवप्रवव्रजुः ३२ विदुरश्चापितामार्त्तांकुंतीमाश्वास्यहेतुभिः प्रावेशयन्गृहंक्षत्तास्वयमार्त्तत
रः शनैः ३३ धार्त्तराष्ट्रस्त्रियस्ताश्चनिखिलेनोपलभ्यतत् गमनंपरिकर्षंचकृष्णायाद्यूतमंडले ३४ रुरुदुःसुस्वनंसर्वावि
निंदत्यः कुरून्भृशं दध्युश्चसुचिरंकालंकरासक्तमुखांबुजाः ३५ राजाचधृतराष्ट्रस्तुपुत्राणामनयंतदा ध्यायन्नुद्विग्नहृदयोन
शान्तिमधिजग्मिवान् ३६ सचिंतयन्ननेकाग्रःशोकव्याकुलचेतनः क्षत्तुःसंप्रेषयामासशीघ्रमागम्यतामिति ३७ ततोजगा
मविदुरोधृतराष्ट्रनिवेशनं तंपर्यपृच्छत्संविग्नोधृतराष्ट्रोजनाधिपः ३८ इतिसभापर्वणिवनप्रवेशे ७७ वैशंपायनउवा
च तमागतमथोराजाविदुरंदीर्घदर्शिनं साशंकइवपप्रच्छधृतराष्ट्रोम्बिकासुतः १ धृतराष्ट्रउवाच कथंगच्छतिकौंतेयोधर्मपु
त्रोयुधिष्ठिरः भीमसेनःसव्यसाचीमाद्रीपुत्रौचपांडवौ २ धौम्यश्चैवकथंक्षत्तः द्रौपदीचयशस्विनी श्रोतुमिच्छाम्यहंसर्वंते
षामंगविचेष्टितं ३ विदुरउवाच वस्त्रेणसंवृत्यमुखंकुंतीपुत्रोयुधिष्ठिरः बाहूविशालौसंपश्यन्भीमोगच्छतिपांडवः ४
सिकतावपन्सव्यसाचीराजानमनुगच्छति माद्रीपुत्रःसहदेवोमुखमालिप्यगच्छति ५ पांसूपलिप्तसर्वांगोनकुलश्चित्तविह्व
लः दर्शनीयतमोलोकेराजानमनुगच्छति ६ कृष्णाचकेशैःप्रच्छाद्यमुखमायतलोचना दर्शनीयाप्ररुदतीराजानमनुग

स॰२ च्छति ७ ॥ ॥

स० ११९

याम्यानियमदैवसानि २ १० शरांश्चयावान ११ १६ असक्ताः पास्परमलग्नाः १७ हतपत्नीाहतभर्तृकाः २१ २२ नैर्ऋतानिर्ऋतिकोणगान् २३

मा २

धौम्योयाम्यानिसामानिनैरृतानिचविशांपते गायन्गच्छतिमार्गेषुकुशानादायपाणिना ८ धृतराष्ट्रउवाच विविधानीहरूपाणिकृत्वागच्छंति
पाण्डवाः तन्ममाचक्ष्वविदुरकस्मादेवंव्रजंतिते ९ विदुरउवाच निकृतस्यापितेपुत्रैर्हृतेराज्येधनेषुच नधर्माच्चलतेबुद्धिर्धर्मराजस्यधी
मतः १० योसौराजाघृणीनित्यंधार्तराष्ट्रेषुभारत निसंभ्रंशितःक्रोधान्नोन्मीलयतिलोचने ११ नाहंजनंनिर्दहेयंदृष्ट्वाघोरेणचक्षुषा
सपिधायमुखंराजातस्माद्गच्छतिपांडवः १२ यथाचभीमोव्रजतितन्मेनिगदतःशृणु बाह्वोर्बलेनास्तिसमोममेतिभरतर्षभ १४ बाहू
विशालौकृत्वासौतेनभीमोपिगच्छति बाहूविदर्शयन्राजन्बाहुद्रविणदर्पितः १५ चिकीर्षनकर्म्मशत्रुभ्योबाहूद्रव्यानुरूपतः प्रदिशन्
शरसंपातान्कुंतीपुत्रोर्जुनस्तदा १६ सिकतावपन्सव्यसाचीराजानमनुगच्छति असक्ताःसिकतास्तस्ययथासंप्रतिभारत १७
असक्ताःशरवर्षाणितथामोक्ष्यतिशत्रुषु नमेकश्चिद्विजानीयान्मुखमद्येतिभारत मुखमालिप्यतेनासौसहदेवोपिगच्छति १८
नाहंमनांस्याददेयंमार्गेस्त्रीणामितिप्रभो पांसूपलिप्तसर्वांगोनकुलस्तेनगच्छति १९ एकवस्त्राप्ररुदतीमुक्तकेशीरजस्वला
शोणितानाक्तवसनाद्रौपदीवाक्यमब्रवीत् २० यत्कृतेहमिदंप्राप्तातेषांवर्षेचतुर्दशे हतपत्न्योहतसुताहतबंधुजनप्रियाः २१
बंधुशोणितदिग्धांग्योमुक्तकेश्योरजस्वलाः एवंकृतोदकाभार्याःप्रवेक्ष्यंतिगजाह्वये २२ कृत्वातुनैर्ऋतान्दर्भान्धीरोधौम्यः
पुरोहितः सामानिगायन्याम्यानिपुरतोयातिभारत हतेषुभरतेष्वाजौकुरूणांगुरवस्तदा २३ ॥ ॥

राम० ११९

॥ ॥ ॥ ॥ ॥

२७ अवसायंनिश्चयं २८ निर्यन्तुगच्छन्तु २९ ३० प्रव्याहांति नगरसमीपेप्रेतमांसास्थ्याशीनिश्चानयंति प्रतिकूलंगर्जन्तिवा ३१ ३५ ब्राह्मीश्रियंब्राह्मणामाधेयंर्वयंसेवे

एवंसामानिगासं नीतुस्त्राधोम्योपिगच्छति २४ हाहागच्छंतिनोनाथाः समवेक्ष्यमीदृशं अहोधिक्कुरुवृद्धानांबालानामिवचेष्टितं २५ राष्ट्रेभ्यः
पांडुदायादाह्लोभान्निर्वासयंतिये अनाथाः स्मवयंसर्वेवियुक्ताः पांडुनंदनैः २६ दुर्विनीतेषुलुब्धेषुकाप्रीतिः कौरवेषुनः इतिपौराः सुदुःखार्त्ता
क्रोशंतिस्मपुनःपुनः २७ एवमाकारलिंगैस्तेव्यवसायंमनोगतं कथयंतश्चकौन्तेयावनंजग्मुर्मनस्विनः २८ एवंतेषुनराग्र्येषुनिर्गच्छत्सुगजा
ह्वयात् अनभ्रेविद्युतश्चासन्भूमिश्चसमकंपत २९ राहुरग्रसदादित्यमपर्वणिविशांपते उल्काचाप्यपसव्यंहिपुरंकृत्वाव्यशीर्यत ३० प्रव्याहृ
रंतिक्रव्यादाश्गृध्रगोमायुवायसाः देवायतनचैत्येषुप्राकाराट्टालकेषुच ३१ एवमेतेमहोत्पाताप्रादुरासन्दुरासदाः भरतानामभावायराजन्
दुर्मंत्रितेनच ३२ वैशंपायनउवाच एवंप्रवदतोरेवतयोस्तत्रविशांपते धृतराष्ट्रस्यराज्ञश्चविदुरस्यचधीमतः ३३ नारदश्चसभामध्ये
कुरूणामग्रतःस्थितः महर्षिभिःपरिवृतोरौद्रंवाक्यमुवाचह ३४ इतश्चतुर्दशेवर्षेविनंक्ष्यंतीहकौरवाः दुर्योधनापराधेनभीमार्जुनब
लेनच ३५ इत्युक्त्वादिवमाक्रम्यक्षिप्रमंतरधीयत ब्राह्मींश्रियंसुविपुलांबिभ्रद्देवर्षिसत्तमः ३६ वैशंपायनउवाच ततोदुर्योधनः
कर्णःशकुनिश्चापिसौबलः द्रोणंद्वीपममन्यंतराज्यंचास्मैन्यवेदयत् ३७ अथाब्रवीत्ततोद्रोणोदुर्योधनममर्षणं दुःशासनंचकर्णं
चसर्वानेवचभारतान् ३८ अवध्यान्पांडवानाहुर्देवपुत्रान्द्विजातयः अहंवैशरणंप्राप्तान्वर्त्तमानोयथाबलं गतान्सर्वात्मनाभक्त्या

घुलोकेषुकामवारं ३३ द्वीपंआश्रयं ३७ ३८ सराजकान्राजसमूहसहितान् ३९ ३९ ३९ ॥

स०
१२०

४४ दैवरक्तैर्दैवैर्दत्त्वाः साध्वसोभयं ४५ ४६ मन्त्रिभिः संगमः संग्रा(मः) परमंश्चनंतस्तश्चाराः प्राणास्प्रागेनापीसर्थेः ४७ ४८ नैनरे[illegible]वनाकृतेरतत्स्रेयः कल्पा

मा ४

नोत्सहेयंपरित्यक्तुंदैवंहिबलवत्तरं धर्म्मतः पांडुपुत्रांवैवनंगच्छंतिनिर्जिताः ४० तेषट्द्वादशवर्षाणिवनेवत्स्यंतिपांडवाः चरितब्रह्मचर्याश्च
क्रोधामर्षवशानुगाः ४१ वैरंनिर्यातयिष्यंतिमहत्दुःखायपांडवाः मयाचभ्रंशितोराजन्द्रुपदःसखिविग्रहे ४२ पुत्रार्थमयजद्राजावधाय
ममभारततयाजोपयाजतपसासुतंलेभेसपावकात् ४३ धृष्टद्युम्नंद्रौपदींचवेदीमध्यात्सुनिंदितां धृष्टद्युम्नस्तुपार्थानांश्यालःसंबंधिनोमतः
पांडवानांप्रियरतस्तस्मान्मामभयं विशत् ४४ ज्वालावर्णोदेवदत्तोधनुष्मान्कवचीशरी मर्त्यधर्म्मतयातस्मादद्यमेसाध्वसोमहान् ४५
गतोहियक्षंतेषांपार्थः परवीरहा रथातिरथसंख्यायांयोग्रणीरर्जुनोयुवा ४६ सृष्टः प्राणोमयातस्यतेनचेत्संगमोमम किमन्यत्दुःखम
धिकंपरंभुविकौरवाः ४७ धृष्टद्युम्नोद्रोणमृत्युरितिविप्रथितंवचः मद्वधायश्रुतोप्येषलोकेचाप्यतिविश्रुतः ४८ सोयंनूनमनुप्राप्तस्त्व
त्कृतेकालउत्तमः त्वरिताःकुरुतश्रेयोनैतदेतावताकृतं ४९ मुहूर्त्तंसुखमेवैतत्तालच्छायेवहेमनी यजध्वंचमहायज्ञैर्भोगानश्नीतदत्तच ५०
इतश्चतुर्दशेवर्षेमहत्प्राप्स्यथवैशसं द्रोणस्यवचनंश्रुत्वाधृतराष्ट्रोब्रवीदिदं सम्यगाहगुरुःक्षत्तरुपावर्त्तयपांडवान् यदिवातेननिवर्त्तंतेसत्
कृतायांतुपांडवाः सशस्त्ररथपादाताभोगवंतश्चपुत्रकाः इतिसभापर्वणिवनप्रवेशे ७८ वैशंपायनउवाच वनंगतेषुपार्थेषुनिर्जितेषु
द्यूतेदेरैंधृतराष्ट्रंमहाराजतदाचिंतासमाविशत् १ तंचिंतयानमासीनंधृतराष्ट्रंजनेश्वरं निश्वसंतमनेकाग्रमितिहोवाचसंजयः २ ॥

सम०
१२०

णनरएनावना पांडवनिर्वासनमात्रेणकृतंभवति ४९ हैमनीहेमंतसंबंधिनीवैशसंनाशं ५१ अध्यायः वनं २ २ २ २

युद्धशौंडैः युद्धरसैः ४ ८ अवाचीनानिविपरीतानि ८ ९ ९ २ २ २ ९ ९

संजयउवाच अवाप्यवसुसंपूर्णांवसुधांवसुधाधिप प्रव्राज्यपांडवान्राजन्किमनुशोचसि ३ धृतराष्ट्रउवाच अशोच्यंकुरुतस्तेषांये
षांवैरंभविष्यति पांडवैर्युद्धशौंडैर्हिबलवद्भिर्महारथैः ४ संजयउवाच तवेदंसुकृतंराजन्महद्वैरंसमुपस्थितं विनाशोयेनलोकस्यसानु
बंधोभविष्यति ५ वार्यमाणोहिभीष्मेणद्रोणेनविदुरेणच पांडवानांप्रियांभार्यांद्रौपदींधर्मचारिणीं ६ प्राहिणोदानयेहेतिपुत्रोदुर्यो गी३
धनस्तव सूतपुत्रंसुमंदात्मानिर्लज्जःप्रातिकामिनं ७ यस्मैदेवाःप्रयच्छंतिपुरुषायपराभवं बुद्धिंतस्यापकर्षंतिसोवाचीनानिपश्यति
८ बुद्धौकलुषभूतायांविनाशेसमुपस्थिते अनयोनयसंकाशोहृदयान्नापसर्पति ९ अनर्थाश्चार्थरूपेणअर्थाश्चानर्थरूपिणः
उत्तिष्ठंतिविनाशायनूनंतच्चास्यरोचते १० नकालोदंडमुद्यम्यशिरःकृंततिकस्यचित् कालस्यबलमेतावद्विपरीतार्थदर्शनं ११
आसादितमिदंघोरंतुमुलंलोमहर्षणं पांचालीमपकर्षद्भिःसभामध्येतपस्विनीं १२ अयोनिजांरूपवतींकुलेजातांविभावसोः
कोनुतांसर्वधर्मज्ञांपरिभूययशस्विनीं १३ पर्यानयेत्सभामध्येविनादुर्द्यूतदेविनं स्त्रीधर्मिणीवरारोहाशोणितेनपरिप्लुता १४
एकवस्त्राथपांचालीपांडवानभ्यवेक्षत हृतस्वान्हृतराज्यांश्चहृतवस्त्रान्हृतश्रियः १५ विहीनान्सर्वकामेभ्योदासभावमुपागा
तान् धर्मपाशपरिक्षिप्तानशक्तानिवविक्रमे १६ क्रुद्धांचानर्हतींकृष्णांदुःखितांकुरुसंसदि दुर्योधनश्चकर्णश्चकटुकान्य
हे२ भ्यभाषतां १७ ॥

स०
१२१

शेषं हतावशेषं कतिपयानामेकस्य वा जीवनं भविष्यतीत्यर्थः २० २३ निष्टानकः प्रलयदुंदुभिश्चंडवाद्यं यद्वा निष्टानक इति पाठेपि स एवार्थः निर्घातः वज्रपातः २४ २५

इति सर्वमिदं राजन्नाकुलं प्रतिभाति मे १९ धृतराष्ट्र उवाच तस्याः कृपणचक्षुर्भ्यां प्रदह्येतापि मेदिनी अपि शेषं भवेदद्य पुत्राणां मम संजय
२० भरतानां स्त्रियः सर्वा गांधार्या सह संगताः प्राक्रोशन्भैरवं तत्र दृष्ट्वा कृष्णां सभां गतां २१ धर्मिष्ठां धर्मपत्नीं च रूपयौवनशालिनीं
प्रजाभिः सह संगम्य ह्यनुशोचंति नित्यशः २२ अग्निहोत्राग्निसायाह्ने न चाहूयंत सर्वशः ब्राह्मणाः कुपिताश्चासन्द्रौपद्याः परिकर्षणे
२३ आसीन्निष्टानको घोरो निर्घातश्च महानभूत् दिव उल्काश्च पतंस्तत्र राहुश्चार्कमुपाग्रसत् २४ अपर्वणि महाघोरं प्रजानां जनयन्भयं
तथैव रथशालासु प्रादुरासीद्धुताशनः २५ ध्वजाश्चापि व्यशीर्यंत भरतानामभूतये दुर्योधनस्याग्निहोत्रे प्राक्रोशन्भैरवं शिवाः
२६ तास्तदा प्रत्यभाषंत रासभाः सर्वतो दिशः प्रातिष्ठत ततो भीष्मो द्रोणेन सह संजय २७ कृपश्च सोमदत्तश्च बाह्लीकश्च महा
मनाः ततोऽहमब्रुवं तत्र विदुरेण प्रचोदितः २९ वरं ददानि कृष्णायै काङ्क्षितं यद्यदिच्छति अवृणोत्तत्र पांचाली पांडवानामदासतां
३० सरथान्सधनुष्कांश्चाप्यनुज्ञासिषमप्यहं अथाब्रवीन्महाप्राज्ञो विदुरः सर्वधर्मवित् ३१ एतदंतास्तु भरता यद्वः कृष्णा सभां
गता येषा पांचालराजस्य सुता सा श्रीरनुत्तमा ३२ पांचाली पांडवानेतान्दैवसृष्टोपसर्पति तस्याः पार्थाः परिक्लेशं न
क्षंस्यंते ह्यमर्षणाः ३३ ३३

शिवाः सृगालाः २६ २७ २८ २९ अनुज्ञासिषं अनुज्ञातवान् अडभावश्चार्षः पाठांतरे तु सुगमं ३० ३१ ३२ ३३

स०
१२१

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधर चतुर्धरवंशावतंसश्रीगोविंदसूरिसूनुश्रीनीलकंठविरचिते भारतभावदीपे सभापर्वार्थप्रकाशः समाप्तिमगमत् ॥ ॥ ७९ ॥॥

स० १२२

कृष्णयोर्वा महेष्वासाः पांचाला वा महारथाः तेन सत्याभिसंधेन वासुदेवेन रक्षिताः ३४ आगमिष्यति बीभत्सुः पांचालैः परिवारितः ते
षां मध्ये महेष्वासो भीमसेनो महाबलः ३५ आगमिष्यति धुन्वानो गदां दंडमिवांतकः ततो गांडीवनिर्घोषं श्रुत्वा पार्थस्य धीमतः ३६ ग
दावेगं च भीमस्य नालं सोढुं नराधिपाः तत्र मे रोचते नित्यं पार्थैः साम न विग्रहः ३७ कुरुभ्यो हि सदा मन्ये पांडवान्बलवत्तरान् तथा हि ब
लवान्राजा जरासंधो महाद्युतिः ३८ बाहुप्रहरणेनैव भीमेन निहतो युधि तस्य ते शम एवास्तु पांडवैर्भरतर्षभ ३९ उभयोः पक्षयोर्यु
क्तं क्रियतामविशंकया एवं कृते महाराज परं श्रेयस्त्वमाप्स्यसि ४० एवं गावल्गणेः क्षत्ता धर्मार्थसहितं वचः उक्तवान्न गृहीतं वै मया पुत्र
हितैषिणा ४१ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सभापर्वणि अनुद्यूतं समाप्तं ७९ एतत्सर्वं सभापर्व समाख्यातं म
हर्षयः अध्यायाः सप्ततिर्ज्ञेयास्तथा चाष्टौ च संख्यया ८० श्लोकानां द्वे सहस्रे तु पंच श्लोकशतानि च श्लोकाश्चैकादश तथा पर्वण्यस्मि
न्प्रकीर्तिताः इति सभापर्व समाप्तं अस्यानंतरं आरण्यकं पर्व भविष्यति यस्यायमाद्यः श्लोकः जनमेजय उवाच एवं द्यूतजिताः पार्थाः
कोपिताश्च दुरात्मभिः धार्तराष्ट्रैः सहामात्यैर्निकृत्या द्विजसत्तम अथास्मिन्पर्वणि वृत्तांताः मयाभिगमनं सभानिर्माणं सभाप्रवेशः नार
दागमनं कच्चित्प्रश्नः देवसभावर्णनं राजसूयमंत्रः जरासंधोत्पत्तिः जरासंधवधः राजमोक्षणं दिग्विजयः राजसूयः राज्ञागमनं बल्याहर
णं राज्ञां नियोगः अर्घाभिहरणं शिशुपालकोपः शिशुपालवधः यज्ञसमाप्तिः वासुदेवगमनं दुर्योधननिवासः सभायां दुर्योधनो
पहासः दुर्योधनामर्षः दुर्योधनचिंता धृतराष्ट्रमंत्रः पांडवाह्वानं पांडवपराजयः द्यूते राज्यहरणं द्रौपदीप्रकर्षणं द्रौपदी
वरप्रदानं अनुद्यूतं पांडवपराजयः वनप्रस्थानमिति ॥ ॥

टी० १२२

ॐ

सभापर्व पत्रे १२२ श्रीउमसनासाम णसीतदेव
श्रीजोगअजी का श्री श्रीवजीर मलजस मकें

सभापर्व
१२२

[illegible] १२२

